नं. — ४९६० —

ग्र.नाम देवी माहात्म्य टीका।
सप्तशती " वा

कर्ता श्री रघुनाथाश्रमः

पत्रसं. ७४ — सं. १९३८

विषयः प्रथम माहात्म्यादि

देवीमाहात्म्यटीका सप्तशतीटीका वा

४८६०

Missing
66

4960

Net 65.

66-1

75-1 = 74 Net

स·
प्र·टी·
१

ॐनमःश्रीगणेशाय ॐनमःश्रीचंडिकाभगवत्यै कांकेदंतवयामवामनविभोऽपदृष्टीभवेद्वाकथं किंवातद्गतयै
वपाक्तिरयणसंसृविनैववया साकिंतेनभवेद्धितीयचरणीसंपादनेवाङ्गमा तस्माद्यावनवंचनात्तवविभोभृ·
त्येष्वनैवोदिता १ प्रसमीद्ध्यत्तगततनप्रयुक्ताः सुचिरंचेतसियोजनाःस्वबुद्ध्या स्वजनस्यहृत्वायसमवाप्त्या
रघुनाथाश्रमस्रातनोतिटीकां २ श्रवंध्यगायेरघुनाथनाम्नाव्याख्यानरूपःस्वयियैवसेद्धः अखंडितःस
मयातीसमुद्रेगताग्रतेसाधुजनस्तनोतु ३ उद्देशितोविप्रोषेणयतिरंतेनिवासिनः कौत्हकाल्लकृतेटी
कांमुदेगंगाहिवेदिनः ४ पूर्वंकिलभगवद्बादरायणशिष्योजैमिनिर्महाभारतविषयेषुकेषुचित्संदा·
येषु संदिहानोमार्कंडेयंमहामुनिमुपगम्योक्तवान् हेमुनेमदीयान्संदेहानपाकर्तुमर्हसि तदनंतरंमा·
र्कंडेयेनोक्तंममध्यानासक्तस्यत्वदीयसंदेहनिराकरणेऽवकाशोनास्ति त्वमिमान्सर्वार्थाभिज्ञान्विंध्या
चलवासिनश्चतुरःपक्षिणःपृच्छेति तदनंतरं जैमिनिस्तथैवकृतवान् पुनश्चजैमिनिप्रश्नानुरोधात्त·
र्गादिपुराणंगव्याख्यावसरे पुराणांगव्याविख्यासयामार्कंडेयभागुरिसंवादात्मकमितिहासमनुव
र्णयंतोऽष्टममन्वंतरमुपक्रममाणाःपक्षिणऊचुः मार्कंडेयउवाचेति ॥ मृकंडोरपत्यंमार्कंडे
यः मंगलार्थश्चायंचिरंजीविनोमार्कंडेयस्यग्रंथादावुपन्यासः अत्र छंदरुषिकरणं ॥

सवर्णा छाया तस्या अपत्यं सावर्णिः यस्कादित्वादिञ् यद्वा, अजस्य वैवस्वतमनोः समानो वर्णोस्येति सवर्णः सवर्ण एव सा
वर्णिः स्वार्थे तद्धिताभिधानात् तथाच विष्णुपुराणे छायासंज्ञासुतो यो सौ द्वितीयः कथितो मनुः पूर्वजस्य सवर्णोसौ सावर्णि
स्तेन कथ्यते सूर्यतनय इति दक्षसावर्ण्यादीनां व्युदासार्थं यः सावर्णिरष्टमो मनुः स्वरथः कथ्यते तदुत्पत्तिं निशामय जा
नीहीत्यर्थः निशामयेति शाम लक्षणा आलोचने तस्य चौरादिकस्य रूपं शामो दर्शन इति दर्शनविषय एव मानुबंधसंज्ञावि
धानाद्ध्रस्वत्वाभावः तदुत्पत्तिमिति वाच्यवाचकाभेदाभिप्रायेण विस्तरात्प्रपंचतो गदतः कथयतः ममेति अपवा

ॐ अस्य श्रीदेवीसूक्तस्य मार्कंडेय ऋषिः अनुष्टुभोतिजगत्यः पुनरनुष्टुप्त्रिष्टुप्छंदांसि दुर्गादेवी देवता भुवने
श्वरी बीजं रमा शक्तिः सर्वसंकल्पितार्थसिद्ध्यर्थे विनियोगः मार्कंडेय उवाच॥ सावर्णिः सूर्यत
नयो यो मनुः कथ्यतेष्टमः निशामय तदुत्पत्तिं विस्तराद्गदतो मम १॥

द्विषये क्वचिदस्मदित्यस्यापि ममादेशविधानात् पंचम्यर्थे षष्ठी अव्ययं वा पंचम्यंतं यद्वा मम विस्तरात् मम शब्द प्र
पंचात् विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तर इत्यभिधानात् अन्ये तु मम गदतो मम वचनादित्याहुः गदेनग
दः चमर्थकः तदर्थाज्जनम् केचित्तु निशामय आकर्णय सावधानतः शृणु निशामयेति पौराणिकः प्रयोगः अन्य
था शामोऽदर्शने इति दर्शनादन्यत्र ह्रस्वो भवति यथा निशाम्य देवानुचरस्य वाचमिति दर्शने निशामयरूपं १॥

स॰
प्रा॰ टी॰
२

विसदप्राप्नतीतिसाथनंमायातस्याश्चमहत्त्वंसर्वविषयत्वमिति महामायेत्युक्तिः सैवहिज्ञानिनोमोहयति तस्या
अनुभावेनेदमस्यभूपादित्यनुकूलेछयायथायेनप्रकारेण मन्वंतरंकिंचिदधिकैकसप्तति चतुर्युगात्मकःकालःतस्या
धिपोराजाबभूवेति भाविनिभूतवदुपचारः तंप्रकारंनिशामयेत्यनुषंगः यत्तदोःसाहचर्यनियमात् महानसाधार
णोभागोभगसमुदायोयस्यसच ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः ज्ञानवैराग्ययोश्चापिषण्णांभगइतिविष्णु
पुराणोक्तेः रवेस्तनयः सावर्णिरितिसंभ्रमेणपुनरुक्तिः हेमहाभागेतिवा महामायेति श्रीचंडिका २ स्वारोचिषो,पत्यं
स्वारोचिषोनामद्वितीयोमनुस्तदधिकारोपलक्षिते स्वारोचिषेंतरेसमये द्वितीयमन्वंतरेइतियावत् मन्वंतरंमनोः

महामायानुभावेनयथामन्वंतराधिपः सबभूवमहाभागःसावर्णिस्तनयोरवेः २ स्वारोचिषेंतरेपूर्वंचैत्रवं
शसमुद्भवः सुरथोनामराजाभूत्समस्तेक्षितिमंडले ३ तस्यपालयतःसम्यक्प्रजाःपुत्रानिवौरसान् बभूवुः
शत्रवोभूपाःकोलाविध्वंसिनस्तदा ४॥

कालइतिविष्णुपुराणादर्शनात् पूर्वाकथा काला चैत्रयाचैत्रोनामस्वारोचिष॰
स्यमनोःसुतस्तस्यवंशेसंततौसमुद्भवोजन्मयस्येतिनामेतिप्रसिद्धौसुरथसंज्ञयाप्रसिद्धइत्यर्थः सागरावधिवसुंधराधिप
तिर्बभूव ३ धर्मपत्नीप्रभवान्पुत्रानिवनीतिशास्त्रानुसारेणप्रजाःपालयतस्तस्यशत्रवस्तद्घातार्थप्राप्ताउद्युक्ताबभूवुःके
तेइत्यपेक्षायामाहकोलाविध्वंसिनोभूपाइति कोलान्सूकरान्विध्वंसंति तेकोलाविध्वंसिनोयवनाःअत्राभीक्ष्ण्ययोश्चेतिणि
निःकोलेतिसुरथस्यैवराजधान्यंतरंतांविध्वंसिनोयथातथाबभूवुरित्यर्थः कोलेत्येषामेवराजधानीतद्विध्वंसिनस्तन्निवासिनः
उपसर्गेणधात्वर्थस्यान्यथाकरणात् कोलेतिपाठेतुविशेषेणवातेनविध्वंसितंशीलंयेषामितितदेतिपाठेतस्मिन्कालेइत्यर्थः ४॥

२

प्रवलप्रतिपक्षायितोदंडोहस्त्येश्वास्यास्तीति अथवाधर्मशास्त्रानुसारीप्रजासुदंडोविद्यतेयस्य अतिप्रवलोतिविक्रमीदं
डश्चतुरंगवलंयस्येतिवा तस्यकोलाविध्वंसिभिः सहयुद्धंसंप्रहारोभूत् न्यूनैरल्पसामग्रीकैरपितैःससमरयोजितः जयभं
गयोर्दैवाधीनत्वात् ५ ततोनंतरंस्वराजधानीमायातोमूलराष्ट्राध्यक्षोभवत् कथंभूतस्तस्मिंकालेप्राप्तवलैररिभिराक्रां
तोभिभूतश्छिन्नदेशोवा ६ सार्वविभक्तिकस्तसिल् ततइतिषष्ठ्यंतं तस्यतत्रस्वपुरेपि अमात्यैःसहभवैःसहस्तानवले
डैःसैनागहेवादिपुक्तैर्दुरात्मभिःस्वामिद्रोहादिमहापातकपालितयानिंदितांतःकरणैर्लोभाद्युपहतांतःकरणैर्वापा

तस्यतैरभवद्युद्धमतिप्रवलदंडिनः न्यूनैरपिसतैर्युद्धे कोलाविध्वंसिभिर्जितः ५ ततःस्वपुरमायातोनिज
देशाधिपोभवत् आक्रांतःसमहाभागस्तैस्तदाप्रवलारिभिः ६ अमात्यैर्वलिभिर्दुष्टैर्दुर्वलस्यदुरात्मभिः॥
कोशोवलंचापहृतंतत्रापिस्वपुरेततः ७ ततोमृगयाव्याजेनहृतस्वाम्यःसभूपतिः एकाकीहयमारुह्यज
गामगहनंवनं ८॥

दुभिःक्षपितवलस्यार्थसंचयःसैन्यंचापहृतं ततइति पंचम्यंतंवा ततःपाशुकतता
दूषणाभिभवानंतरंअयंक्षीणवलोस्माकंकिंकरिष्यतीति संचिंत्यलोभाद्युपहतांतःकरणैःसर्वकोशादिकमपहृतमि
त्यर्थः स्वपुरेसतत्रापिपाठः निजनगरेवर्तमानस्य ७ मृगवधच्छलेन हृतस्वाम्यमाधिपत्यंयस्यसोऽसहायएव
दुर्गंवनंजगाम ततोऽमात्यादिकेप्रतिपक्षेविपरीतेजातेसति सभूपतिरिदमेवयुक्तमितिबुद्ध्याविमृश्यस्याहंनो
चितमिति मृगयाव्याजेन असहायोपिहयमारुह्यहृद्गतशल्यसमानत्वात् उग्रवेषांवनंविवेश ८॥

तत्र वने स राजा मेधोभिधानस्य ब्राह्मणश्रेष्ठस्याश्रमं मुनिनिवासोचितमद्राक्षीत् प्रकर्षेण प्रशांतैर्मुनिप्रभावात्परस्परं हिंसारहि-तैर्हिंस्रपशुभिर्व्याघ्रादिभिर्व्याप्तं मुनेर्मेधसः शिष्यैरुपशोभितं मननशीलैर्वा शिष्यैर्मुनिभिः शिष्यैश्च वा द्विजवर्यस्य सुमेधस इत्यपिपाठः सुमेधस इति नाम्नः प्रधानमुनेः ९ कंचित्कालमित्यत्यंतसंयोगे द्वितीया सवेति चकारान्वयः तेन मुनिना पूजितः इतश्चेतश्चेत्यनियतदिग्रूपां मुनिवरेति भागुरेः संबोधनं सुमेधसो विशेषणं वा १० ममेति षष्ठ्यंतप्रतिरूपकमव्ययं तस्य भावो ममत्वं ममेत्यभिमानस्तेनाकृष्टाववशीकृता चेतना बुद्धिर्यस्य सः तदा स राजा तत्राश्रमे ऽचिंतयत् यतो ममता

स तत्राश्रममद्राक्षीद्द्विजवर्यःसुमेधसः प्रशांतश्वापदाकीर्णंमुनिशिष्योपशोभितं ९ तस्थौकंचित्सकालंचमु-
निनातेनसत्कृतः इतश्चेतश्चविचरंस्तस्मिन्मुनिवराश्रमे १० सोचिंतयत्तदातत्रममत्वाकृष्टचेतनः मत्पूर्वैःपालि-
तंपूर्वंमयाहीनंपुरंहितत् ११ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतःपाल्यतेनवा नजानेसप्रधानोमेशूरोहस्तीसदामदः
ममवैरिवशंयातःकान्भोगानुपलप्स्यते १२॥

कृष्टचेतन इत्यन्वयः चिंतामेवाह मदीयप्राचीन पुरुषैः पूर्वं प्राक्का-लेऽत्यंतसंयोगे द्वितीया तदेवाद्य पुरं मया रहितं वर्तते ११ अस्मद्वैरिभिरिति देहलगर्भं विशेषणं अतएव धर्मतः अवि-तनीत्यापाल्यतेनवेति विकल्पः स प्रसिद्धः प्रधानो मुख्यः उक्तलिंगत्यजत्य' 'न्यायात्पुंस्त्वं तथाच लंकाकांडे येप्र-धानाः पुरंगमा इति यद्वा स प्रधानो महामात्रसहितः मम शत्रुपारतंत्र्यं प्राप्तः कान् कियतः कीदृशान्वा भोगानु-पलप्स्यते इति न जाने इति पूर्वेणैवान्वयः १२ ॥

प्रसादस्तुष्टिदानं यत्नं वर्षदेयं दानं भोजनं प्रतिदिने देयं यत्र प्रसादोनुग्रहो यत्नं प्रीतिदानं भोजनं वेतनं तैर्हेतुभूतैर्येम
मनित्यमनुगताः सेवकाः ते यस्य प्रति अन्यमहीभृतां सेवां प्रसादादिभिरेव हेतुभूतैः कुर्वंति ध्रुवमिति वितर्के काका
क्षिवद्धेतुभूतं प्रसादादिकमपि अयत्र संबध्यते ११ आगतादायाद्दूरीयां प्रोव्ययः समस्य व्ययः ततोन्यथाः समस्य व्ययः
तच्छीलैस्तत्कारिभिः अथवा व्यसनविषयिभिः अतिदुःखेनेतिष `` दंतादितिएतत्वनिषेधः १४ विप्रेतिभागुरिसं

येममानुगतानित्यं प्रसादयत्नभोजनैः अनुवृत्तिं ध्रुवं तेय कुर्वंत्यन्यमहीभृतां ११ असमव्ययशीलैस्तैः
कुर्वद्भिः सततं व्ययं संचितः सोतिदुःखेन द्रव्यं को प्रागमिष्यति १४ एतच्चान्यच्च सततं चिंतयामास पार्थिवः
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः १५ स दृष्टस्तेन कस्त्वं भो हेतुश्चागमनेत्र कः सशोक इव कस्मात्त्वं
दुर्मना इव लक्ष्यसे १६ इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितं प्रत्युवाच स तं वैश्यः प्रश्रयावनतोन्न
पं १७ वैश्यउवाच॥ समाधिर्नाम वैश्योहमुत्पन्नो धनिनां कुले पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः १८

वैश्यं मेधसो विप्रस्याश्रमस्तिवा अभ्याशो निकटे १५ स वैश्यस्तेन राज्ञा भो इति इष्टवियोगचिंतनं शोको दुःख
निबंधन चिंता वसादो दौर्मनस्यं सशोक इवोपलक्षित गम्भीरत्वात् दुर्मना इव क्रियास्वस्थिरत्वात् १६ इतीदृशं भूपते
र्विस्रंभेण उदीरितं वचः श्रुत्वा स वैश्यस्तं भूपतिं प्रत्युत्तरं दत्तवान् विनयेन नम्रः १७ पुत्रैर्दारैश्च चकारात्स्वज
नैश्च निरस्तो भर्त्सितो साधुभिरिति देहगर्भे विप्रोषरां १८ ॥

न केवलमपि त्रिमोयनमादाय निःसारितोपि एवं धनादिभिर्विहीनो वनमभ्यागत इत्यन्वयः आप्ताः सुहृदो बंधवो ज्ञातयः
१९ स त्वं तथाविधोऽहं कुशलाकुशलात्मिकां शुभामशुभां वा वार्त्तां प्रवृत्तिमेव न वेद्मि इत्यदर्शयति २० किं न्विति संदेहे त्वि
ति वितर्के तेषां पुत्रदारस्वजनानां गृहे कलत्रापत्यादौ कल्याणमकल्याणमिदानीं कथं किंविधाः सत्समीचीनं वृत्तं शीलं
येषां सुवृत्ता इति दारादीनामुपलक्षणं २१ हे वभू तैर्धनैर्यैः पुत्रादिभिर्भवान्निरस्तः तेषु भवतो मनः स्नेहं किमनुबध्नातीति

विहीनः स्वजनैर्दारैः पुत्रैरादाय मे धनं वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः १९ सोऽहं न वेद्मि पुत्राणां कुश
लाकुशलात्मिकां प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः २० किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतं कथं ते
किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः २१ राजोवाच॥ यैर्निरस्तो भवाल्लुब्धैः पुत्रदारादिभिर्धनैः तेषु किं भवतः स्ने
हमनुबध्नाति मानसं २२ वैश्य उवाच॥ एवमेतद्यथा प्राह भवानस्मद्गतं वचः किं करोमि न बध्नाति मम निष्ठुर
तां मनः २३ यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः २४ किमेतन्नाभि
जानामि जानन्नपि महामते यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु २५॥

राज्ञः प्रश्नः २२ अस्माहि एवं वचो यथा भवान्
प्राह तदेवमेव तथैव निष्ठुरतां पारुष्यं २३ यैः पुत्रैर्दारैः स्वजनैः पितृस्नेहं पतिहार्दं स्वजनहार्दं च संत्यज्येत्यन्वयः निरा
कृतोपि तेषु तथाविधेषु मम मनः स्नेहयुतं एवकारो भिन्नक्रमो हार्दीत्यस्यानंतरं द्रष्टव्यः २४ हे महामते विगुणेषु वि
गुणेष्वपि बंधुषु यच्चित्तं स्नेहप्रवणं तज्जानन्नपि नाभिजानामि एतत्किमित्यन्वयः २५॥

कृते हेतोः निःश्वासो दौर्मनस्यं च जायते इत्यन्वयः अप्रीतिरप्रीतिमत्स्वेषु यन्मनो न निष्ठुरं अप्रीतिहृन्निष्ठुरमिति पाठे अ
प्रीत्या हृन्निष्ठुरं न जायते इत्यन्वयो युज्यते तत् किं करोमीत्यन्वयः २६ हे विप्र तं मे यः संसमुपस्थितौ तावुपपन्नौ पृथिवीश्वरो भुसा
त्तमः २७ यथान्यायं यथान्यायं यथार्हं यथाचारं तेन मुनिना संविदं संभाषां संवित्क्रियाप्रतिज्ञायामाचारे ज्ञाने संकेते
संभाषायां क्रियाकारे संकेते नाम्नि भाषणे इत्यभिधानात् २८ यदेकं वस्तु चित्ते स्वहृदि आयत्ततो अधीनतां विना मम

तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरं २६ श्रीमार्कंडेय उवाच ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः २७ कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदं उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ २८ राजोवाच॥ भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना २९ ममत्वं गतराज्यस्य राज्यांगेष्वखिलेष्वपि जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ३० अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यहो ३१

मनसो दुःखाय दुःखकारणं भवति तद्वदस्वेत्यर्थः भाषणोपसंभाषणाज्ञानयत्नविमत्युपमंत्रणेषु वदः इत्यात्मनेपदं ॥
गतराज्यस्येति सुपांसुलुगिति सप्तम्यर्थे षष्ठी राज्यादौ ममत्वं यन्मे तत् किं निबंधनमित्यर्थः गतस्य राज्यस्येति षष्ठी सर्वे
वदेव व्याख्येया स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च राज्यांगानि प्रकृतयः पौराणां श्रेणयोऽपि चेति राज्यांगानि
॥ अयं वैश्यो निकृतो दुःखीकृत उज्झितः त्यक्तः तथेति समुच्चये अतिप्रायेण हार्दी स्नेहवान् ३१॥

स॰
प्रा॰टी॰
५

5

संप्रार्थनेनापि चेष्टदोषो दुःखजनकत्वरूपो यस्मिन्नेवंभूतेपि विषये राज्यवित्तकलत्रादौ ममत्वेनाकृष्टमानसौ
यौ स्वः एवमेव एषोहं राजा च एवमनेन प्रकारेणात्यंतदुःखितौ ३२ हे महाभाग ऋषे ममास्य च ज्ञानिनोरप्यावयोर्य
न्मोहो दुःखजनकेपि विषये सुखजनकत्वप्रतिसंधानं भवति तत्किमेतत्केन प्रकारेणेत्यर्थः नष्टस्मादयं मोहो
भवितुमर्हतीत्याह एषेति वस्तुपरिच्छेदो विवेकस्तेनांधस्य तद्धीनस्येत्यर्थः अथवा विवेकांधस्य विवेकिनः एतादृक् मू
ढता भवति न त्वविवेकिनः तत्र कथमावयोर्मोह इति भावः ज्ञानिनोरपि यन्मोहस्तदेतत्किमिति राज्ञः प्रश्नात् ज्ञानमा

एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ दृष्टदोषेपि विषये ममत्वाकृष्टमानसौ ३२ तत्किमेतन्महाभा
ग यन्मोहो ज्ञानिनोरपि ममास्य च भवत्येषा विवेकांधस्य मूढता ३३ ऋषिरुवाच॥ ज्ञानमस्ति स
मस्तस्य जंतोर्विषयगोचरे विषयाश्च महाभाग यातिश्चैवं पृथक्पृथक ३४॥

त्रस्य मोहवैयधिकर ण्यं राज्ञो॰
भिप्रेतं तदनुपपन्नं प्राणिमात्रस्य ज्ञानिमात्रसत्वेन निर्मोहत्वप्रसंगादित्याह ३४ समस्तस्य जंतोः प्राणिमात्रस्य॰
विषये आहारनिद्राभयमैथुनादिप्रतिपत्तौ वा ज्ञानमंतःकरणवृत्तिरस्ति नास्ति च मोहाभाव इति न ज्ञानमात्र
स्य मोहवैयधिकरण्यमित्यर्थः विशेषविज्ञानं तु भिन्नविषयकमेव भवति तस्यापि मोहवैयधिकरण्यस्योक्त
त्वात् अत्राभिप्रेत्याह विषयाश्चेति हे महाभाग विषयाश्च रूपरसादयः पृथक्पृथग्भिन्नस्वभावा एवं वक्ष्यमाणप्र॰
कारेण यांति प्रत्युपतिष्ठंते जातिश्चैवमिति पाठे यथा रूपरसादिर्विषयश्च पृथग्गेवं मनुष्यत्वादिजातिरपीत्यर्थः ३४

५

विषयभिन्नत्वमेव प्रकटयति उलूकादयो दिवांधाश्च यद्रात्रौ पश्यंतीत्युक्तं भवति अपरे काकादयो रात्र्यंधाः कुक्कुंदरि
किंचुलकादयः स्थावरादयश्च दिवारात्रौ वांधाः केचित्प्राणिनो वानरमार्जारादयो दिवारात्रौ च तुल्यदृष्टयः तथा पूर्वोक्तत्वा
दृष्टिपदविषयत्वेनाहृत्या योजनीयं एतेन ज्ञानमात्रस्य मोहद्वैयर्थ्यिकरणे रात्र्यादावुलूकादीनां मोहो न स्यात् किंचुलका
दीनां सर्वदा मोहो मार्जारादीनां सदा मोहः प्रसज्जतीति सूचितं अथ नास्माभिः सर्वसत्त्वानां ज्ञानित्वमभिप्रेतं किंतु मनुष्या
णामेवेत्याशंक्याह ३५ किं मनुष्याणां ज्ञानित्वमेवोत मनुष्याणामेवाज्ञानित्वमिति विकल्प्याद्यं दूषयति मनुजा ज्ञानिन
इति सत्यं ते मनुजाः केवलं ज्ञानिन एव न हि किंतु ज्ञानिनोपीत्यर्थः एवं चाज्ञानसंवलिता ज्ञानिनोपि ज्ञानित्वे ज्ञानसंव

दिवांधाः प्राणिनः केचिद्रात्रावंधास्तथापरे अन्ये केचिद्दिवारात्रौ प्राणिनस्तुल्यदृष्टयः ३५
ज्ञानिनो मनुजाः सत्यं किंतु ते न हि केवलं यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ३६ ॥

लिताज्ञानवतो ज्ञानित्वमेव किं न स्यादित्यपि वक्तुं शक्यत्वान्मनुष्याणां ज्ञानित्वमेवेति पक्षो दुरुपपादनीय इत्यपि सू
चितं तेन द्वितीयं शंक्याह यत इति हिशब्दोप्यर्थो भिन्नक्रमः पश्वादयोपि सर्वे यतो ज्ञानिनः अज्ञानसंवलितज्ञानस्य संभवात्
अतो मनुष्याणामेव ज्ञानित्वमित्यपि पक्षो न संभवतीत्यर्थः पशवो ग्राम्या गवादयो मृगा आरण्या हरिणादयः अथवा
केवलं ते ज्ञानिनो न हि किंत्वन्येपि ज्ञानिनः संभवंतीत्याह यत इति पश्वादीनामपि विषयज्ञानसंभवात् ननु सर्वेषां
ज्ञानवत्त्वसाम्येपि मनुष्याणां ज्ञाने कश्चन विशेषो भविष्यतीत्याशंक्याह ज्ञानमिति ३६ ॥

स॰
प्रा॰ टी॰
८

तेषां तादृशां मृगपक्षिणां यथा दृष्टं तत्तादृशमेव मनुष्याणामपीत्यर्थः मनुष्याणां च यादृशं तेषां पक्षिणामपि ता
दृशमिति तच्छब्दाध्याहारेणान्तरार्थे योजनीयं यत्तदोर्नित्यसंबंधात् तथान्यदाहारादिकमप्युभयोः पशुमनुष्ययोस्तु
ल्यं साधारणं तथा चाहुः आहारनिद्राभयमैथुनानि सामान्यमेतत्पशुभिर्नराणां ज्ञानं नराणामधिको विशेषः स ते
न हीनः पशुभिः समानः नन्वर्थक्रियापि पश्वादिसाधारणैव मनुष्यमात्रस्यास्तीत्याह ४७ अपत्यानामुखे भक्ष्यनिक्षे
पे सति तेषामेव तत्प्राप्तिर्भविष्यति नत्वस्येति ज्ञाने सत्यपि ममत्वलक्षणान्मोहाद्धेतोरपत्यमुखेषु कणमोक्षादृतानादर

6

ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणां मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ४७ ज्ञानेपि सति पश्यै
तान्पतगाञ्छावचंचुषु कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा ४८ मनुष्या मनुजव्याघ्र साभिला॰
षाः सुतान्प्रति लोभात्प्रत्युपकाराय नन्वेतान्किं न पश्यसि ४९

स्नांउवर्त्तिनः पतंगान्घा
निक्षेपयत्नानीतान् त्र
प्य वैषयिकज्ञानमोहयोः सामानाधिकरण्यं साक्षात्प्रतिपादितमित्यर्थः ४८ व्याघ्रपदः श्रेष्ठत्ववाची ननु पद इः
संबोधनार्थः ननु भो मनुजव्याघ्र प्रत्युपकाराय पोषणाद्युपकारार्थो यो लोभस्तस्माद्धेतोरेते मनुष्याः सुतान्प्रति
साकांक्षा इति किं न पश्यसीति वाक्यार्थकर्मत्वादिति पाठाध्याहारेण योजना मृगा धावति पश्यपेति वत् एतेन मनु
ष्यविशेषनिष्ठज्ञानविशेषो मोहविरोधी तदभावाद्भवतो मोह उत्पद्यते इति सूचितं ननु सर्वेषामपि मोहनिव
र्तकज्ञानार्थं प्रवृत्तिः कुतो न भवतीत्याकांक्षायामाह तथेति ४९ ॥

वैषयिकज्ञानमोहयोः सामानाधिकरण्यमाज्ञाकारेपि सति महामायानुभावेन कर्त्रीमानुषा मोहगर्त्ते मोहस्यास्पदे वै
षयिकज्ञाने निक्षिप्ताः तेषां विशेषणं संसारस्थितिकारिणः अपत्यदेहेंद्रियविषयादिस्वीकारः संसारस्तत्स्य स्थितये कर्त्तेक
मोरण्यावविन्नं प्रीतयेषां प्रवृत्तिमार्गिणां अथवा संसारस्थितिकारिणो विस्तो महामायाप्रभावेनेति योज्यं कथंभूते मो
हगर्त्ते अस्वीयेस्वीयबुद्धिर्ममता सैवावर्त्तो भ्रमसांभ्रमस्तद्वयस्मिन् तथोपसंहरति ४· न तत्स्माद्धम वन्मोहे विस्मयो न कर
णीयः यस्मात्तया महामायया जगन्मोह्यते ननु का सा महामायेत्याकांक्षायामाह महामायेति महामाया नाम हरेरीश्व

तथापि ममतावर्त्ते मोहगर्त्ते निपातिताः महामायानुभावेन संसारस्थितिकारिणः ४· तन्नात्र विस्मयः का
र्यो योगनिद्रा जगत्पतेः महामाया हरेश्चैषा तया संमोह्यते जगत् ४२ ज्ञानिनामपि चेतांसि देवी भगवती हि सा
बलादाकृष्य मोहाय महामाया प्रयच्छति ४॰ तया विसृज्यते विश्वं जगदेतच्चराचरं सैषा प्रसन्ना वरदा नृ
(णां भवति मुक्तये ४३॥

रस्य योगनिद्रा परमानंदमयी शक्तिः जगत्पतेरिति मोहकोटिबहिर्भावसूचकं
विशेषणं चकारोवधारणार्थः तयेत्यनेन संबध्यते तयैवेत्यर्थः न केवलमसौ प्रवृत्तिमार्गिणां मोहिका भवति किं
तु ज्ञानिनामपीत्याह ४२ सा प्रसिद्धा हि यस्मात् बलात्स्वशक्तितो विवेकाद्याकृष्य आकृष्य मोहाय प्रयच्छति मोहानुगा
मीनि करोति ज्ञानविशेषवतामपि चेतांसि नत्वभुवहितानां का कथेति भावः ४॰ तया मूलप्रकृतिरूपया विसृज्यते
विविधं सृज्यते विश्वं जगच्चराचरमिति पर्यायशब्दैरवांतरकार्यविशेषा दृश्यन्ते सा बंधकारणमप्येषा प्रसन्ना पास
नया प्रीता सती मोक्षाय भवति अस्या बंधमोक्षकारणत्वं समर्थयति ४३॥

स॰
श॰टी॰

विद्याब्रह्मज्ञानलक्षणा परमा पुरुषार्थसाधनत्वात् संसारस्य बंधस्तस्य हेतुः चकाराद् विद्याशब्दः स्वानात्मस्तुति
त्यशुचिस्वात्मख्यात्यविद्यारूपा च सा सर्वेषां ब्रह्मादिदेवानां तानामीश्वरा प्रकृति निहाय्या द्विद्यापारजननी ईश्वरी अव्या
हतेच्छा सर्वेश्वराणां ब्रह्मादीनामीश्वरी वा सर्वेश्वरेति राज्ञः संबोधनं वा हे योगनिद्रेति संक्षेपेण श्रुतां महामायां विस्त
रतो ज्ञातुं पृच्छति ४४ महामायेति यां भवान् ब्रवीति सा का हि द्विजाहुः प्रश्ने संबोधने वा अस्याः किमिति च कारो भिन्नक्रमत
या योजनीयः ४५ यत्स्वभावा यल्लक्षणा यत्स्वरूपा यदाकारा यदुद्भवा यत्कारणिका ४६ प्रथमप्रश्नोत्तरं नित्येति द्विती

साविद्या परमा मुक्तेर्हेतुभूता सनातनी संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ४४ राजोवाच॥ भगवन्का
हि सा देवी महामायेति यां भवान् ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ४५ यत्स्वभावा च सा देवी य
त्स्वरूपा यदुद्भवा तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ४६ ऋषिरुवाच॥ नित्यैव सा जगन्मूर्तिस्तया
सर्वमिदं ततं तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ४७ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा उत्पन्ने
ति तदा लोके सा नित्याप्यभिधीयते ४८॥

येत्युसेत्याह जगदेव मूर्तिर्व्यक्तआकारो यस्याः तत्रोपपत्तिमाह तयेति एवं सर्वं त
याततं व्याप्तमित्यस्या व्यापकभाववत्त्वाभिधानेन कारणत्वमुक्तं तस्मात् तृतीयप्रश्नस्योत्तरं दत्तमिति मंतव्यं उत्पत्त्यादि
कमेवं सर्वस्य नयेव कि यत इति उत्पत्त्याद्युपरामेनाह तथापीति ममेत्यव्ययं पंचम्यंतमत्र श्रूयर्थः ननु नित्यत्वे
प्युत्पत्तिमत्त्वयोः परस्परविरोधात् कथमेकत्रास्थितिरित्याह ४७ देवानामिति आविर्भवति प्रकटीभवति अत इति ह्रासमवतारय

नि ४९॥

सकलार्णवजलानामेकीभावादेकार्णवीकृते आस्तीर्य शयनं कृत्वा शेषमनंताहिमभजद्यथास्मत्कल्पांते ब्रह्मादिव
सावसाने उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ४९ ब्रह्माणं विरिंचिं उद्यतो
हंतुं कृतोद्यमौ ५० विष्णुकर्णमलोद्भूताविति विष्णोः सर्वकारणकारणत्वात्तन्मलादिकमपि सृष्टिहेतुरित्यर्थः ५०
प्रजानां पतिर्विधाता चकारेण तुल्यकालयोगतनोद्या ५१ अनन्यनिष्ठांतःकरणः स्थितः निद्राया नेत्रयोरेवाभिव्यक्तेर्हरिने
त्रकृतालयामित्युक्तं सर्वांगस्थितैव सा स्तुतिमाह ५२ जगद्धात्रीं जगत्कर्त्रीं अतुलमसाधारणमादित्यादीनामपि प्रका

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते आस्तीर्य शेषमभजत्कल्पांते भगवान्प्रभुः ४९ तदा द्वावसुरौ घोरौ
विख्यातौ मधुकैटभौ विष्णुकर्णमलोद्भूतौ हंतुं ब्रह्माणमुद्यतौ ५० स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजाप
तिः दृष्ट्वा तौ चासुरौ घोरौ प्रसुप्तं च जनार्दनं ५१ तुष्टाव योगनिद्रां तामेकाग्रहृदयः स्थितः प्रबोधनार्थाय हरेर्ह
रिनेत्रकृतालयां ५२ श्रीब्रह्मोवाच ॥ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीं स्तौमि निद्रां भगवतीं वि
ष्णोरतुलां तेजसः ५३ ॥

शकं तेजो यस्य तस्य विष्णोर्निद्रां स्तौमि वाचा पूजयामि केचित्स्तौमीति पद्यार्थस्था
ने निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुरिति पठित्वा ब्रह्मोवाचेति पठंति ततश्च तुष्टावेत्यनेनैव पूर्वश्लोकेनास्या
न्वयः अतुलामनन्यसमां तेजसो ज्योतीरूपस्य विष्णोः प्रभुरिति ब्रह्मणो विशेषणं तेजसः प्रभुः ब्रह्मेति वा
तेजसः अतुलां स्मरणार्थे कर्मणि षष्ठी वा यस्यास्तेजसा तुल्यं न विद्यते इति वा ५३ ॥

सुधो भनमायनमाह्वानं स्वाहा अथवा स्वस्य द्रविद्रव्यस्य दानं त्यागः स्वस्य द्रव्यस्य प्रादानं स्वधा तथा हि स्वाहा देव ह
विर्दानमंत्रः स्वधा पितृहविर्दानमंत्रः वषट् क्रियते नेनेति वषट्कारो यज्ञस्तत्स्वरूपा स्वरा उदात्तानुदात्तस्वरितसंज्ञा
स्तदात्मिका एव विदु षट्कारस्वरात्मिके त्येकं पदं सुधामृतस्वरूपा त्वं हे अक्षरे उपचयापचयपरिणामरहीने नित्ये
जन्मविनाशरहिते एतेन सन्मात्रस्वरूपत्वमभिप्रैति त्रिधा त्रिप्रकारा या मात्रा ह्रस्वदीर्घप्लुता अकारोकारमकाररूपा
विश्वतैजसप्राज्ञाभिधेयास्तदात्मिका तत्स्वभावा त्वं या चार्धमात्रा व्यंजनरूपा नित्यापरिणामादिरहिता विशेषतो मात्रा

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका सुधा त्वमक्षरे नित्ये त्रिधा मा
त्रात्मिका स्थिता ५४ अर्धमात्राश्रिता नित्या यानुच्चार्या विशेषतः ५५॥

त्रयवैलक्षण्येनानुच्चार्या वेदांतवाक्यार्थलक्षणशक्तिरूपा लोके स्थिता सापि त्वमेव एतेन प्रणवरूपा त्वमसीति वि
वक्षितं तथा चाह दत्तात्रेयेणाप्युक्तं अकारश्च तथोकारो मकारश्चाक्षरत्रयं एता एव त्रयो मात्राः सत्त्वराजसतामसाः निर्गु
णा योगिगम्यान्या चार्धमात्रा च संस्थिता गांधारीति च सा ज्ञेया गांधारस्वरसंश्रया पिपीलिकागतिस्पर्शा प्रयुक्ता मूर्ध्नि ल
क्ष्यते मात्रा चार्धं तथा प्रोक्तं विज्ञेयाः परमार्थतः व्यक्तात्तु परमा मात्रा हि द्वितीया, व्यक्तसंज्ञिता मात्रात्तृतीया विच्छक्तिरहंमा
त्रापरं पदमिति ह्रस्वात्तु परमा मात्रा हि द्वितीया दीर्घसंज्ञिता तृतीयात्तु प्लुतार्धाख्या वचसः सा न गोचरेति च ५५ ॥

साविद्रीमथ्याहूतंस्यादेदेवियोतनयीलेपराप्रकृष्टाजननी अतराहिजननीक्वचित्कदाचित्किंचिदेवजनयति त्वंतु
तथासर्वजननीत्वादित्यर्थः देवजननीतिपाठे देवानांमातादितिस्त्वमेवेत्यर्थः अंतेप्रलयसमये अत्सिभक्षयसि अत्स
मात्स्कतोषीत्यर्थः नकेवलंसृष्ट्यादिकर्तृत्वरूपात्वमपितुसृष्ट्यादिक्रियारूपापित्वमेवेत्याह ५८ विसृष्टौसृष्टिकालेपालने
स्थितिकाले अंतेप्रलयकाले सृष्टिस्थितिसंहाररूपत्वमेवदेजगन्मयेजगद्रूपिणि मयप्रत्ययोजगच्छब्दात् डिम्भाग्नि
तिसूत्रेणाटीप्प्रत्ययएवप्राप्नोतिनटाप् तथापिबाहुलकात्प्रत्ययः अथवामयगतावित्यस्माद्धातोः जगंतिमयंतेत्वा
यंतेस्याः अथवाजगतोमयःप्रदेपोस्यामिति डुमिञ्प्रक्षेपणे इत्यस्माद्धातोर्निष्पादनीयंजगद्विकाररूपंतद्भूतेविकारेम

त्वमेवसंध्यासावित्रीत्वंदेविजननीपरा त्वयैतद्धार्यतेविश्वंत्वयैतत्सृज्यतेजगत् त्वयैतत्पाल्यतेदेवित्वमत्स्यं
तेचसर्वदा ५८ विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने तथासंहृतिरूपांतेजगतोस्यजगन्मये ५०
महाविद्यामहामायामहामेधामहास्मृतिः महामोहाचभगवतीमहादेवीमहासुरी ५८॥

यद्वइतिवा ५० महतीसर्वविषयात्तत्त्वमसीत्यादिमहावाक्यजन्यावा विद्यामहाविद्या महतीसच्चिदानंदरूपेजीवा
त्मनिसंसाररूपानर्थावभासहेतुरूपामायामहामायामूलविद्येतियावत् महामेधा सर्वावधारणक्षमाधीःसर्वज्ञ
प्राक्तिरित्यर्थः स्मृतेःमन्वादिप्रणीतात्प्रादपिमहतीमहास्मृतिः वेदविद्येतियावत् महतोनानाविधसंसाररूपस्यमो
हस्यनिमित्तत्वान्महामोहा ऊलविद्येत्यर्थः भवतीत्वं महतामिंद्रादीनांस्वाधिकारपालनेरूपादेवीमहादेवी म
हतोमधुकैटभहिरण्याक्षाद्यसुराणांसामर्थ्यातिशयरूपत्वान्महासुरी नहितेषामीदृशंसामर्थ्यंस्वाभाविकं

स॰
प्र॰टी॰
५९

येनभगवानपिपराजितइवतेभ्योमोहंस्वस्वरूपभूतंदत्तवान् तस्माद्येनसामर्थ्यातिशयेनब्रह्मादिनाभगवंतंप्रसाद्य
संसारान्निवर्त्तते तादृशंसामर्थ्यंभगवतीस्वरूपात्मकमेव केचित्तुमहादेवीमहासुरी पदयोरेकार्थत्वमंगीकृत्यस्तुत्य
र्थत्वात्पौनरुक्त्यंनदोषायेति वदंतितच्चिंत्यं उक्तरीत्याभिन्नार्थत्वेदोषाभावात् ५८ प्रकर्षेणकरोतीतिप्रकृतिः बहु
१ लाधिकारत्वात्कर्त्तरिक्तिन् ॥ गुणादिकोवापरमाण्वादीनांमूलकारणत्वनिश्चयार्थोहिप्राहुः सत्त्वरजस्तमोलक्ष
णं गुणत्रयंविभावयितुंशीलमस्याः कालेनमरणेनोपलक्षितारात्रिः कल्पांतरात्रिरित्यर्थः महत्ईश्वरस्यरात्रिः म॰
हाप्रलयरूपारात्रिः जीवानांतुब्रह्मस्वरूपावरणलक्षणरूपारात्रिर्मोहरात्रिरपित्वमेव ब्रह्मसत्तानातिरिक्तेनापिपरि

प्रकृतिस्त्वंहिसर्वस्यगुणत्रयविभाविनी कालरात्रिर्महारात्रिर्मोहरात्रिश्चदारुणा ५९ ॥ त्वं
श्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धिर्बोधलक्षणा लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिःक्षांतिरेवच ६०

दृष्टेनप्रकाशतेइतिकालरात्रिर्दारुणा ५९ श्रीःलक्ष्मीःसंपद्वाह्रीःकरणीयवैमुख्यंबुद्धिःअंतःकरणंबोधलक्षणाअ
ध्यवसायव्यापाररूपा लज्जा कृतेकरणीयेवापरज्ञानशंकयादुःखं केचित्तुह्रीलज्जयोःसमानार्थत्वेनपौनरु
क्त्यभिया ह्रीशब्दंमंत्राक्षरपरतयाव्याचक्षते पुष्टिःउपचयः तुष्टिःसंतोषःशांतिःअंतरिंद्रियनिग्रहरूपा क्षांतिः
शक्तौसत्यांपरकृतापकारसहिष्णुता एकस्याअनेकस्वरूपत्वासंभावनानकर्त्तव्या, संख्याशक्तित्वादित्येवकारार्थः ६०॥

५

प्रशस्ता गदा विद्यते यस्याः सा गदिनी चापिणी धनुष्मती बाणेत्याकारांतपाठे अर्शआदिभ्योजिति सूत्रेण मत्वर्थीय
मच्प्रत्ययमानीय प्रशस्ता बाणा यस्याः संति सा बाणेति साधनीयं बाणभुशुंडीपरिघायुधेत्येकपदं वा क्वचित् तदा बा
णाः शराः भुशुंडी भुषुंडी गजशुंडाकृति शस्त्रविशेषः पृषोदरादित्वाहूकारस्य ह्रस्वत्वं परिघा लोहमुद्गराः आयुधा
नि यस्याः सा बाणभुशुंडीपरिघायुधा ८१ सौम्यवदाह्लादकत्वात्सौम्या सौम्यतरा अत्यंतमनोहरा स्वर्गादेकत्वात् अशेषसौ
म्येभ्यः सकलाह्लादकेभ्यः अतिसुंदरी आधिकमनोहरा निर्वाणरूपत्वात् परापराणां ब्रह्मादीनां परा प्रकृष्टा मामाया मोहन

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ८१ सौम्या सौम्यत
राशेषसौम्येभ्यस्त्वतिसुंदरी परापराणां परमा त्वमेव परमेश्वरी ८२ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिला
त्मिके तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ८३ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् सोपि नि
द्रावशं यातः कस्त्वां स्तोतुमिहेश्वरः ८४ विष्णुः शरीरग्रहणमहमीशान एव च कारितास्ते यतोतस्त्वां कः
स्तोतुं शक्तिमान्भवेत् ८५

शक्तिर्यस्याः सा परमा परमा पराणां ब्रह्मादीनामपीश्वरी नियंत्री ८२ सद्वर्तमानं असद
तीतानागतं यद्वस्तु तस्य शक्तिः स्वभावः सामर्थ्यं वा सा त्वमेव यदा तदा किं स्तूयसे कस्यापि स्तुतिविषया न भवती
त्यर्थः ८३ ईश्वरः जगत्सृजति सद्रूपेण पाति विष्णुरूपेण भक्षयति रुद्ररूपेण सोपि यया निद्रावशं नीतः तादृशीं त्वां
स्तोतुं कः समर्थः न कोपीत्यर्थः ८४ न तु ब्रह्मादयः कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थाः स्तोष्यंत्येवेत्याशंक्य तेपि त्वद
धीनसामर्थ्या इत्याह विष्णुरिति अहं ब्रह्मा ईशानो रुद्रस्ते त्वया शरीरग्रहणं कारिता अवतारं विधापिताः ८५ ॥

स॰ प्रा॰ टी॰ १० सा सर्वोक्तस्वरूपा त्वं हे देवि इत्थमेवं विधैः प्रभावैः स्वैरुपचारैः सर्वोत्कृष्टैर्माहात्म्यैरुदारैः संस्तुता सती विश्वं व्याप्य स्थि
तावतः से अतः कारणादेतौ अनायेषां दुराकलनीयौ मधुकैटभावसुरौ मोहय मोहं प्रापय ८६ एतौ हन्तुं अध्यवसाय
लक्षणो बोधश्चास्य जगत्स्वामिनः क्रियतां अथ मच्युतः श्रीवासुदेवो जगत्स्वामी लघु शीघ्रं प्रबोधं नीयतां नीयतादेः
प्रकाशयतां कर्म देवनागरस्य यथा स्यात्तथेरितं तथा बुद्धिं प्रापय ८७ तामसी निद्राकारपरिणता विष्णुशक्तिः तदु
क्तं अव्यक्ता तामसी शक्तिरविद्यापर्यायतो हरा यथाच्छादितलोकोयं पश्यन्नपि न पश्यति वेधसा ब्रह्मणा साता

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ८६ प्रबोधं च जगत्स्वामी॰
नीयतामच्युतो लघु बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ८७ ऋषिरुवाच ॥ एवं स्तुता तदा देवी ताम॰
सी तत्र वेधसा विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ८८ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ८९ ॥

तामसी केवलं देवी एवमुक्तप्रकारेण स्तु ता विष्णोः प्रबोधनार्थाय
मधुकैटभौ निहन्तुं तामसी केवलतमोगुणाश्रया ८८ पूर्वश्लोकस्य विष्णोरिति पदमनुषज्य विष्णोर्नेत्रादिभ्यो
निर्गम्य ब्रह्मणो दर्शने चक्षुर्विषये तस्थ देवीत्यनुषज्यते पूर्वश्लोका॰॰ नेत्रादीनां प्राण्यंगत्वेपि इतरेतरयोगः
छांदसः दधिपयआदिमध्यपाठाद्धैकवद्भावो न भवति स्तनयोः प्रादेशेऽश्लतिनिर्देशेन प्राण्यंगत्वं तेनैकवद्भावानि
त्यत्वज्ञापनाद्धानदोषः हृदयं मनः श्रोत्रं नकेनापि प्रमाणेन व्यज्यते स्वरूपकाशत्वादित्यव्यक्तं ब्रह्म तस्माज्जन्मय १०



अहिशायनात्सर्पजल्पात् उत्सृज्येत्यन्वयः स जगन्नाथस्तावसुरौ ददृशे तावपि भगवंतं ददृशाते इति परस्परकर्मता
लक्षणं कर्मव्यतिहारात्मकात्मनेपदप्रयोगाल्लभ्यते चकारद्वयेन दर्शनोत्पत्त्योस्तुल्यकालत्वं द्योत्यते ७० मधुकैट-
भाविति नवाक्षरमुत्तरणं छांदसः वीर्यमुत्साहः पराक्रमः प्रभावातिशयः ब्रह्माणं अत्तुं अशितुमारब्धयत्नौ ७१ पंचवर्ष
सहस्राणीत्यत्यंतसंयोगे द्वितीया बाहव एव प्रहरणानि यस्य हननसामर्थ्ये सत्यपि लीलया युद्धं कृतवान् बहुकालमि
ति विभुरित्यनेन सूच्यते ७२ अस्मत्त इति पंचमी द्विवचने तसिल् सर्वप्रातिपदिकविहितः पंचम्यास्तसिलिति सूत्रविहि-

उत्सृज्य च जगन्नाथस्तया मुक्तो जनार्दनः एकार्णवेऽहिशायनात्ततः स ददृशे च तौ ७० मधुकैटभौ दुरात्माना
वतिवीर्यपराक्रमौ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ७१ समुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः
पंचवर्षसहस्राणि बाहुप्रहरणो विभुः ७२ तावप्यतिबलोन्मत्तौ महामायाविमोहितौ उक्तवंतौ वरोऽस्मत्तो
व्रियतामिति केशवं ७३॥ श्रीभगवानुवाच॥ भवेतामद्य मे तुष्टौ मम वध्यावुभावपि किमन्येन वरे
णात्र एतावद्धि वृतं मया ७४॥

तस्तु किं सर्वनामबहुभ्यो त्यादिभ्य इति नियमेनास्मच्छब्दान्न प्राप्नो
ति आवाभ्यां वर इष्टो व्रियतामित्युक्तवंतौ ननु अस्मद्धस्त एवायं करिष्यतीति ताभ्यां कथं न तर्कितमित्याशंक्याहा
माह महामायाविमोहिताविति अतिबलोन्मत्तौ मोहेन चात्यंतमुन्मत्तौ मोहविशात् अस्मत्तो वरः प्रार्थ्यतामिति केशवं उ
क्तवंतः ७३ भवेतां यदि मे तुष्टौ प्रसन्नौ तदा मम वध्यावुभावद्य भवेतां अत्र एतावदित्यविवक्षितत्वान्न संधिः द्वि
प्राह्वावपारणे एतावदेव मया वृतं अन्येन वरेण किं ममेत्यर्थः ७४ ॥

स॰ प्र॰ टी॰ ११

इतिपूर्वोक्तप्रकारेणवंचिताभ्यांताभ्यांसर्वंजगत् आपोमयंजलव्याप्तंविलोक्यभगवानादितउक्तः नन्वविकारेर्थे
नित्यमेकाचोमयडिति मयट्प्रत्ययेसति अम्मयमितिभाव्यं कथमापोमयंइतिचेत् न आपस्प्राहुःसकारांतो
पिजलवाचीतिश्रुति आपोहिष्ठामयोभुवः आपोभिर्मार्जनंकुर्यात् आपोमयमिदंसर्वं त्वमापोमूर्तिः त्वमंतःस
र्वभूतानामंतश्चरसिसादिवत् इत्यादिप्रयोगदर्शनादितिसूक्ष्मः आप्लृव्याप्तौ इत्यस्मादसुन्प्रत्ययांतान्मयट्प्रत्य
यमानीयसाधयंतिकेचित् अथवामयट्सायामित्यस्मादप्रत्ययेसति तत्समासानंतरं अप्मयमितिरूपं अ
स्मिन्पक्षेसर्वंजगदापइतिविलोक्य अप्मयं अर्दिसनं यथास्यात्तथाकमलेक्षणोगदितइत्यर्थः अप्मयंविस्तृमयं

ऋषिरुवाच॥ वंचिताभ्यामितितदासर्वमापोमयंजगत् विलोक्यताभ्यांगदितोभगवान्कमलेक्षणः
७५ मधुकैटभावूचुः प्रीतौस्वस्तवयुद्धेनश्लाघ्यस्त्वंमृत्युरावयोः आवांजहिनयत्रोर्वीसलिलेनपरिप्लुता ७६

जगदापइतिविलोक्यगदितइतिवायोजनीयं किंगदितइत्यपेक्षायामाह ७५ तवयुद्धेनसंतुष्टौस्वःभवावः
स्वइति लडुत्तमपुरुषद्विवचनेअसभुवीत्यस्यरूपं श्लाघ्योवद्रूपः त्वदितिपंचम्येकवचनंत्वत्तइत्यर्थः देवका
ष्टमोगर्भःममेमृत्युर्भविष्यतीति हरिवंशपाठदर्शनबलेनत्वमिति प्रथमांतत्वे प्रयोग
दर्शनस्यनियामकत्वात् प्रथमांतलक्षणापत्तेरावश्यकत्वात्सा गतौतदंगीकारस्यन्याय्यत्वाच्च पृथिवी
यत्रसलिलेनव्याप्तानभवति तत्रावांघातय सर्वत्रजलमेवदृष्टमितिकुलेनोक्तंयत्रांभोनास्ति तत्रावांव्यापादयेत्यर्थः ७६

११

तथेत्युक्त्वा तयोर्वचनमंगीकृत्य जघने सक्ति हृदयमूले कृत्वा तयोः शिरसी छिन्ने इत्यन्वयः देहस्य पार्थिवत्वाज्जघनमपि पृथि
व्येवेति तयोर्वचने कृतमेवेति मंतव्यं अस्मिन्मूलाके ऋषिरुवाचेत्युक्ति रूपसंदर्शनाभिप्रायेण पूर्वप्रवर्त्तमानकथाभिप्रायेणेति
वाक्यभेदान्वयेन कृतं शंखचक्रगदाभृता नारायणेन तथेति निर्जले देशे निष्यामीत्युक्त्वा तयोः शिरसी जघने कृत्वा कोऽपि
यावच्चक्रेण छिन्ने सुदर्शनेन छिद्यते स्म परमप्रकृतमुपसंहरति ११ प्रभावं स्वेच्छाकृतं जन्म ते तुभ्यं यथा देवी नित्यापि ब्र
ह्मणा स्तुयमं संस्तुता सती समुत्पन्ना अस्या देव्याः पुनरपि प्रभावं वदामि १८ सावर्णिर्भवं सावर्णिः अथवा सादित्वात् ठञ्
सावर्णिरेव सावर्णिकः तस्येदं सावर्णिकमिति वा तत्संज्ञके ऽन्यस्मिन्मधुकैटभवधोयं प्रथमो भूदिति शिवं इति श्रीरामा

ऋषिरुवाच॥ तथेत्युक्त्वा भगवता शंखचक्रगदाभृता कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ११ एवमेषा
समुत्पन्ना ब्रह्मणा संस्तुता स्वयं प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते १८ इति श्रीमार्कंडेयपुराणे साव
र्णिके मन्वंतरे देवीमाहात्म्ये मधुकैटभवधो नाम प्रथमोध्यायः १ ऋषिरुवाच॥ देवासुरमभूद्युद्धं पूर्णम
ब्दशतं पुरा महिषेऽसुराणामधिपे देवानां च पुरंदरे १॥

श्रमविरचितायां देवी माहात्म्यटीकायां प्रथमो
ध्यायः १॥ भूयः शृण्वित्यभिहितं तदेवेतिहासमवतारयति देवाश्चासुराश्च प्रद्वंद्विनो विग्रहं ते यस्मिंस्तत् देवासुरं
युद्धमन्वयीय च प्रत्ययेन साधनीयं अथवा देवासुराणामिदं देवासुरमित्यण्प्रत्यये साधनीयं अस्मिन्पक्षे हद्वभाव छां
दसः परपदवृद्धिर्वा छांदसी अथवा देवैः सहासुरं देवासुरं देवासुरं प्रभूतमित्यंत संयोगे द्वितीया असुराणामधिपे
राजनि महिषे देवानां च पुरंदरे अधिपे सतीति काकाक्षिवदुभयत्राधिपपदं योजनीयं॥ यद्धान्यकृतटीका पू
र्वकल्पांतरे पूर्णमब्दशतं देवासुरं युद्धमभूत् दिव्यवर्षशतं देवासुरसंग्रामो भूत् १॥

स॰ तत्र युद्धे इंद्रः स्मरणात् महाबलैरसुरैर्देवसैन्यं पराजित्य महिषासुरः सकलान्देवानिंद्रोभूत् इंद्रराज्यं प्राप्तवानित्यर्थः २
म टी॰ पद्मयोनिं ब्रह्माणं प्रजापतिमिति तस्य विशेषणं ईशो रुद्रः ततोनंतरं भग्ना देवाः ब्रह्माणं पुरस्कृत्य यत्र हरहरी तत्र
जग्मुः ३ यथावृत्तं यथाभूतं तयोरीशगरुडध्वजयोः तद्वत्तथैव देवाः देवाभिभवस्य विस्तरो यत्र चेष्टिते महिषा
१२ सुरचेष्टितं यथावृत्तं स्मरंतयोः पुरस्तात्तद्वत् तथा देवाभिभवविस्तरं च कथयामासुः महिषासुरेण यत्कृतं तत्स

12

तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं॥ जित्वाच सकलान्देवानिंद्रोभून्महिषासुरः २ ततः पराजिता देवाः
पद्मयोनिं प्रजापतिं पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ३ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितं त्रिद
शाः कथयामासुर्देवाभिभवविस्तरं ४ सूर्येंद्राग्न्यनिलेंदूनां यमस्य वरुणस्य च अन्येषां चाधिकारान्स
स्वयमेवाधितिष्ठति ५ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि विचरंति यथा मर्त्या महिषेण दुरात्म
ना ६ एतद्वः कथितं सर्वममरारिविचेष्टितं शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिंत्यतां ७ ॥

र्वं देवानां च पराभवं विस्तीर्णं कथयन् ४ स महिषासुरः अधितिष्ठति करोति हे देवौ सोसुरः सूर्यादीनामन्येषां च देवानां
व्यापारान्स्वयमेव करोति सर्वेषां देवानां कर्तव्यं स एव कुरुते ५ दुष्टेनेकदोषयुक्ते देहे आत्मबुद्धिर्यस्य स दुरात्मा तेन नि
ष्कासिताः संतो भुवि पृथिव्यां यथा मर्त्यास्तथा चरंति ६ वदति गुरुत्वादेकस्मै बहुवचनं प्रपन्ना आगताः स्मः भवामः हे देवौ
एतत्सर्वं महिषासुरवृत्तं वां युवयोः पुरः कथितं वयं युवां शरणं प्रपन्नाः तस्य महिषासुरस्य वधो विशेषेण चिंत्यतां ७॥

भ्रुकुटीर्ललाटवक्रता तया कुटिले आनने ययोः भ्रुवः कुटी पृषोदरादित्वाद्ध्रस्वता भृकुटीति वा पाठः तदापि पृषोदरादिरेव
अमुना प्रकारेण देवानां वचांसि श्रुत्वा श्रीकृष्णो महेश्वरश्च कोपं चकार ८॥ चक्रिणो विष्णोस्तत इत्यत्र सार्वविभक्तिकस्त-
सिः षष्ठीबहुवचने वा तसिः तेषां वदनादित्यर्थः ब्रह्मणः शंकरस्य वदनादित्यनुषज्यते वासुदेवस्य ततः तस्माद्वदनात् श-
करस्य ब्रह्मणश्च सुमहत्तेजो निर्गतं ९ तत्तेजः ऐक्यं एकभावं समगच्छत् आप्नोत् समगच्छतेत्यात्मनेपदं समो गम्यृ-
च्छीत्यादे कमकविषयत्वात् अथवा एकमेवैक्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् एकं समगच्छत अभवदित्यर्थः तदान्येषामपि

इत्थं निशम्य देवानां वचांसि मधुसूदनः चकार कोपं शंभुश्च भ्रुकुटीकुटिलाननौ ८ ततोऽतिकोपपूर्णस्य च-
क्रिणो वदनात्ततः निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ९ अन्येषां चैव देवानां शक्रादीनां शरीरतः नि-
र्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत १० अतीव तेजसः कूटं ज्वलन्तमिव पर्वतं ददृशुस्ते सुरास्तत्र ज्वालाव्या-
प्तदिगन्तरं ११ अतुलं तत्र तत्तेजः सर्वदेवशरीरजं एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा १२॥

शक्रादीनां शरीरतः सुमहत्तेजो निर्गतं तत्तेज ऐक्यं राशितां प्राप १० ते देवास्तत्र अतीव तेजसः कूटं शिखरमद्राक्षुः
उच्चैस्त्वाज्ज्वलन्तमिव पर्वतं ज्वालाभिर्व्याप्तानि दिगन्तराणि येन तत् ११ तत्र पुराणान्तरप्रसिद्धे कात्यायनाश्रमे एक-
स्थं एकाकारेण स्थितं तदित्यव्ययमानेन तत्तेजो नारी अभूत् नार्याकारेण परिणमत त्विषा व्याप्तं लोकत्रयं येन ॥ तत्र
तस्मिन्नवसरे तत्सर्वदेवशरीरजमनुपमं तेजोऽभवत् पश्चात्तत्तेज एकस्थानस्थितं राशीभूतं सत् नारीभूतमभूत्
तदा सर्वं तेजोमयमभवदित्यर्थः १२॥

स॰ श॰ टी॰ २१

णं शांभवं यो वंतदित्यव्ययं तस्यादित्यर्थः अन्यथा मुखस्य शाह्वेन समासं प्राप्त तच्छब्दः केशादिभिर्न संबध्यते याम्येन यमसं
बंधिना यस्य तेजसा नार्थाये, वयवाश्च भूवं स्नानाद् शांभवतेजसा तस्या मुखमजायत याम्येन केशाः विष्णुतेजसा बाहवो ज
यंतबलेन तावद्बहुसंस्थितं तत्र बलिनः श्रीकृष्णस्यैव जाग्रदीति १२ सौम्येन चांद्रमसेन तेजसा जंघो विंति शाणं गत्वादेक
वद्भावः दीर्घताम्वेकवद्भावे वैदिकतया समर्थनीयेति केचिदाहुस्तच्चिंत्यं द्वंद्वे जंघोरुपादस्य गुरुत्वेन पूर्वनिपातः स्या
त् नचवाच्यं लक्षणहेतोरिति ज्ञापकात् पूर्वनिपातानियम इति गतिसंभवो हि पूर्वनिपातानियमायनस्य
दीर्घताया छांदसत्वात् अयनस्य वान्याय्यत्वात् जंघे तिनात्यभिप्रायेणैकवचनं ऊरू इति व्यक्त्यभिप्रायेण द्विवचनं वा

यदभूच्छांभवं तेजस्तेनाजायत तन्मुखं याम्येन चाभवन्केशा बाहवो विष्णुतेजसा १३ सौम्येन स्तनयोर्यु
ग्मं मध्यमैंद्रेण चाभवत् वारुणेन च जंघोरू नितंबस्तेजसा भुवः १४ ब्रह्मणस्तेजसा पादौ तदंगुल्योर्कते
जसा वसूनां च करांगुल्यः कौबेरेण च नासिका १५॥

रूपेण तेजसा जंघा॰ भवत् ऊरू नितंबश्चेति भुवस्तेजसेति वारुणेन चेति चकारोप्येवं सति सार्थको भवति जंघास
हिते ऊरू जंघोरू तस्यापि योजयति नितंबः कटीपरिभागः सौम्येन तेजसा स्तनयोर्युग्मं जज्ञे ऐंद्रतेजसोदरमभवत् वरुणते
जसा जंघा च ऊरू चाभूतां भुवस्तेजसा नितंबोभवत् १४ तदंगुल्यः पादांगुल्यः वसूनां तेजसस्त्वनुषज्यते करांगुल्यः बाहव
इति बाहूनां बहुत्वाभिधानेन कराणामपि बहुत्वं लक्ष्यते बाहू करयोः पूर्वापरभागेन संलग्नतया सर्वाधारत्वात् कौबेरेणेति
ज॰ तेषु सत्स्वनुषंजनीयं ब्रह्मणस्तेजसा पादौ जातौ अर्कतेजसा तयोः पादयोरंगुल्यो जातिर्वसूनां तेजसा करांगुल्योभवन् नासा कुबेरस्य

तेजसाभवत् १५॥

२१

दक्षादिप्रजापतीनां तेजसा पावकोग्निस्तस्य तेजसा जज्ञे जातं आद्यब्रह्मणो व्यतिरिक्ताः प्रजापतयः संति तेषां तेजसा
देव्या दंता जाताः नयनत्रितयमग्नितेजसा १६ प्रातःसायंसंध्ययोस्तेजः भ्रुवावभूतां करणभूतस्य तेजसः कर्तृत्वविव
क्षया `` नञ्जीतिवत् श्रवणौ श्रवणेंद्रिययुक्तौ प्रदेशौ श्रवणशब्दान्नपुंसकलिंगाद्दर्शआदित्वादच् केचित्तु श्रुतिक
र्णौ तौ विवक्षितौ तेनटादिविहितल्युडंतत्वेन पुंलिंगोयं श्रवणशब्दो ब्रह्मन्यावद्वदितिवदंति पुंनपुंसकयोः कर्णः श्रवणः
श्रवणं श्रुतावितिहेममालिकोपणात् `` संध्यानेन पुंलिंगेपि समर्थयितुं शक्यते अनिलस्य तेजः श्रवणावभूता

तस्यास्तु दंताः संभूताः प्राजापत्येन तेजसा नयनत्रितयं जज्ञे तथा पावकतेजसा १६ भ्रुवौ च संध्ययोस्तेजः
श्रवणावनिलस्य तु अन्येषां चैव देवानां संभवस्तेजसां शिवा १७ ततः समस्तदेवानां तेजोराशिसमुद्भवां
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः १८॥

मितियोजयंति अन्येषां वायुनासत्यविश्वकर्मप्रभृतीनां दे
वानां यानि तेजांसि तेषां संभवः कार्यं शिवा दुर्गा स्वरूपमेव संध्ययोस्तेजसा भ्रू रूपेण परिणतं वायोस्तेजः श्रवणरूप
मभवत् अन्येषामपि देवानां शिवा प्रोक्तेतरसर्वावयवाजनि १७ मुदं चित्तोल्लासं महिषासुरेण पीडिताः ननु एवं सि
न्ध्याये ब्रह्मादीनामपि देव्यधीनतोक्ता अत्र समस्तदेवतेजसा देव्याः संभव उच्यत इति विरोध इति चेन्न अत्रापि तत्तेज
सा तत्तदवयवावयविमात्राभिधानतात्पर्यात् ततोनंतरं तां परां शक्तिं समस्तदेवानां तेजोराशिसमुद्भवां विलोक्य मु
दं लेभिरे महिषासुरेण पीडिताः भगवत्याः समुत्पन्नया महिषासुरवधः क्रियत इत्यर्थे जहृषुः ॥१८॥

स·
प्रा·टी·
२८

विनिष्कृष्योत्पाद्य पिनाकधृत् रुद्रः ततोनंतरं देव्यां मूर्तौ संपन्नायां देवा महर्षिप्रभृतयः स्वानि स्वान्यायुधानि तस्यै प्रदिषान् तदेव विवृणोति शूलं शूलादित्यादिना १९ स्वचक्रतः स्वसुदर्शनात् समुत्पाद्य जनयित्वा समुत्पाद्येति वा पाठः एवमुत्तरत्रापि वरुणः शंखं दत्तवानित्यनुषज्यते कृष्णः स्वचक्रतः प्रकटीकृत्य तस्यै सुदर्शनमदात् वरुणः शंखं ददौ वह्निः शक्तिं दत्तवान् २० चापं धनुः बाणपूर्णे शरत्रयवाणे इषवो बाणा धीयंते स्यां प्यंते यथोक्तौ इषुधी तूणौ कौ पृथिव्यां लिषति अल्पीभवतीति कुलिशं लिश अल्पीभावे इत्यस्मादिगुपधज्ञाप्रीकिरः क इति कप्रत्यये रूपं अयः।

ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधान्यपि शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृत् १९ चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः २० मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी वज्रमिंद्रः समुत्पाद्य कुलिशादमराधिपः २१ ददौ तस्यै सहस्राक्षो घंटामैरावणाद्गजात् कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ २२॥

वा कुलेष्ववहस्ते शेते इति कुलिशं शीङ् स्वप्ने इत्यस्मादन्येभ्योपि दृश्यत इति डप्रत्यये सति रूपं कुलिः स्यात्करसंज्ञयोरिति कुलिशं हस्तस्य हस्तवाचित्वं स्मर्यते वायुस्तस्यै चापं बाणपूर्णे इषुधी च दत्तवान् देवेंद्रः कुलिशात्समुत्पाद्य वज्रं ददौ २१ सहस्राक्षः इंद्रः देवभेदाद् इतो पुनरुपादानं न दोषाय एवमुत्तरत्रापि इरा नि[illegible] विशेषो विद्यते यस्मिन् स इरावान् समुद्रः इरावति भवः ऐरावतः इंद्रहस्ती तस्मात् कालदंडात्समुत्पाद्येत्यनुषज्यते पूर्वश्लोकात् इंद्रो गजात्तस्यै घंटां ददौ यमः कालदंडादुत्पाद्य दंडं ददौ वरुणः पाशं ददौ २२॥



ब्रह्माक्षमालां कमंडलुं च ददावित्यन्वयः प्रजापतिरिति ब्रह्मणो विशेषणं ब्रह्माक्षमालां कमंडलुमिति वामनपुराणद
र्शनात् प्रजापतिर्विराट्स्वरूपः विश्वकर्मा जपमालिकामदात् अयो ब्रह्मा पितामहः कमंडलुं ददौ सूर्यः समस्तरोमकूपे
षु निजरश्मीन् दत्तवान् २३ कालो विशेषाद्यभिमानिनी देवता तस्या इति स्मरणमात्र समीहया षष्ठी रजकस्य वस्त्रं ददाति
द्यूतपृष्ठं ददातीतिवत् एवं सति ददातिरर्पणे वर्तते अथवा अथातो ब्रह्मजिज्ञासा अथातो धर्मजिज्ञासेत्यत्र समासांतर्गता
षष्ठी यथा चतुर्थ्यर्थे फलति तथात्रापि श्रूयमाणा षष्ठी एकमात्रं षष्ठ्यर्थाः इति न्यायेन चतुर्थ्यर्थे फलिष्यतीति वयं ब्रूमः क्षी
रोदसी वा चतुर्थ्यर्थे षष्ठी तस्य खड्गस्य अस्त्राः साति प्रायं अनुरूपं चर्म दत्तवान् आ इति साति प्रायो व्ययं तस्यै चर्मेति चतुर्थ्यतः पा

प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुं समस्तरोमकूपेषु निजरश्मीन्दिवाकरः २३ कालश्च दत्तवान्खड्गं तस्यै
चर्म च निर्मलं क्षीरोदश्चामलं हारमजरे च तथाम्बरे २४ चूडामणिं तथा दिव्यं कुंडले कटकानि च अर्धचंद्रं तथा
शुभ्रं केयूरान्सर्वबाहुषु २५ नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमं अंगुलीयकरत्नानि समस्तास्वंगुलीषु च २६

दः क्वचित्पाठ आगममेव क्षीरोदः समुद्रः न जीर्यत इत्यजरे वस्त्रे कालो यमराजस्तस्यै खड्गं निर्मलं खेटकं च क्षीरोदश्चाम
लं हारं अनुपे वाससी च ददौ २४ कटकानि वलयानि केयूराणि गदानि दिव्यं चूडामणिं कुंडले कर्णाभरणे तथा शु
भ्रमर्धचंद्रं तिलकार्थं २५ नूपुरौ हंसकौ ग्रैवेयकं ग्रीवाभरणं न विद्यते उत्तमं यस्मादित्यनुत्तमं अंगुलिभूषणानुरत्ना
नि जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते इति रत्नशब्दो मुख्यत्ववाची अनुत्तमं कंकणाभरणं समस्तास्वंगुलीषु
प्रधानांगुलीयकानि पत्तानि क्षीरार्णवो ददौ २६॥

स॰
श॰टी॰
१५
15

अनेकरूपाणि बहुप्रकाराणि अभेद्यं भेत्तुमशक्यं दंसनं कवचं छुरामयादिकं विश्वकर्मा ददावित्यन्वयः विश्वक-
र्मा तस्यै अतिनिर्मलं परशुं नानाविधान्यायुधानि अभेद्यं कवचं चैतानि दत्तवान् २७ अम्लानानि म्लानिहीनानि पंकजा-
नि यस्यां अददिति ददाविति ददानेऽत्यस्य रूपं परस्मैपदं छान्दसं धातोरात्मनेपदित्वात् जलधिस्तस्यै विकस्वरारविंद-
मालां शिरसि तथापरां हृदये मालामददात् ददातिस्म तथा शोभनं पंकजं च ददौ २८ सुरया मद्येन अशून्यं पूरितं हि-
मालयः सिंहं वाहनं ददौ तथा विविधानि रत्नानि च ददौ तथा धनदः सुरया अशून्यं मद्यपूर्णं पानपात्रं सौवर्णं ददौ २९

विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलं अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंसनं २७ अम्लानपंकजां मालां शि-
रस्युरसि चापरां अददज्जलधिस्तस्यै पंकजं चातिशोभनं २८ हिमवान्वाहनं सिंहं रत्नानि विविधानि च ददा-
वशून्यं सुरया पानपात्रं धनाधिपः २९ शेषश्च सर्वनागेशो महामणिविभूषितं नागहारं ददौ तस्यै धत्ते
यः पृथिवीमिमां ३० अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा संमानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ३१

मणिभ्यो महान्महामणिः नागलोके भवो नागहारस्तं नागपुष्पहारः नागोदास्तवमालावन्ती वा धत्ते धारयति इमां पं-
चाशत्कोटियोजनविस्तीर्णत्वेन प्रसिद्धां यः इमां पृथिवीं धत्ते सर्वेषां सर्पाणामीशः शेषः नागहारं नागाकृ-
तिहारविशेषं ददौ ३० सम्मानिता मानिता सत्युच्चैः उदात्तस्वरेण महाट्टहाससहितं यथा स्यात्तथा ननाद नादं कृत-
वती अट्टहासं च पुनः पुनश्चेत्यर्थः अट्टहासः अतिहसितं इति कारः सा देवी अन्यैरपि सुरैर्भूषणैरायुधैश्च सम्मा-
निता सती अत्यर्थं अट्टहासपूर्वं गर्जतिस्म ३१

१९

घोरेण भयानकेन नभ आकाशं कृत्स्नमशेषमापूरितं व्याप्तं मीयतेऽनेनेति मा परिमाणं तां यता गच्छता न मायता अमा
यता अपरिमितेनेत्यर्थः अथवा अमा रविरश्मिविशेषः तां यता गच्छता स्पृशतेति यावत् अमा नाम रवेरश्मिः सूर्यलोके
प्रतिष्ठित इति स्मरणात् यद्वा अमायता सह गच्छता अर्थाद् दृष्टासेन अमा सह समीपे वेत्यभिधानात् यद्वा मानं मायाः
मायातो वर्जि आतोऽनुपसर्गेति घञ्गमेव कृते माय इति निष्पद्यते न विद्यते मायो यस्येत्यमायः तत आचारार्थः क्विप् ततः श
तृप्रत्ययः ततस्तृतीयैकवचने अमायवदाचरतीत्यमायच्च तेनेति विग्रहः यद्वा मां मानं यतीति मायः कर्मण्यण् न मा
योऽमायः तस्य भावोऽमायता तयातिमहतेत्येकं पदं अथवा माङ् माने दैवादिकस्तस्माच्छ्वोदसः शतृप्रत्ययः अमाय

तस्यानादेन घोरेण कृत्स्नमापूरितं नभः अमायतातिमहता प्रतिशब्दो महानभूत् ३२ ॥
चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे चचाल वसुधा चेलुः सकलाश्च महीधराः ३३ ॥

प्रारम्भस्वरूपं ध्वन्यंतरं प्रतिशब्दः तस्या देव्या घोरेण नादेन अमायता नभस्यपि न मातीति तेनातिमहता महान् प्रतिशब्दो
भूत् ३२ चुक्षुभुश्चलिताः वसु द्रव्यं धीयते यस्यां सा वसुधा मही धरन्तीति महीधराः पर्वताः तेन नादेन लोकाः क्षोभं प्रापुः समुद्राश्च
चकंपिरे वसुधा महीधराश्च स्थानच्चलिता बभूवुः ३३ सिंहं वाहयितुं शीलमस्या इति सिंहवाहिनी तां आत्मा स्वतः कर
णां मूर्तिः शरीरं भक्त्यानम्रे आत्ममूर्तीयया ॥ देवास्तां सकलावयवाद्युत्पन्नां वीक्ष्य हृष्टचेतसः संतो जयेत्यू
चुः मुनयश्चैनां सिंहवाहिनीं तुष्टुवुः भक्त्यानम्रा आत्ममूर्तिर्येषां ते ३४ ॥

१९
मा॰ १॰
१

स॰
श॰टी॰
२९

ननु ...... इति निपातनात्संक्षुब्धमिति भाव्यमिति चेन्न संक्षुब्धं संक्षुब्धमिवेत्युपमानोपमेयभावस्यवि
वक्षितत्वात् संक्षुब्धं आकुलीभूतं सन्नद्धानि अखिलसैन्यानि येषां ते समुत्तस्थुरुद्यायुधाः उद्यतायुधाः ते दैत्या
स्तेन क्षोभेण नादेन त्रैलोक्यं चलितमालोक्य क्रोधोदीर्णास्त्रा उदतिष्ठन् सन्नद्धं दृष्टदीनसन्नाहं सैन्यं येषां ते ३५ आः इत्य
व्ययं कोपाविष्कारानुकारः अभ्यधावत धावति स्म आलक्ष्याभिमुखं गतवान् महिषासुरः आः कोपे किमेतदिति कोपादा
भाष्य तं शब्दमभ्यधावत् अशेषैरसुरैर्वृतः ३६ त्विषा दीप्त्या व्याप्तं लोकत्रयं यया पदाक्रान्त्या नता भूर्यया किरीटेनोल्लि

18

जयेति च मुदा देवास्तामूचुः सिंहवाहिनीं तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ३४ दृष्ट्वा समस्तं संक्षुब्धं
त्रैलोक्यममरारयः सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ३५ आः किमेतदिति क्रोधादाभाष्य महिषासुरः
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ३६ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा पदाक्रान्त्या नतभुवं किरीटो
ल्लिखिताम्बरां ३७ क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन च दिशो भुजसहस्रेण समंताद्व्याप्य संस्थितां ३८
ततः प्रववृते युद्धं तया देव्या सुरद्विषां शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगंतरं ३९ ॥

खितमंबरं व्योम यया

ततोनंतरं स महिषासुरो
देवीमद्राक्षीत् पदाक्रमणेन नमिता भूर्यया सा तां ३७ धनुर्ज्यानिःस्वनेन क्षोभितान्यशेषाणि पातालानि समंतात्सर्वतः
स देवी ददर्श चलितानि सप्त पातालानि यया सा तां केन ज्याध्वनिनादेन भुजसहस्रेण समंताद्दिशो व्याप्य संस्थितां ३८
शस्त्रैः खड्गैः अस्त्रैः क्षेप्यैः बाणादिभिः शस्त्रास्त्रैर्नीराजितैर्वा शस्त्रमायुधमस्त्रं लोहयोरित्यभिधानात् बहुधा बहुप्रकारैः ततो
नंतरं दैत्यानां तया देव्या सह युद्धं प्रववृते बहुधा मुक्तैः शस्त्रास्त्रैः बहुधा मुक्तैः उत्तेजितानि यत्र तत् ३९ ॥

चिक्षुराख्यश्चिक्षुरनामा अन्यैरसुरैस्तथा सहितः चत्वारि रथगजहयपदातिरूपाण्यङ्गानि यस्य बलस्य अन्यश्चामरो युयुधे
चतुरंगबलान्वितः ४० उदग्राख्य उदग्रनामा अयुतानां सहस्रेण कोट्यर्थः एकं दशशतं चैव सहस्रमयुतं तथा लक्षं
च नियुतं चैव कोटिरर्बुदमेव च वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः मध्यं परार्द्धं चैतद्दशवृद्ध्या यथाक्रमादिति
गणनाविधिर्निर्णीतत्वात् उदग्राख्यो महासुरः षड्भिरयुतैः षष्टिसहस्रैः महाहनुः अयुतानां सहस्रेण युयुधे ४१
पंचाशद्भिर्नियुतैः पंचकोटिभिः अयुतानां षड्भिः शतैः षष्टिलक्षैः रथानामित्यनुवर्तते एवं श्लोकात् असिलोमा महा

महिषासुरसेनानीश्चिक्षुराख्यो महासुरः युयुधे चामरश्चान्यैश्चतुरंगबलान्वितः ४० रथानामयुतैः षड्भि
रुदग्राख्यो महासुरः अयुध्यतायुतानां च सहस्रेण महाहनुः ४१ पंचाशद्भिश्च नियुतैरसिलोमा महासुरः
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ४२ गजवाजिसहस्रौघैरनेकैः परिवारितः वृतो रथानां कोट्या च
युद्धे तस्मिन् युध्यत ४३ बिडालाख्यो महादैत्यः पंचाशद्भिरथायुतैः युयुधे संयुगे तत्र रथानां परिवारितः ४४

सुरः पंचाशद्भिर्नियुतैः षष्टिभिर्लक्षैः रणे युयुधे बाष्कलो नामासुरः षष्टिलक्षैः ४२ गजवाजिसहस्राणामोघैर्वृन्दैः रथानां
च कोट्या वृतः परिवारितनामा किंभूतो बाष्कलनामा हस्त्यश्वानां बहुभिः सहस्रैः परिवारितः रथानां च कोट्या वृतः ४३ पं
चाशदयुतैः पंचलक्षैः बिडालस्याक्षिणी इवाक्षिणी यस्य बिडालः इति आख्या यस्येति केचित् तत्र बिडालनयन इति वाम
नपुराणदर्शनात् अथैस्यानंतर्यं रथानामयुतानां पंचाशद्भिरयुतैः पंचशतकोटिभिरित्यर्थः परिवारितो वेष्टितः संयुगे रणे ॥

स॰
श॰ टी॰
१२

अथानंतरं बिडालाख्यो महादैत्यः पंचभिर्लक्षैः परिवारितः संग्रामे युयुधे विडालश्चामरः उग्रः महाहनुः असिलोमा बाष्कलः बिडालाख्यः एते सप्त महारथा नामतो निर्दिष्टाः अन्येषामतिरथानां बहुत्वान्नामानि नोक्तानि ग्रंथगौरवभयात् ४४ अन्ये चंडमुंडरक्तबीजप्रभृतयः अयुतशो बहुशः ताः बहुयुतैर्वा युयुधुरिति परस्मैपदं छांदसं अन्ये सहस्रसंख्याका महासुराः संग्रामे देव्या सह युयुधुः ४५ कोटिशः कोटिसहस्रैः परार्थेनेत्यर्थः ननु विंशत्यादिशब्दानां बहुत्वाभिधायित्वात् एकवचनांतत्वे युतनियुतशतसहस्रशब्देषु युक्तेति चेत् न यदा विंशत्यादिशब्दवाच्यानामर्थानां संख्यांतरेण सं

अन्ये च तत्रायुतशो रथनागहयैर्वृताः युयुधुः संयुगे देव्या सह तत्र महासुराः ४५ कोटिकोटिसहस्रैस्तु रथानां दंतिनां तथा हयानां च वृतो युद्धे तत्राभूत् महिषासुरः ४६ तोमरैर्भिंदिपालैश्च शक्तिभिर्मुसलैस्तथा युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ४७

बंधस्तदा द्विवचनांतत्वयोरपीष्टत्वात् तथा चोक्तं
विंशत्यादिसद्वे द्वे विंशती त्रयो विंशतय इति रथानां दंतिनां हयानां च प्रत्येकं कोटिकोटिसहस्रैर्वृत इत्यर्थः
महिषासुरस्तत्र रथदंतिहयानां कोटिकोटिसहस्राणि यावत् कोटिस्तस्याधिपत्या कोटिस्तया परिवृतो युद्धे भूत्
... ४६ तोमरैः स... लाभिः भिंदिपालैः हस्तप्रमाणकांडैः शक्तिभिः शल्यैः मुसलैः अयोदंडैः प
... कातादिभिः पट्टिशैः ... विशेषैः मुशलपट्टिशौ दंत्यमध्यौ तालव्यमध्यौ तत्र संयुगे महा
सुराः एवंविधैः ... विशेषैर्देव्या सह युयुधुः तोमरैर्बाणविशेषैः भिंदिपालैः गदादंडैः शक्तिभिर्मु

दु॰
टी॰
१२

प्रचक्रमुः उद्यमं कृतवंतः अत्र प्रकर्षमात्रं विवक्षितं ना॰ क्रमितं तेन प्रपराभ्यामित्यात्मनेपदं न भवति केचिदसुरा
स्तं प्रति शक्तीः संचन् केचित्पाशान्प्रेरितवंतः तथा तां देवीं खड्गप्रहारैर्हन्तुमुपक्रांतवंतः ४८ सा देवी ततोनंतरं तानि
द्विषत्प्रयुक्तानि शस्त्राणि अस्त्राणि च लीलयैवाच्छिनत् निजानि शस्त्राणि आयुधानि समंत्राणि अस्त्राणि सर्पास्त्रमेघा
स्त्रगारुडास्त्रवायव्यादीनि वर्षतीत्येवं शीला ४९ अनायस्तमनायासयुक्तमविकृतमाननं मुखं यस्याः आयस्तं सजि

केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ४८ सा च देवी तत-
स्तानि शस्त्राण्यस्त्राणि चंडिका लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ४९ अनायस्तानना देवी स्तूय-
माना सुरर्षिभिः मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ५० सोपि क्रुद्धो धुतसटो देव्या वाहनकेसरी
चचारासुरसैन्येषु वनेष्विव हुताशनः ५१ ॥

तेरिति मे क्रोधितेन कुपितेन इत्यभिधानात् देवी चंडिका असुर
देहेषु शस्त्राणि समंत्राणि अमंत्राणि आयुधानि च मुमोच कीदृशी लीलया क्रीडितं संदर्शमिच्छया चाकुपितमुखी आ
यस्तं त्वक्षं अनायस्तं सलीलमाननं यस्याः सा महर्षिभिर्नारदादिभिः स्तूयमाना ५० धुतसटः कंपितकेसरः वाहनके
सरी सिंहः सैन्यमध्यस्तालव्यमध्यस्थ केसरसटाभिधानेषु टसपते केसरः केसरोपीति द्विरूपकत्वात् देव्या वाहनासिं
हः क्रुद्धः सन् असुरसैन्येषु बभ्राम निष्ठुतास्कंधकेशाः येन सः यथा क्रुद्धो वह्निः दहन् वने चरति ५१ ॥

स॰
श॰टी॰
१८ तेनिःश्वासा एव गणाः संभूता इत्यर्थः अंबिका संग्रामे युध्यमाना सती यान्निःश्वासान्मुमोच उभयपदी त एव निःश्वा-
साः सद्यस्तस्मिन्नेव क्षणे शतसहस्रशो गणा जाताः ५२ ते गणाः देव्याः शक्त्या प्रभावेनोपबृंहिता आप्यायिताः गणाः परशा-
दिभिः असुरगणान्नाशयंतो युयुधुः देवीशक्त्याऽऽवर्धितबलाः ५३ अवादयंत वादितवंतः आवादयंत इति क्वचित्पाठः
तत्र समंताद्वादयंतः संतो युयुधुरिति पूर्वेणान्वयः युद्धमेव महोत्सवो वीराणां हर्षवर्द्धकत्वात् केचिन्निःश्वासगणाः

निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽंबिका तएव सद्यः संभूता गणाः शतसहस्रशः ५२ युयुधुस्ते परशुभिर्भिं-
डिपालासिपट्टिशैः नाशयंतोऽसुरगणान्देवीशक्त्युपबृंहिताः ५३ अवादयंत पटहान्गणाः शंखांस्तथा-
परे मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ५४ ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः खड्गादिभिश्च
शतशो निजघान महासुरान् ५५ पातयामास चैवान्यान्घंटास्वनविमोहितान् असुरान्भुवि पाशेन बद्ध्वा
चान्यानकर्षयत् ५६॥

पटहानवादयंत शंखान्पूरयंति स्म मृदंगांश्चावीवदन् महोत्सवे हि प-
टहशंखमृदंगादीनि वाद्यंते ५४ शक्तीनां वृष्टिभिर्वर्षणैः ततोऽनंतरं देवी चंडिका त्रिशूलेन गदया बाणवृ-
ष्टिभिः खड्गादिभिरायुधैश्च शतशः सहस्रसंख्याकान् शतसंख्यो संख्यत्ववचनः महासुरानवधीत् ५५ अक-
र्षयत् आकृष्टवती कृषेश्चौरादिकस्य लङि रूपं अकर्षतेति क्वचित्पाठः तत्रात्मनेपदं छांदसं सा देवी अन्या-
न् घंटास्वनविमोहितान् भुवि पातयामास अन्यानसुरान् पाशेन बद्ध्वा भुव्याचकर्ष ५६॥

18

गदयाविमर्दिताःसंतोनिपातेनभग्नप्रोरसइत्यन्वयः अथवागदयायोनिपातःनिपातनंतेन यद्वागदयेतिषष्ठ्यर्थेतृ
तीयागदाघातनिपातेनेत्यर्थः केचिद्दंत्याघातीदंताःखड्गपातैर्मध्येखंडिताः तथापरेगदयाघातेन संक्षोभिताः संतोभ
विघ्नाजंतेस्म ५७ वेमुः उद्गीर्णवंतः वादिनेत्यपिसर्वेविषयाच्छंदसिविकल्पंतइति नघाघादवादीत्यादिनेत्यभ्यासलो
पनिषेधोनभवति अथवावमिरोहसवकारवानन्योस्ति तस्यैवरूपंनिषेधस्तुदंत्योष्ठ्यविषयः भूपांहफंहताःस्ताडि
ताः केचिन्मुशलेनभूपांहताःसंतोरुधिरंववमंतिस्म केचिद्वक्षसिमूलेनभिन्नाःसंतोनिपातिताः ५८ श्येनानां

केचिद्धियाहृतास्तीक्ष्णैःखड्गपातैस्तथापरे विपोथितानिपातेनगदयाभग्नप्रोरस ५७ वेमुःकेचिद्रु
धिरंमुशलेनभूपाहताः केचिन्निपतिताभूमौभिन्नाःशूलेनवक्षसि ५८ निरंतराःपातैच्छेनहृताःकेचि
द्रणाजिरे श्येनानुकारिणःप्राणान्मुमुचुश्छिदमानवाः ५९ ॥

रिणमनुकारिणःसदृशाः यथाश्येनाःस्वपक्षान्वितत्यभूमौनिपतंति तथातेपिपार्श्वयोर्वक्षःस्थलादिषुनि
रंतरनिपतितसत्त्वसमारतयासपक्षाइवलक्ष्यंतेइत्यर्थः सेनानुकारिणइतिपाठे सेनामनुपश्चात्कर्तुंशीलंयेषांते
सेनाग्रगताइत्यर्थः केचिद्दैत्याःपातैच्छेनेनिर्विवराःकृताः केचिद्देवद्विषःरणाजिरेप्राणान्मुमुचुः मेघांसिद्धाविमन्व
ऊचंतीति यथामेघाःसलिलान्मुंचंतितथातेःप्राणान्मुमुचिरे ५९ ॥
२ ^ द्विसौनिपतितानाभांति यद्वाश्येनाःशस्त्रमृगाः श्येनःपक्षिणिफेलेनेत्यभिधानात्पादोत्रस्वर्णता
नुपातस्त्रमृगाइव ५९

स० शां० टी०

19

मध्येहृदि देशे केषांचिद्बाहवश्छिन्नाःतथापरेक्षतकंठाविदधिरे अन्येषांशिरांसिछिन्नानिभूमौपेतुःमध्येछिन्नांगाअपरे
६० उर्व्यांभूमौकेचिद्देव्याविच्छिन्नजंघाःसंतःउर्व्यांपेतुः केचिद्देव्याएकबाह्वक्षिचरणाःकृताः केचिद्देव्यामध्यतःस्फाटिताः
६१ पतिताःपुनरुत्थिताइति मनुष्याणांसहस्रेषुघातेषुपतितेषुच उद्गतिष्ठत्कबंधानिबहून्युत्थायधावापतनिति श्रुति
पर्वणिघातसहस्रकेभिहते कबंधोध्यानमुक्तं अयुतसंख्याकवीरवधेमहाहवेएकोपिवीरःकबंधोभवतीतिप्रसिद्धिरा
द्रियते तदाघाततिपर्वस्थःसहस्रघातघाहोश्रयुतार्थतयाव्याख्येयः अन्येषांशिरसिछिन्नेपिकबंधरूपेणपुनरुत्थितादे०
व्यासहयुयुधुःगृहीतपरमायुधंयैस्ते ६२ तूर्यलयाश्रितावाद्यानुसारिणः कबंधाश्छिन्नशिरसइतिपर्यायाभ्यां तेषा

केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे शिरांसिपेतुरन्येषामन्येमध्येविदारिताः ६० विच्छिन्नजंघास्त्वपरेपेतुरु
र्व्यांमहासुराः एकबाह्वक्षिचरणाःकेचिद्देव्याद्विधाकृताः ६१ छिन्नेपिचान्येशिरसिपतिताःपुनरुत्थिताः
कबंधायुयुधुर्देव्यागृहीतपरमायुधाः ६२ ननृतुश्चापरेतत्रयुद्धेतूर्यलयाश्रिताः कबंधाश्छिन्नशिरसःखड्गशक्त्यृ

मति बहुत्वमाह छिन्नशिरसइतिस्वरूपाख्यानंवा कोवायुद्धेवबंधप्रायोयेषांतेकबंधाइतिछिन्नशिरसांविशेषणं
मित्यन्ये अथवाछिन्नशिरसोपिकबंधाः कश्चिदेवभंतीतिकबंधाः तेषांमायाविनाछिन्नमपिशिरोलग्नंभवतीत्यर्थः
अथवाछिन्नंशिरोयैःकबंधैरप्यन्येषांशिरश्छिन्नमित्यर्थः अथवाकबंधाअसुरजातिविशेषास्तद्विशेषणंछिन्नशिरसइ
ति अथवाकबंधजात्यसुरव्यवच्छेदकंछिन्नशिरसइतिविशेषणं खड्गशक्त्यृष्टिपाणयःखड्गाद्यायुधविशेषाः अपरे
युद्धेकबंधाश्छिन्नशिरसोपिननृतुःतूर्यलयाश्रयेणनृत्यंतः खड्गंचशक्तिमृष्टिंचस्थितरवातिष्ठपाणिषुयेषांते ६३॥

देवीं प्रति तिष्ठ तिष्ठेति भाषंतो हस्त्यादेपादंवभाषमाणाइव एवइवार्थो ज्ञेयः अन्यथा छिन्नशिरस्त्वात्कथं तिष्ठ तिष्ठे
ति वदिष्यंति भाषंत इति आत्मनेपदिनोपि यातोछांदसः शतृप्रत्यय इति ज्ञेयं अथवा भाषत इति भाषः पचाद्यच् भा
ष इवाचरति भाषतीत्याचारार्थः क्विप् ततः शतृप्रत्यय इति ज्ञेयं अन्ये कबंधेभ्य इतरे खड्गखड्गेनेन्द्र तश्चेत्यनुषज्यते ९४॥
पातितै रथनागाश्वैरसुरैः सा वसुंधरा तत्र उग्रवेषाभवद्यत्र स महारणोभूत् ९५ वारणासुरवाजिनां प्रशोणितमे

तिष्ठ तिष्ठेति भाषंतो देवीमन्ये महासुराः तिष्ठ तिष्ठेति चैवोक्ता देव्या युयुधिरेस्थये ९४
पातितै रथनागाश्वैरसुरैश्च वसुंधरा अगम्या साभवत्तत्र यत्राभूत्स महारणः ९५
शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः मध्ये चासुरसैन्यस्य वारणासुरवाजिनां ९६
क्षणेन तन्महासैन्यमसुराणां तथांबिका निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयं ९७

घौघो जलप्रवाहो यासु तत्र संग्रामे रुधिरप्रवाहा नद्यः वहंति स्म असुरसैन्यमध्ये वारणासुरवाजिनां प्रशोणितेन म
हासरितो वहन् ९६ वारणा हस्तिनः महासैन्यं सैन्यसमुदायं क्षयं नाशं निन्ये नीतवती तदा श्रीचंडिका असुरा
णां महत्सैन्यं क्षयं निन्ये णीञ् द्विकर्मकः यथा दहनः तृणदारूणां महाचयं क्षयं नयति ९७॥

स॰ सचसिंहो॰ अमरारीणांशरीरेभ्योसून्विचिन्वति आदायसमुच्चिनोतिइवेत्युत्प्रेक्षायां विचिनोतीतिवक्तव्येछंदोनुरोधेनछां
श॰टी॰ दसोकारागमः यद्वाप्रतिप्रतिषेधेन विचिनुव्यचिनोदित्यर्थः क्रियासमभिहारेलोट् लोटोहि[...] तितिलोटं सर्व
२॰ लकारार्थविहितमानीयं तद्वाछांदसःपरनिपातोतिशब्दस्य यद्वाविचिन्वतीतिशतृप्रत्ययांतस्यसप्तम्येकवचनेरूपं
तदासचसिंहेसुराणांमहासैन्यंदयंनिन्येइतिपूर्वेणसंबंधः तस्मिन्सिंहेअमरारीणांशरीरेभ्योसून्प्राणान्विचिन्वति
प्राणानिवकर्षतिसति सिंहस्यात्यर्थसिंहनादंकुर्वन्नसुराणामसून्विचिन्वतीव महानादेनैवहिषांप्राणान्विचि॰

20

सचसिंहोमहानादमुत्सृजन्धुतकेसरः शरीरेभ्योमरारीणामसूनिवविचिन्वति ६७ देव्यागणैश्चतैस्त
त्रकृतंयुद्धंमहासुरैः यथैषांतुतुषुर्देवाः पुष्पवृष्टिमुचोदिवि ६८ इतिश्रीमार्कंडेयपुराणेसाव॰
र्णिकेमन्वंतरेदेवीमाहात्म्येमहिषासुरसैन्यवधोनामद्वितीयोध्यायः २॥

नोतीव अन्विकरणंछांदसः ६७ देव्यागणैश्चतथायुद्धंकृतं तथादिविदेवाएनांतुष्टुवुः पतितुष्टावभूवुः अथ
वा एषांयुद्धं प्रापांसुः कर्मणिवाषष्ठीइति देव्यातैर्गणैश्चतत्रमहासुरैः सह तथातथायुद्धंकृतंयथाययादेवाः ए
नांतुष्टुवुः अंबरेआकाशेपुष्पवृष्टिमुंचंतीति ६८ इतिश्रीरामाश्रमविरचितायांदेवीमाहात्म्यटीकायांमन्व
कृतायांच महिषासुरसैन्यवधोनामद्वितीयोध्यायः २॥

अथावलोकनानंतरं सेनानीर्महासुरश्चिक्षुरनामा तत्सैन्यं निहन्यमानं विलोक्यांबिकां प्रति योद्धुं ययौ अतिकोपा
त् १ यथा मेरुगिरेः शृंगमित्यभूतोपमा मेरुशृंगादथस्तादेव मेघमंडलस्य विद्यमानत्वात् सोऽसुरः संग्रामे शरवर्षे
णातां देवीं ववर्ष यथा मेघस्तोयवर्षेण गिरेः शृंगं वर्षति २ शरोत्करान् बाणसमूहान् यंतारं सारथिं वाजिनं रथयुक्त
तुरग`` ´´´´ मारोहणार्थं सेवकं रूपस्याधिपतिं ततोनंतरं देवी तस्य सेनान्यः शरोत्करान् लीलयैव छित्वा बाणैस्तु

निहन्यमानं तत्सैन्यमवलोक्य महासुरः सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकां १ स देवीं शरवर्षेण
ववर्ष समरेऽसुरः यथा मेरुगिरेः शृंगं तोयवर्षेण तोयदः २ तस्य छित्वा ततो देवी लीलयैव शरोत्करान् ज
घान तुरगान्बाणैर्यंतारं चैव वाजिनं ३ चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितं विव्याध चैनं गात्रेषु छिन्न
धन्वानमाशुगैः ४ स छिन्नधन्वा विरथो हताश्वो हतसारथिः अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ५
सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि आजघान भुजे सव्ये देवीमप्यतिवेगवान् ६॥

रगान्वाजिनं यंतारं च जघान ३ छिन्नं धनुः यस्याः सा छिन्नधन्वा तं आशुगैर्बाणैः शरैस्तत्क्षणं धनुश्चिच्छेद अतिसमु
च्छ्रितं ध्वजं च तथैनं छिन्नधन्वानं शरैर्विव्याध ४ स चिक्षुरोऽसुरः निकृत्तचापो रथरहितो हताश्वः यस्य सः खड्गं खेटकं
धृत्वा धावति स्म ५ आजघानेत्यत्रांगकर्मत्वाभावात् आङो यमहन इति नात्मनेपदं सव्यवामभुजे देवीमाजघानेत्य
न्वयः सोऽसुरस्तीक्ष्णधारेण खड्गेन सिंहं मूर्ध्न्याहत्य सव्ये भुजे देवीमपि जघानातिवेगेन धावमानः ६॥

स॰
प्रा॰ टी॰
४१

तस्या भुजमित्यन्वयः पफाल व्यदीर्यत ञिफला विशरणे इत्यस्य रूपं हे नृपनंदन अथवा नृपं नंदयतीति नृपनंदः त
स्य संबोधनं हे नृपनंदन पफाल स्वीयां फलनिष्पत्तिं न चकारेत्यर्थः हे नृपनंदन खड्गस्तस्या भुजं प्राप्य विशीर्णः आ
रक्तनेत्रः स शूलं जग्राह ७ ततः शूलं ततामिति पाठेपि शूलमेव तच्छब्देन ग्राह्यं शूलशब्दस्य उभयलिंगेपि विद्यमानत्वात् अ
स्त्री शूलमिति द्विलिंगत्वेनाभिधाने संगृहीतत्वात् भद्रकाली विषये तेजोभिः रश्मिभिर्ज्वलमानं अत्यर्थं ज्वलत् अं
बरात् आकाशे सममत्यर्थे पंचमी छांदसी यद्वा अंबरे समवस्थाय रविबिंबमिवेति ल्यब्लोपे पंचमी केचित्तु अंबरं अतती

21

तस्याः खड्गो भुजं प्राप्य पफाल नृपनंदन ततो जग्राह शूलं स कोपादरुणलोचनः ७ चिक्षेप च ततः शू
लं भद्रकाल्यां महासुरः जाज्वल्यमानं तेजोभी रविबिंबमिवांबरात् ८ दृष्ट्वा तदापतच्छूलं देवी शूलममुंच
त तच्छूलं शततां तेन नीतं स च महासुरः ९॥

त्यंबरात् अत सातत्यगमने इत्यस्मा   न्किं वंतामिष्यायरवि
बिंबस्यैव विशेषणतया योजयंति तेजोभी रविबिंबमिवेति रलोपे सति दीर्घत्वं रलोपे पूर्वस्य च दीर्घोऽण इत्य
नेन ह्रस्वपादेन अवि: . . . . . . पवरविवचनः . . . . . . त्यभिधानात् स महासुरश्छिन्नः सर्वदेवतेजःसमु
द्भूतायां भद्रकाल्यां देव्यां शूलं क्षिप्तवान् तेजोभिरत्यर्थं ज्वलत् उत्प्रेक्ष्यते अंबरात्पतत् रविबिंबमिवेति ८ तदेत्यमुक्तं
शूलं तेन देवी शूलेन शततां नीतं चूर्णीकृतं स च महासुरश्छिन्नः शततां नीत इत्यनुषज्यते देवी श्रीचंडिका तत्
छूलं पतत् दृष्ट्वा निजशूलं तस्मात् चिक्षेप तेन देवी मुक्तेन शूलेन तच्छत्रोः शूलं चूर्णितं महासुरश्च खंडितः ९॥

त्रिदशान्देवानर्दयतीति त्रिदशार्दनः तस्मिन्महिषस्य सेनान्यां हते सति महावीर्यः सन्नागतश्चामरनामा गजारूढः
समरायायासीत् १ देव्या वधाय शक्तिं मुमोचेति षष्ठी योजनीया तां शक्तिं सोपि चामरोपि देव्या विषये शक्तिं मुमो
च अथ तां अंबिका तां शक्तिं शीघ्रं हुंकारेनामास्त्रविशेषस्तेनाभिहतां हतवीर्यां भूमौ पातयामास २ ततस्तत्सांबिका
चामरो नामासुरो भग्नां निपतितां शक्तिं दृष्ट्वा कोपसमन्वितः शूलमक्षिपत् सा देवी बाणैः शूलमपि चिच्छेद ३ सम

हतेतस्मिन्महावीर्ये महिषस्य चमूपतौ आजगाम गजारूढश्चामरस्त्रिदशार्दनः १ सोपि शक्तिं मुमोचा
थ देव्यास्तामंबिका द्रुतं हुंकाराभिहतां भूमौ पातयामास निष्प्रभां २ भग्नां शक्तिं निपतितां दृष्ट्वा को
पसमन्वितः चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ३ ततः सिंहः समुत्पत्य गजकुंभांतरे स्थितः
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ४ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ युयुधातेतिसं
रब्धौ प्रहारैरतिदारुणैः ५ ॥

त्पत्य समुत्पत्य गजस्य कुंभांतरे कुंभस्थलमध्ये स्थितः ततोनंतरं
सिंह उत्पत्य हस्तिकुंभस्थलमध्ये स्थित्वा तेन चामरेण सह मिथो बाहुयुद्धं चकार ४ नागाद्गजात् महीं पृथि
वीं युयुधातेतिसंरब्धावित्यत्र प्रगृह्यसंज्ञायां सत्यामपि छंदोभंगभयेन नाकारस्य पृथक्श्रवणं मणीवादिवा
त् प्रगृह्यसंज्ञाभावाद्वा अतिसंरब्धौ क्रोधाविष्टयुक्तौ ततोनंतरं सिंहचामरौ युध्यमानौ संतौ तस्मान्नागात्पृथिवीं
पेततुः तत्राप्यत्यर्थं कुपितौ अतिदारुणैः प्रहारैः युद्धं चक्रतुः ५ ॥

स॰ वेगात्खमाकाशमुत्पत्य दैत्योपरि निपत्य च सिंहेन चामरस्य शिरश्छिन्नं ततोनंतरं सिंहेन भूमेः सकाशाद्गगन-
श॰टी॰ मुत्पत्य तदुपरि स्थित्वा करप्रहारेण चामरस्य शिरो भिन्नं व्यधायि १५ उदग्र उदग्रसंज्ञः युद्धे दंतैर्मुष्टिभिः तलैः पेतैश्च प्राणप्र
गत्वेपीतरेतरयोगद्वंद्वः देव्या संग्रामे उदग्रनामा दैत्यः शिलावृक्षादिभिर्व्यापादितः दंतादिभिः करालसंज्ञो निपाति-
२२ तः १६ उद्धतं उद्धतनामानं एतान्यप्रमाणान्यपि दैत्यनामानि ज्ञेयानि श्रीदेवी चंडिका क्रुद्धा सती उद्धताख्यं दैत्यं गदापा-
तैश्चूर्णीकृतवती शतखंडशो व्यधात् वाष्कलाख्यं भिंदिपालेन मुद्गरप्रहारेण ताम्रांधकाख्यं दैत्यं बाणैरवधीत् १७ त्रीणि

22 ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा करप्रहारेण शिरश्चामरस्य द्विधाकृतं १५ उदग्रश्च रणे देव्या शि-
लावृक्षादिभिर्हतः दंतमुष्टितलैश्चैव करालश्च निपातितः १६ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतं
वाष्कलं भिंदिपालेन बाणैस्ताम्रं तथांधकं १७ उग्रास्यमुग्रवीर्यं च तथैव च महाहनुं त्रिनेत्रा च त्रिशूलेन ज-
घान परमेश्वरी १८ बिडालस्यासिना कायात्पातयामास वै शिरः दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयं १९

नेत्राणि यस्याः सा त्रिनेत्रा परमा मा या श्रुतिर्येषां ते परमा ब्रह्मादयस्तेषामपीश्वरी नियंत्री अंबिका उग्रास्यनामा-
नमुग्रवीर्यं च तथा महाहनुं त्रिनेत्रनामानं चैतांस्त्रीन् त्रिशूलेन जघान १८ बिडालस्य बिडालाख्यस्य संज्ञैकदेशेनापि
संज्ञिप्रतीतिरिति न्यायात् उभौ यमस्य क्षयं गृहं निन्ये कानुभावित्याकांक्षायामाह दुर्धरं दुर्मुखं चेति प्रतिपदाधिक-
रणन्यायेनोभयाद्दोयोजनीयोऽन्यथा व्यर्थः स्यात् देवी खड्गेन बिडालसंज्ञकस्य कायाच्छिन्नो भूमावपातयत् दुर्धरं
दुर्मुखं चोभौ दैत्यौ शरैरंतकसदनं प्रापयत् १९ ॥

माहिषेण महिषाकारेण तान्निःश्वासप्रभवान् एवं स्वसैन्ये क्षयं गच्छति सति महिषासुरो माहिषेण स्वरूपेण ता
न्गणान् द्रावयत् २० तुंडं मुखं तत्करणकप्रहारेण कांश्चिद्भूतले पातयामासेत्यग्रिमेण संबंधः स महिषः कांश्चि
द्गणांस्तुंडप्रहारेण पातयामास तथापरान् खुरक्षेपैर्घातयत् अन्यान् पुच्छच्छोटैः कांश्चिच्छृंगाभ्यां विदारितान्
कांश्चिद्वेगेन कांश्चिन्नादेन भ्रमणेन चान्यान् श्वाससमीरणेन भूतले पातयामासेति संबंधः २१ युग्मं सोऽसुरः प्रमथा

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः माहिषेण स्वरूपेण त्रासयामास तान्गणान् २० कांश्चित्तुंडप्र
हारेण खुरक्षेपैस्तथापरान् लांगूलताडितांश्चान्याञ्छृंगाभ्यां च विदारितान् २१ वेगेन कांश्चिदपरान्ना
देन भ्रमणेन च निःश्वासपवनेनान्यान्पातयामास भूतले २२ निपात्य प्रमथानीकमभ्यधावत सोऽसुरः
सिंहं हंतुं महादेव्याः कोपं चक्रे ततोंऽबिका २३ सोपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः शृंगाभ्यां
पर्वतानुच्चांश्चिक्षेप च ननाद च २४ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत लांगूलेनाहतश्चाब्धिः
प्लावयामास सर्वतः २५॥

नीकं निपात्य महादेव्याः सिंहं हंतुमभ्यधावत ततोऽनंतरमंबिका कोपं
चक्रे २३ खुरैः क्षुण्णं संमर्दितं महीतलं भूपृष्ठं येन सः स महिषासुरः कोपाच्छृंगाभ्यां पर्वतानुच्चान्प्रेरयामास उ
न्नर्नगर्ज च वल्लोलकदः २४ तस्य वेगभ्रमणाभ्यां विक्षुण्णा मही स्वयमेव विशीर्यते विशीर्णा कर्मकर्तरि यत्प्रात्मने
पदं तत्र प्रदेशे वेगेन यद्भ्रमणं तेन क्षोदिता सती विशीर्णा समुद्रः पुच्छेनाहतः सन्सर्वा दिशः प्लावयति स्म २५

खंडंखंडमितिक्रियाविशेषणं ययुरपगताः घनामेघाः श्वासानिलेनश्वासवायुनानिक्षिप्ताः नभसआकाशादचलाः प
र्वताः २६ धुताभ्यांशृंगाभ्यांविदारिताः संतः श्वासपवनेनप्रेरिताः शतशः अचलाआकाशाद्भूमावपतन् २६ क्रोधसमा
ध्मातंकोपानलेनोद्दीपितं अन्यमनाप्रकारेणकोपेनज्वलंतंमहासुरंदृष्ट्वातदासाचंडिकातद्वधायकोपंचकार २७
तस्येति संबंधलक्षणाषष्ठी तस्यबंधनायेत्यर्थः माहिषंमहिषसंबंधिमहामृधेमहासंग्रामे सादेवीतस्यबंधाय

धुतशृंगविभिन्नाश्चखंडंखंडंययुर्घनाः श्वासानिलास्ताः शतशोनिपेतुर्नभसोचलाः २६ इतिक्रोधसमा
ध्मातमापतंतंमहासुरं दृष्ट्वासाचंडिकाकोपंतद्वधायतदाकरोत् २७ साक्षिप्त्वातस्यवैपाशंतंबबंधमहा
सुरं तत्याजमाहिषंरूपंसोपिबद्धोमहामृधे २८ ततःसिंहोभवत्सद्योयावत्तस्यांबिकाशिरः छिनत्ति
तावत्पुरुषःखड्गपाणिरदृश्यत २९ ततएवाशुपुरुषंदेवीचिच्छेदसायकैः तंखड्गचर्मणासाकंत
तःसोभून्महागजः ३०॥

पाशंक्षिप्त्वामहासुरंबद्धवती ततःसोसुरो पिमहामृधेबद्धःसन्माहिषंरूपं
त्यक्तो २८ अथतत्क्षणमेवततोनंतरंमहिषासुरःसिंहोभूत् तत्क्षणमेवततोंबिकायावत्तस्यशिरश्छिन
त्ति तावत् खड्गपाणिःपुरुषोदृष्टो २९ आश्वेवशीघ्रमेव तंपुरुषंबाणैश्चिच्छेदेत्यन्वयः खड्गचर्मणा
सार्धंसहितं पुरुषंखड्गंचर्मच चिच्छेदेत्यर्थः ततोनंतरं देवीतंपुरुषंसायकैः खड्गंखेटकमथाच्छिनत् त
तोमहिषःस्वरूपंत्यक्त्वामहागजोभूत् ३०॥

करेण शुंडादंडेन तं देवीवाहनत्वेन प्रसिद्धं करेण सिंहं कर्षतो गजस्य करं निरकृंतत चिच्छेद कर्मव्यतिहारे आत्मने
पदं सशुंडाग्रेण देव्याः सिंहमाकृष्टवान् तथा जगर्ज देवी तस्य सिंहं कर्षतः खड्गेन शुंडं कृंतवान् ३१ वपुः शरीरमा
स्थितो गृहीतवान् तथा पूर्ववत् तदा त्रैलोक्यं क्षोभयामास माहिषेण स्वरूपेण त्रिलोके कदनं चकार ३२ पीयते इति पानं
मधु ततोनंतरं चंडिका क्रुद्धा सती पुनः पुनर्मद्यमपिवत् उच्चैर्हसति स्म आरक्तनेत्रा ३३ बलं सामर्थ्यं वीर्यमुत्साहः ताभ्यां म
दो गर्वः तेनोद्धतः प्रसंकुचितचित्तवृत्तिः सोप्यसुरो जगर्ज बलेन प्राणिशरीरेण वीर्येण तेजसा दर्पेण उद्धतो विषाणाभ्यां चंडिकां

करेण च महासिंहं तं चकर्ष जगर्ज च कर्षतस्तु करं देवी खड्गेन निरकृंतत ३१ ततो महासुरो भूयो माहिषं वपुरा
स्थितः तथैव क्षोभयामास त्रैलोक्यं सचराचरं ३२ ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमं पपौ पुनः पुनश्चैव
जहासारुणलोचना ३३ ननर्द चासुरः सोपि बलवीर्यमदोद्धतः विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान्
३४ सा च तान् प्रहितांस्तेन चूर्णयंती शरोत्करैः उवाचैनं मदोद्धूतमुखरागाकुलाक्षरं ३५ श्रीदेव्युवाच॥
गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहं मया त्वयि हतेत्रैव गर्जिष्यंत्याशु देवताः ३६॥

प्रति गिरीन् क्षिपत् ३४ सा देवी तान् भूधरान् मदेनोद्धूतो मुखरागो यस्याः सा आकुलान्यव्यक्तान्यक्षराणि यस्मिन् वचने
तद्यथा भवति तथोवाच समस्तं वा क्रियाविशेषणं मुखरागाभावाकुलिताक्षरमित्यर्थः सा देवी तेन महिषेण क्षिप्ता
न् शरोत्करैश्चूर्णयंती प्रत्युवाच मदेनोद्धूत उत्पन्नो यो मुखरागस्तेन स्खलितं ईक्षणं यस्य सः ३५ गर्ज गर्जेति संभ्रमे पुन
रुक्तिः अहो मूढ क्षणमेकं गर्ज गर्ज यावदहं मद्यपानं कुर्वे आपिबामि मया त्वयि हते सति त्रिदशा गर्जिष्यंति ३६॥

स॰
मा॰टी॰
२४

24

प्राक्रम्य [illegible] इति पाठः सा देवी एवमुक्त्वा समुत्पत्य तं महासुरमारुरोह तदनंतरं पादेन कंठे आक्रम्य एनं शूलेनाज
घान ३७ ततः शूलेन ताडनानंतरं पदाक्रांतोपि स निजमुखात् [illegible] ततः शूलताडनाद्धेतोरर्धनिष्क्रांतो निःसत्ता
यैकाय आसीत् तया देव्या अर्धनिष्क्रांत एव वी [illegible] इति प्रतिवचनेन संवृतः प्रतिबद्धः अर्धनिष्क्रांत एवासौ
देव्या वीर्येण संवृत इति पाठः क्वचित् ३८ ततः सोपि [illegible] क्रांतस्तया निजमुख [illegible] निष्क्रामन् महावीर्यः स्वरूपमथये
श्वरः अर्धनिष्क्रांत एवासौ देव्या वीर्येण संवृत इति पाठः सकाविको निग [illegible] त्तस्य ततोनंतरं सोपि महिषस्तया
देव्या पादेन गाढमाक्रांतः निजमुखादर्धनिष्क्रांत एव देव्या बलेन स्थापितः ३८ महता महासिना खड्गेन एवं च शिरश्छि

ऋषिरुवाच ॥ एवमुक्त्वा समुत्पत्य सारूढा तं महासुरं पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ३७ ततः
सोपि पदाक्रांतस्तया निजमुखात्ततः अर्धनिष्क्रांत एवासौ देव्या वीर्येण संवृतः ३८ अर्धनिष्क्रांत एवासौ
युध्यमानो महासुरः तया महासिना देव्या शिरश्छित्वा निपातितः ३९ ततो हाहाकृतं सर्वं दैत्यसैन्यं नना
शतत् प्रहर्षं च परं जग्मुः सकला देवतागणाः ४० ॥ [illegible]

देहवंतहृदानवं स्वरूपाति [illegible] मित्यादि विशेषो महि
षासुर विषयः कश्चित् [illegible] तरी [illegible] इति प्रतीयते एवमुक्तप्रकारेण एवमिति त्रैलोक्यस्येति चेति श्लो
कद्वयं कश्चित् महासुरो योद्धुम् [illegible] सासि निर्गते असौ तया देव्या मूर्धानं निकृत्य भूमौ नितरामपाति
३९ तत्रैव प्रसिद्धं दैत्यसैन्यं हाहाकृतं तदा हा [illegible] सत् ननाश प्रदर्शनं प्राम पलायितमित्यर्थः ननाशयदि
ति क्वचित्पाठः ततश्च एवं शिष्टं तत्र ननाशेति योजनीयं सर्वं दैत्यसैन्यं ननाश विशिष्टं सर्वगोदनोभक्त [illegible] सर्वषाहः प्रकृत्य
८ भिप्रायः हर्षं हर्षोत्कर्षं नितिपायं जग्मुः लब्धवंतः ततोनंतरं सर्वं हाहाकृतं तं दैत्यसैन्यं ननाशयत् हाहाकारः कृतो ये

दिविभवैर्दिव्यैः महर्षिभिर्नारदादिभिः देवा नारदाद्यैः समं तां देवीं स्तुवंति स्म तथा विश्वावसुप्रभृतयो गंधर्वपतयो
गायंति स्म अप्सरोगणाश्च ननृतुः ४१ महिषासुरे हते पवित्रा मधुरा वायवो वांति स्म दिवाकरश्च सुप्रतापो बभूव तथा
अग्नयो निर्धूमाः सशिखाः प्रदक्षिणावर्तिनो ज्वलंति स्म दिग्जन्यास्ता उत्पातशब्दाः शांताः शमं जग्मुः महारौद्रे महिषासुरे
व्यापादिते सकलेपि लोके एवं महोत्सवभरः प्रसरीसर्ति स्म ४२ इति श्रीदेवीमाहात्म्ये टीकाद्वये महिषासुरवधस्तृतीयो ३॥

तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ४१ ववुः पुण्यास्तथा वाताः
सुप्रभोभूद्दिवाकरः जज्वलुश्चाग्नयः शांताः शांता दिग्जनितस्वनाः ४२ इति श्रीमार्कंडेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये महिषासुरवधो नाम तृतीयोध्यायः ३ ऋषिरुवाच ॥ ततः सुरगणाः स
र्वे देव्या इंद्रपुरोगमाः स्तुतिमारेभिरे कर्तुं निहते महिषासुरे १ शक्रादयः सुरगणा निहतेतिवीरे त
स्मिन्दुरात्मनि सुरारिबले च देव्या तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदे

देव्याः स्तुतिं कर्तुमारेभिरे आरब्धवंतः अयं श्लोकः क्वाचित्कः १ महिषासुरे निहते सति ततोनंतरं सर्वे शक्रपुरोगमाः दे
व्याः स्तुतिमारेभिरे आरब्धवंतः १ तस्मिन्महिषासुरबले दैत्यसैन्ये च देव्या निहते शक्रादयः सुरगणास्तां देवीं वाग्भिस्तु
ष्टुवुरित्यन्वयः देवा इति पाठे कथंभूताः सुरगणाः देवाः क्रीडायुक्ता इति योज्यं शिरोधरा ग्रीवा अंसाः प्राः वा नम्रीभूता नतास्तेषां स
माहारः शिरोधरांसं अंशशब्दस्य परिपात छांदसः शिरोधरांसा इति दंत्यः सकारः क्वचित् तदा सप्राहुः स्कंधवाचकः समासपर।

नस्कंधदेशाः श्यामदेव प्रणात्यानम्रशिरोधरांसाः शिरोधरांसं वा येषां ते केचित्तु साध्वहं ग्रीवावाचकतया व्याकुर्वंति न म्रते शिरोधरेवेति ग्रीवाविशेषणं पुनः कथंभूताः सुरगणाः हर्षजनितरोमोद्गमेन चारवो देहा येषां ते प्रहर्षपुलकोद्गमचारुदेहाः अन्यत् देव्या तस्मिन् आत्मनि महिषेऽसुरादिबले च निहते सति शक्रादयो देवगणाः वाणीभिस्तां चंडिकां स्तुवंति स्म किंभूताः प्रणतिनम्रशिरोधरांसाः प्रणतिवशान्नम्राः स्कंधा येषां ते अपरे कीदृशाः प्रहर्षपुलकोद्गमचारुदेहाः प्रकृष्टहर्षेण यो रोमांचाविर्भावः तेन मनोहराः देहा येषां ते १ यया देव्या इदं प्रत्यक्षतया परिदृश्यमानं प्रतिव्याप्तं सुरगणैस्तत्प्रसंगात् गतानुगतीक्रिया अपि पदार्थाः साक्षात्क्रियंत इवेति इदं पदं हेनापि तेषां नि

देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या ॥
तामंबिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः २

दृशोऽयुक्तः केनाततमित्यपेक्षायामाह आत्मौपाधिकेन वैभवेन ननु तस्याः स्वाभाविके व्यापकत्वे कथं परिच्छिन्नमूर्तिमत्त्वमित्याशंक्याह निःशेषेति निःशेषदेवगणस्य सामर्थ्योपचयाया मूर्तिर्देहपरिग्रहो यस्याः शक्त्या या यद्वा आत्मशक्त्या निजस्वभावेनाततं व्याप्तं निःशेषदेवगणस्य शक्तिसमूहः तेजोराशिः तदेव मूर्तिः शरीरं यस्याः इत्यर्थः भक्त्या सेव्यसेवकभावपुरःसरतया प्रणताः स्म इत्यर्थे पादपूरणे छंदोनुरोधात् लुप्तम विसर्जनीयं च स्मेति पदं सांबिकास्माकं शुभानि करोतु वयं तामंबिकां भक्त्या नताः स्म किंभूतां अखिलदेवैर्महर्षिभिश्च पूज्यते अखिलदेवमहर्षिपूज्या तां यया देव्या इदं विश्वं ... सा भद्राणि करोतु अस्माकं २॥

प्रकृष्टंस्वभावं अनन्यसाधारणंसामर्थ्यंच वक्तुंनपर्याप्ताइत्यन्वयः अशुभमकल्याणंभयंभाविदुःखप्रतिसंधानजमसुखं
तयोःसमाहारः शुभभयंतस्यनाशायेत्यन्वयः वैभाषिकएकवद्भावः अशुभेभ्योभयं अशुभरूपंवाभयं यस्याःअतुलंप्रभावं
भगवाननंतोविष्णुःब्रह्माहरश्चवक्तुंनसमर्थाः साचंडिकासमस्तंविश्वंपालयितुं अशुभाद्भयं तस्यनाशाय अथवाअसुरेभ्यो
भयमपनेतुंमतिंकरोतु जगत्पालयतेभयंनाशयतेइत्येवंतेबुद्धिर्भवतु २ पुण्यवतांगृहेषुयास्वयमात्मनायापूर्वरूपापरिहारेणसं
पदित्यन्वयः तथापापकृतांतत्करणानांभवनेषुविपत् सत्यज्ञानानंदादिरूपायाभगवत्याःसमीचीनेसंपद्रूपातोसमीचीने
विपत्स्वरूपेद्वेषोवानास्ति उभयोःकल्पितत्वाविशेषात् तेनालक्ष्मीरूपेणभगवत्याविवर्तोक्तिर्नविरुद्धेतिमंतव्यं तथाकृतधियां

यस्याःप्रभावमतुलंभगवाननंतोब्रह्माहरश्चनहिवक्तुमलंबलंच साचंडिकाखिलजगत्परिपालनायनाशाय
चाशुभभयस्यमतिंकरोतु २ याश्रीःस्वयंसुकृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृतधियांहृदयेषुबुद्धिः श्रद्धा
सतांकुलजनप्रभवस्यलज्जातांत्वांनताःस्मपरिपालयदेविविश्वं ३॥

वेदार्थविचाराभ्याससंस्कृतांतः
करणानांहृदयेष्वंतःकरणेषुयाबुद्धिःस्वर्गापवर्गसाधनंज्ञानं तथासतांवेदार्थानुष्ठातृणांश्रद्धावेदोक्तेगुरूक्तेचार्थेवि
श्वासः कुलमस्यास्तीतिकुलःअर्शादिभ्योच तस्माज्जनात्प्रभवउत्पत्तिर्यस्य तस्ययालज्जा, करणीया प्रवृत्तिलक्षणांतःक
रणधर्मः तांउक्तरूपांत्वांनताःस्म हेदेविजगत्परिपालय हेदेवितामेवंविधांत्वांभगवतींनताःस्म स्मेतिछांदसःसकारलो
पः एतदोनित्यसंबंधः यादेवीपुण्यवतांवेश्मसुसाक्षात्संपद्रूपालक्ष्मीःपापिष्ठानामलक्ष्मीःपापिनांगृहेषु अ
प्रांदिशति तथायादेवीबुद्धिःसर्वव्यवहारिणांहृदयेषुबुद्धिःबुद्धिमतांयाबुद्धिःसात्वमेव यात्वंसतांमनः सुश्रद्धा

सं॰ प्रा॰ टी॰ २८

साप्यवोपद्दृश्यते सतव प्रसादएव यात्वमभिजातस्य मनसिलज्जा यादेवी सर्वभूतेषु सर्वरूपेणव्यवस्थितेति वृहस्पति
तदेवद्रष्टयति नमस्कारफलं प्रार्थ्यते देवि जगद्धत्ते ३ ॥ तदियंस्तुतिर्वस्तुतस्तुत्वस्वरूपवर्णयितुमशक्यमित्याह
किमिति वर्णयामइति समर्थनायां लोट् तेनोक्तवर्णनसामर्थ्यं संक्षेपोर्थेनकिंप्रहेनाक्षिप्यते तवस्वरूपंवर्णयि
तुंनशक्नुमइत्यर्थः असामर्थ्ये हेतुमाह अचिंत्यमिति सर्वेषसुरदेवगणादिकेषु निरूपणीयंसर्वोत्कृष्टत्वात् हेदेवि
एतत्त्वासिद्धमतिवीर्यमनन्यसाधारणंसामर्थ्यंच किं वर्णयाम यतोचिंत्यं सर्वेषु असुरक्षयकारणंशीलं मत्तुंदे

26

किंवर्णयामतवरूपमचिंत्यमेतत्किंवातिवीर्यमसुरक्षयकारिभूरि ॥
किंवाहवेषुचरितानितवाद्भुतानिसर्वेषुदेव्यसुरसिद्धगणादिकेषु ४

देवि संग्रामेषुयानिचतवाद्भुतानिचरितानि किंवर्णयाम सर्वेषु असुरदेवगणादिकेषु अचिंत्यानियतः हे
देवि तवरूपमेतत् किंवर्णयामः प्रपंचयामः रूपंकिंभूतंचिंतयितुमशक्यं मनोविषयातीतत्वात् किंचभू
रितानानारूपं तवअतिवीर्यं किंवर्णयामः कीदृशमसुराणांक्षयंकरोतीत्येवंशीलं किंवाहवेषुतवचरितानि
किंवर्णयामः किंभूतानि सर्वेषु असुरदेवगणादिकेषु आश्चर्यकारीणि ४ ॥

रजःसत्वतमोलक्षणगुणत्रयोपाधिकत्वमेव चतुर्दशभुवनानामुत्पत्तौ स्थितौ नाशे च हेतुरपीत्याह हेतुरिति ननु रजोगु
णोपाधिको ब्रह्मा जगदुत्पादकः सत्वोपाधिको हरिः पालकः तमोगुणोपाधिको रुद्रः नाशक इति प्रसिद्धिः तत्कथमहं स
मस्तजगतां हेतुरिति चेत्तत्राह हरिहरादिभिरपि त्वं न ज्ञायसे इति आदिशब्देन ब्रह्मा गृह्यते हरिहरपंक्तावन्यस्यायोगत्वात्
तेपि त्वद्व्यापादिता जगदुत्पत्त्यादिकं कुर्वंतीति न स्वतंत्रा इत्यभिप्रायः ननु सर्वज्ञैर्ब्रह्मादिभिः कथं मत्स्वरूपं न ज्ञायत इत्याकांक्षा
यामाह दोषैरिति त्वज्ज्ञानप्रतिबंधकानां दोषाणां रजःसत्वतमसां महामायाजनितानां तमःस्तोमानां वा विद्यमानत्वात्त
त्स्वरूपं तैर्न ज्ञायत इत्यर्थः मत्वर्थीयाच्प्रत्ययांतेन दोषवत्वं हरिहरादिभिर्विशेषणं तथा वोच्यते अज्ञाने हेत्वंतरमाह
अपारेति कालतो देशतो वस्तुतश्चयः पारः परिच्छेदः तद्रहितेत्यर्थः त्वन्मायाकल्पितत्वात्परिच्छिन्नास्ते तैः कथं अपारि

हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा ॥

च्छिन्ना त्वं ज्ञातव्येत्यर्थः ननु यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्यादिश्रुतितः
सत्यज्ञानानंदरूपस्य ब्रह्मणो जगदुत्पत्त्यादिहेतुत्वं प्रतीयते तत्तन्निष्ठा तद्विषया च या जीवानामविद्या तत्कल्पितत्वं हरिह
रादीनामस्त्विति अतो ब्रह्मविषयमेव ज्ञानं तेषां न मत्स्वरूपविषयमत एव न मन्मायाकल्पितत्वमपीति चेत्तत्राह सर्वाश्रये
ति सर्वस्य प्रपंचज्ञानस्याश्रयः उपादानकारणीभूतब्रह्मत्वमेवेत्यर्थः तद्रूपेपि कविहाच्चलिंगता भवतीति सर्वस्या
श्रयः सर्वाश्रयेति न विरुद्धं अथवा कार्यं कारणमाश्रयतीत्याश्रयः कार्यं सर्वः प्रपंचः आश्रयः कार्यं यस्याः सा सर्वाश्रयेत्य
र्थः ननु परिच्छिन्नप्रपंचाश्रयभूतायाः कथमपरिच्छिन्नत्वमिति चेत्तत्राह अखिलमिदं जगदंशभूतमिति तेन त्वमभिव्याप्य

म॰
प्रा॰ टी॰
२०

यथा पटं स्तिष्ठति तथा तत्वबं व्याप्य यदि प्रपंचस्तिष्ठेत तदा तत्व परिछिन्नत्वं स्यात् यत इदमखिलं जगत् ब्रह्मांडमंडपा
भूतं कल्पितं तत् देके देशाश्रितं अनंतब्रह्मांडान्यपि तदंशे प्रविशंति अतस्तत्वमपरिछिन्नं वेत्याशयः ननु विकारवत्स्वप
वाश्रयत्वेन ममापि किं विकारित्वमुच्यते नेत्याह अव्याकृतेति जायते अस्ति वर्धते विपरिणमते पक्षीयते नश्यतीति षड्वि
धभावविकाररहितेत्यर्थः ननु उक्तं यदुक्तमाह हीयतः कारणात् त्वमाया प्रकृतिः परा उत्कृष्टा मायाप्रपंचसंपादयित्री शक्ति
र्यस्याः सा परमा विकारिणो जगन्मूलकारणत्वरूपमाद्य प्रकृतित्वं परमत्वेन संभवति अत उक्तरूपायां तस्यां विकल्प्यां
केवला स्तीत्याशयः ननु प्रधानं जडं जगन्मूलकारणमिति सांख्या वदंति परमाण्वादीनां कारणतां नैयायिकादिभि
रुच्यते तत्कथं जगद्धेतुः सत्यज्ञानमितिचेत् अत्रोच्यते श्रुत्यभ्यास समस्तकृतं ततः करणानां प्राकृतादीनां सर्वाज्ञेता स्तुतिः श्रोत

सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृताहि परमा प्रकृतिस्त्वमाया ५॥

जगत्कारणविषयत्वेयैव व्याख्याता स्तुविता श्रोतं तब जगत्कारणं ब्रह्मैव नान्यजडं प्रधानादीति वादरायणेन ईक्षतेर्नाश
ब्दमित्यादिना प्रतिपादितमनं तत्तद्विषयत्वे वस्तुतिव्याख्यानं दब्रह्मरूपत्वकथं वा तद्विषयतयैव शाक्तादिस्तुतिव्याख्यानमि
ति एतदभिप्रेत्यैव ग्रंथव्याख्यातारवर्यैः शांकराचार्यैः सौंदर्यलहर्यां ब्रह्मरूपेव भवानी वर्णिता निमेषोन्मेषाभ्यां प्रलयमु
दयं याति जगतीत वेत्याहुः संतोय यणिथ यराजस्यतनये त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः परित्रातुं शंके परिहृ
तनिमेषास्तव दृशा इति शाकेन अस्मटीका हे देवि तं समस्त जगतां सृष्टिस्थितिसंहारादीकारणं तत्रिगुणापि सत्वरजस्त
मोरूपापि देवैर्हरिहरादिभिरपि न ज्ञायते किं पुनर्न्ये गुणा यतो पारपारयितृमपारा या यस्या महिम्नः पारो न लभ्यते दे
वितं सर्वाधारभूता इदमखिलं जगत् तवैवांशभूतं हे देवि तवेवांश हे देवि त्वमाद्या परेभ्यः परा प्रकृतिः कोटष्ण अविकृतिः

मप्रकृतिविकृतिविकृति ५॥

हे देवि यस्याः स्वाहात्मकायाः स्वरूपायाः उच्चारणेन समस्तसुरता निःशेषदेवगणः तृप्तिं प्रयाति सा त्वं स्वाहा भवसि यतो देवैः
साहचर्यनियमात् पितृगणस्य च तृप्तिहेतुः स्वधा च त्वमेवासीत्यन्वयः अतो हेतोः त्वं जनैः उच्चार्यसे पितृकर्मसु इति शेषः
ननु हेतोः समस्तजगतामिति श्लोके सर्वजगत्कारणत्वोक्त्या सर्वात्मकत्वेन स्तुतिः कृता तदनंतरं स्वाहास्वधात्मकतया स्तु-
तिर्निंदापर्यवसानी स्यात् पृथिवीश्वरस्योक्तिवत् एवमुत्तरत्र श्लोके ब्रह्मप्राप्तिहेतुविद्यारूपस्तुतिर्विरुद्धा ब्रह्मरूपत्वस्य पूर्व-
मुक्तत्वादिति चेत् अत्रोच्यते स्वाहास्वधात्मकत्वोक्त्या पूर्वोक्तं सर्वात्मकत्वं दृढीक्रियते न हि पृथिवीश्वरस्यापि ग्रामीणेः कृ-

यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥
स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ८ ॥

च्यमानो ग्रामेशस्त्वमेवेत्यायुक्त्या ग्रामेशत्वं निंदापर्यवसायि इदं स्तुतेः क्रमनियमाभावाच्च क्रमनियमाभावश्च प्र-
सिद्धः त्वमेव स्वाहासीत्यादिस्तुतौ अथार्थक्रमेण पाठःक्रमो बाध्यते अग्निहोत्रं जुहोति यवागूं पचतीत्यादिरिव नी-
व्रतया स्तुतिः सर्वांतर्जैर्या सर्वात्मकत्वप्रतिपादनमेव चात्र प्रयोजनं हे देवि त्वं स्वाहासि स्वाहा हुतभुक्प्रिया य-
स्याः स्वाहायाः समुदीरणेन उच्चारणेन सकलेषु मखेषु समस्तदेवसमूहः तृप्तिं प्रयाति हे देवि त्वं पितृगणस्य वै
निश्चितं तृप्तिहेतुः अत एव जनैः स्वधा इति उच्चार्यसे ८ ॥

हे देवि सा प्रसिद्धा त्वमस्यादिवाक्याजन्यब्रह्माकारांतःकरणवृत्तौ स्फुरंती विद्या त्वमसि तत्त्वमस्यादिवाक्यजायमानांतःकरणवृत्तिर्ब्रह्मस्वरूपावारकमज्ञानं नाशयति ब्रह्मस्वरूपं तु स्वतएव स्फुरतीति विद्या ब्रह्मस्वरूपैवोच्यतेस्माभिः श्रवणादीनामविद्यानिवृत्तावेवोपयोगात्स्वरूपात्मिका या विद्या या जन्यत्वमपि न शंकनीयं केचित्तु ब्रह्मविषया विद्येति वदंति तन्मते वृत्त्यात्मकेनैव विद्याया न विद्यात्मकता ब्रह्मणः फलविषयत्वयोगात् भगवती भगशब्दवाच्यैश्वर्यादिषड्गुणसंपन्ना ब्रह्मविषयेति केचित् परमा श्रेष्ठा उत्तमा श्रेष्ठत्वमेव प्रतिपादयन्नाह यामुक्तिहेतुरिति सा विद्या या मुक्तये इति वचनात् अचिंत्यमनन्तश्रेयं महाव्रतं साधनं यस्याः सा तथा महाव्रतमाह भगवान्पातंजलिः अहिंसासत्यास्तेयब्रह्मचर्या

या मुक्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यस्यसे सुनियतेंद्रियतत्त्वसारैः मोक्षार्थि
भिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भगवती परमा हि देवी ८॥

परिग्रहा इति हिंसा द्रोहो हे देवि यस्माद्विद्यासि अतस्त्वं मुनिभिर्मननशीलैरभ्यस्यसे सम्यङ्नियतानि वशीकृतानींद्रियाणि यैस्ते सुनियतेंद्रियाः तत्त्वं ब्रह्मैव सारो येषां ते तत्त्वसाराः सुनियतेंद्रियाश्च ते तत्त्वसाराश्चेति विग्रहः अस्ता ध्वस्ताः समस्ता दोषा रागादयो येषां तैः अथवा हे देवि या त्वं मोक्षार्थिभिर्मुनिभिरभ्यस्यसे ध्यायसे अतो मुक्तिहेतुर्मुक्तिदा कीदृशपि अविचिंत्यमविचारणीयं महाव्रतं यस्याः किंभूतैः सुनियतेंद्रियतत्त्वसारैः नियमितेषु इंद्रियेषु ज्ञानस्य सारो येषु तैः अस्तसमस्तदोषैः निराकृतः समस्तदोषो यैः तैः हे देवि परमा विद्या आन्वीक्षिकी इति परं ज्ञानतत्वं ८॥

शब्दात्मिका शब्दब्रह्मस्वरूपा ऋक् ऋग्वेदः यजूंषि यजुर्वेदः शाखात्वाभिप्रायं बहुवचनं यजुर्वेदस्य षडशीतिशाखात्मकत्वा
त् सुविमलानि निर्दोषाणि वृत्तानि ऋग्यजूंषि चेति विग्रहः तेषां साम्नां च निधानमाश्रयेत्यर्थः साम्नामित्यपि बहुवचनं
शाखात्वाभिप्रायं सहस्रशाखात्मकत्वात्सामवेदस्य निधानशब्दो नपुंसकलिंगः तेन न स्त्रीलिंगता उद्गीत उच्चैर्गानं तेन र॰
म्यः पदानां पाठो विद्यते येषु सामसु तानि रम्यपदपाठवंति तेषां उद्गीथेति पाठे उद्गीथः प्रणवो मंत्रः सर्वव्यापी निरंजन
इति नैगमाभिधानात् तेन रम्यपदपाठवतामिति सर्वेषामेव विशेषणं ब्रह्मणः प्रणवं कुर्यादादावंते च सर्वदा स्रवत्यं॰
नोंकृतं पूर्वं पुरस्ताच्च विशीर्यतीति मनुः अस्यं त्रयी वेदत्रयीस्वरूपात्वं अथर्वणस्तु शांतिकपौष्टिकतयैतेष्वेवांतर्भावा
त् पृथगनभिधानं देवयति सर्वान् प्रवृत्तिनिवृत्त्युपदेशेन व्यवहारयतीति देवी भगवती वीर्यातिशयशालिनी सर्वप्रा॰

शब्दात्मिका विमलऋग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नां देवी त्रयी भगवती भवभावनाय वार्तासि
णिभ्यो बलीयस्त्वात् भवः संसारस्तस्य भावनायानुवर्तनाय वार्ता कृष्यादिलक्ष (सर्वजगतां परमार्तिहंत्री ८
णा कृषिवाणिज्या तद्वत्तृतीयं पशुपालनं विद्या ह्येता महाभागवतवृत्तित्रयाश्रयेति विष्णुपुराणे वार्त्तायाः॰
कृष्यादिरूपत्वमुक्तं परमार्तिहंत्री पीडातिशयनाशिनी भवभावनाय संसारत्राणार्थं त्रयी वेदस्त्वमित्यन्वयः अन्यत्रा
ह भवभावनाय संसारस्थितये त्रयीत्वं यज्ञोपदेशात् तथा चाहुः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जा
यते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इति हे देवि त्वं शब्दब्रह्ममयी त्वं वेदत्रयरूपा वेदाश्रयत्वमेव तथा विमलऋग्यजुषां निधा
नं ऋग्यजुषां त्वमेव निधानं साम्नां च निधानं त्वं किंभूतानामुद्गीथरम्यपदपाठवतां उद्गीथः प्रणवः तेन रम्याणि
पदानि तेषां यः पाठः स विद्यते येषां तानि तेषां अत एव भगवती ॥

स॰
श॰ टी॰
२९

चतुर्दशविद्याज्ञानवती तथा त्वं वार्त्ता कृषिः पाशुपाल्यं वाणिज्या च वार्त्ता एतावता आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिलक्ष
णा राजविद्याचतुष्टयमपि त्वमेव किमर्थं संसारोत्पत्तये तथा त्वं सर्वजगतां उत्कृष्टव्यसनापनोदका भोजनाच्छादनादिमू
र्त्ता ८ मेधा सरस्वतीरूपा त्वमेवासि अथवा मेधा धारणाशक्तिः यथा वेदादिरूपः पाठ्यमानः स्थिरीक्रियते विदितोऽखिल
शास्त्राणां सारः तत्त्वं रहस्यं वा यया दुर्गा दुर्जेया दुर्गो दुःखबहुलो देशो यो भवः संसारः तद्रूपः समुद्रः तत्र नौर्दिव्यनौः पारगति
साधनं असंगा अप्रतिहतप्रसरा अद्वितीया वा नौस्तु कर्णधारवाहकयुक्ता त्वं तु तद्रहितापि तारयसि श्रीर्लक्ष्मीः हरे
र्हृदये एकपरा द्वितीया कृतोऽधिवासः स्थितिर्यया अथवा कैटभारेर्हृदये एकस्मिन् कृतोऽधिवासो यया सा श्रीस्त्वं श

29

मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसंगा श्रीः कैट
भारिहृदयैककृताधिवासा गौरि त्वमेव शशिमौलिकृतप्रतिष्ठा ९॥

शिमौलौ हरे कृता प्रतिष्ठा आस्पदं यया शशिमौलेरीश्वरस्य कृता प्रतिष्ठा उत्कर्षो ययेति वा सा गौरि त्वमेव यद्वा
हे देवि त्वं मेधासि कालांतरेणाप्यविस्मरणरूपा तथा विदिताखिलशास्त्रसारा विदितो ज्ञातोऽखिलशास्त्रसारो य
या हे देवि त्वं दुर्गासि परेषामगम्यासि तथा असंगा असंवलती दुर्गभवसागरनौः विषमस्य संसारसमुद्रस्य तरीः त्वये
व नौरूपेण संसारसागरं सुखेनैव तरंति संतः हे देवि त्वं श्रीः प्रत्यक्षमूर्तिमती लक्ष्मीः कैटभारिहृदयैककृताधिवा
सा श्रीविष्णोर्हृदयमाश्रित्य स्थिता अपरं गौरी त्वमेव किंभूता शशिमौलिकृतप्रतिष्ठा चंद्रशेखरस्याधिरूढवामभा

ईषद्धासेन सह वर्तते तदीषद्धासं तद्भक्तो वर्णविपर्ययः ईषन्मात्रेयथा भवति तथा विलोकेति क्रियाविशेषणं वा ह
सेन सहितं सहासं परिपूर्णचंद्रबिंबमनुकरोतीति तच्छीलं परिपूर्णचंद्रबिंबानुकारि आह्लादकारित्वात् कनकोत्तमं
अत्युत्कृष्टकांचनं तस्य कांतिर्यस्य कनकाद्युत्तमा कांतिर्यस्येति वा अत एव कांतं मनोहरं कनकोत्तमकांति व
कांतमित्येकं वा पदं एतेन देव्याः स्निग्धगौरांगत्वं सूचितं तथा तादृशमपि ते वक्त्रं विलोक्य महिषासुरेणायत्सह
तं तदत्यद्भुतमत्याश्चर्यमित्यर्थः प्रहृतमिति नपुंसके भावे क्तः प्रहारः कृत इत्यर्थः अथवा अतिशयेन मनोज्ञत्वात् अ
त्यद्भुतमाश्चर्यजनकं ते मुखं विलोक्य तथापि तामससस्वभावादविचारेण प्रहृतमिति योजना अविचारेण प्रहारकर

ईषत्सहासममलं परिपूर्णचंद्रबिंबानुकारि कनकोत्तमकांतिकांतं ॥
अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ९

णे हेतुगर्भविशेषणं आत्तरुषेति आत्तक्रोधेनेत्यर्थः आत्तरुषेति बहुव्रीहिस्तत्केषु पादः तथापि समेवार्थः क्रोधा
दिमद्दुरयोग्यं भवति किमपि न विचारयंतीति अतः आत्तरुषा महिषासुरेण अत्यद्भुतं मुखं विलोक्यापि त
थापि सर्वोत्कृष्टेपरा प्रहृतमिति वा तथा शब्दो योजनीयः सहसा बलेन दृष्टे देवि तव एवंविधं वक्त्रं विलोक्य सह
सा महिषासुरेणात्तरुषा सकोपेन सता यत्प्रहृतं एतन्मे चित्रं तदद्भुतं किंभूतं तस्मिन् तदुक्तं तथा अमलं निर्मलमत्यं
तं निर्मलमत एव परिपूर्णचंद्रबिंबानुकारि परिपूर्णचंद्रमंडलमनुकरोतीति तथा कनकोत्तमकांति कांतं
कनकस्य या उत्तमा कांतिः तद्वत्कांतं मनोहरं १०॥

स॰
प्रा॰ टी॰
३

30

हे देवि कुपितं ते मुखं दृष्ट्वा तत्क्षणान्महिषः प्राणान् यन्न मुमोच तदेवाश्चर्यं भ्रुकुट्या भालकौटिल्येन करालं भीषणं उ
द्यच्छशांकसदृशाच्छवि रोषारुणं हि यस्मात् कुपितस्यांतकस्य यमस्य दर्शनेन कैर्जीव्यते जीवितं धार्यते अपि तु न कै
श्चिदित्यर्थः हे देवि नवकुपितं भ्रुकुटीकरालं मुखं दृष्ट्वा महिषः यत्सद्यः प्राणान्न मुमोच तदतीव चित्रं अद्भुतकारि की
दृशं मुद्यच्छशांकसदृशाच्छवि कुंकुमारक्तत्वात् उद्यच्छशांकसदृशी छविः कांतिर्यस्य तत् एवंविधवदनदर्शनेनापि
महिषो न परासुर्यद्भूवे (प्रसीदप्रम) तदाश्चर्यं कुतः हि यस्मात् कुपितांतकदर्शनेन कैर्जीव्यते कुपितांतकदर्शनेन को
हि जीवति न कोपीत्यर्थः ११ प्रसीद प्रसादं कुरु परमा प्रकृष्टा सा तु अग्रह सती भवती भवाय उद्भवसंपदे इत्यर्थः यद्वा

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशाच्छवि यन्न सद्यः प्राणान्मुमोच महिषस्तदतीव चित्रं॰
कैर्जीव्यते हि कुपितांतकदर्शनेन ॥ देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कु॰
लानि विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य १२॥

भवाय भावनाय संसारविभूतिजननाय भवती परमोत्कृष्टा प्रसादपरमेति पाठे प्रसादेन परमा भवती भवाय
स्थितिं प्रकल्पते कोपवती कुलानि गणान्नाशयसि एतदधुनैव विज्ञातं यदेतन्महिषासुरस्य सुविपुलं बलं सैन्यं
अस्तं नीतं नाशं प्रापितं त्वत्कोपेनास्य दैत्यबलस्य नष्टत्वादिदानीं कोपावस्थाने स्वरान्नाशयति अतः कोपं परित्य
ज्य प्रसन्ना भवेत्यभिप्रायः हे देवि प्रसादपरमा सती भवाय उदयाय भवति कोपवती सती सद्यः कुलानि विना
शयसि देवि एतदधुनैव विज्ञातं यन्महिषासुरस्य विपुलं बलमस्तं नीतं १२॥

३

सदाभ्युदयदा भवती येषां प्रसन्ना ते पुरुषा जनपदेषु सम्मानभाजः स्वग्रामादौ सम्मता इति किमाश्चर्यमित्यर्थः
अपरं तेषां धर्मवर्गो न सीदति अवसादं न लभते धर्मशब्दोयं धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयस्योपलक्षणं ध
न्याः श्लाघ्या निभृता विनीता आत्मजभृत्यदाराः पुत्रसेवकस्त्रियो येषां ते सदा जनपदेषु सम्मता इत्यादि वा सदा प्राह्लात्व
यः हे देवि लोकेषु ते वल्लभाः तेषां यशांसि प्रसरीसरंति तेषां बंधुवर्गो न सीदति तएव श्लाघ्या जन्मानः कीदृशा नि
भृतात्मजभृत्यदाराः स्थिरतराः अविनश्वराः पुत्राः सेवकाः कलत्राणि येषां ते येषां भवती प्रसन्ना सदाभ्युदयदा अभ्यु
दयं ददासीति १४ हे देवि सुकृती अत्यादृतः प्रतिश्रद्धावान् सदैव धर्म्याणि धर्मादनपेतानि सकलानि कर्माणि करो

ते सम्मता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति बंधुवर्गः धन्यास्त एव निभृतात्मजभृत्यदा
रा येषां सदाभ्युदयदा भवती प्रसन्ना १५ धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृ
तीकरोति स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेपि फलदा ननु देवि तेन १६

ति भवत्या अनुग्रहात् त
तः कर्मणो हेतोः स्वर्गं ब्रह्मलोकादिलक्षणं प्रयाति चकारान्मोक्षं च लभते ननु भो देवि तेन कारणेन लोकत्रयेपि इह
स्वर्गमोक्षेपि फलदा त्वमिति योजना भवतीप्रसादादित्यत्र छेदो नु रोधान्न पुंवद्भावः भवतीति भिन्नं वा पदं प्रसादात्
प्रसन्नतया ननु भो देवि तेन हेतुना भवती लोकत्रयेपि फलदेत्यन्वयः तत्र हि कं फलं सत्कर्माचरणीयं स्वर्गीयं स
ुखानुभवः मौक्तिकं नित्यानंदोद्भवं लोकद्वय इति पाठे इहलोके चेत्यर्थः हे देवि पुण्यवान् सर्वेषु कालेषु प्रतिदिनं सकला
नि धर्म्याणि कर्माणि करोति यतस्त्वदनुग्रहात्स्वर्गं प्रयाति निश्चितं देवि तेन कारणेन लोकद्वयेपि वरदा उभयलोकसुख

स॰
प्र॰ टी॰
३२

दुर्गे संकटे प्रदेशे स्मृता सती अतीव शुभां मतिं मोक्षादिसाधनभूतां बुद्धिं ददासि दारिद्र्यं निर्धनता दुःखं प्रतिकूलवेदनीयं भयमनागतप्रतिकूलसंधारणं एतत्त्रितयं हरति तच्छीला दारिद्र्यभयहारिणी तस्याः संबोधने हे दारिद्र्यदुःखभयहारिणि सर्वेषामुपकारसंपादनाय सर्वेषु कालेषु आर्द्रचित्ता स्निग्धचित्ता त्वदन्या का न कापीत्यर्थः दैत्यानामपि हनने मोक्षादिप्रमाणाभावात् सर्वोपकारकत्वं कथमित्याशंक्य समाधत्ते एभिरिति हे देवि दुर्गे विषमे स्मृता सती समस्तजन्तस्य भयं हरसि अपनयसि स्वस्थैः स्मृता सती अतीव शुभां मतिं ददासि हे दारिद्र्यदुःखभयहारिणि दारिद्र्यदुःखभयं हरत्येवंशीले त्वदन्या का सर्वोपकारकरणाय प्रत्यक्षमार्द्रचित्ता स्यात् सर्वेषामुपकारं कर्तुं त्वमेव समर्थ

31

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता १५ एभिर्हतैः सुखमुपैति जगत्तथैते कुर्वन्तु नाम नरकाय चिराय पापं
संग्राममृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान्विनिहंसि देवि १८॥

यान्याशंक्य यदुक्तं सर्वोपकारः पुण्याय पापाय परपीडनमिति एभिरसुरैर्हतैः सद्भिर्जगत् सुखमुपैति प्राप्नोति प्रह्लादादिभ्यस्तृतीया एतेषु तेष्वित्यर्थः तथा एते असुराश्चिराय चिरकालं नरकार्थं पापं प्रतिकूलं कुर्वन्तु नाम नामशब्दोऽभ्युपगमे अथवा नामशब्दोऽभ्युपगमवाची नकारो निषेधार्थः अथवा नामशब्दो नरकवाची नामसंज्ञकनरकाय पापं न कुर्वन्तीत्यर्थः संग्राममृत्युमधिगम्य च दिवं प्रयान्तु इति मत्वा अहितान् रिपून् विनिहंसीत्यन्वयः नूनमित्युत्प्रेक्षायां हे देवि नूनं निश्चितमिति मत्वा शत्रून्मारयसि इति किमेभिरसुरैर्हतैर्जगद्धि सुखमुपैतु नाम इति प्रकारेण सत्येव तथैते चिराय चिरं नरकाय पापं कुर्वन्तु पुनः संग्रामे मृत्युमधिगम्य वराकाः दिवं प्रयान्तु इति उत्प्रेक्षा व्याख्यापादयसि १८

भवती दृष्ट्वैव विलोकैव सर्वासुरान् भस्म किं न करोति अपि तु करोत्येव दृष्ट्यैवेति पादे दर्शनेनैवेत्यर्थः एवं सति अरि
षुयष्ट्कसंप्रहिणोषि व्यापारयसि तद्रिपवोपि हियस्मात् शास्त्रपूतां लोकान् इंद्रलोकान् प्रयांतु अत्यंएवं प्रकारा साधी
परोपकारनिरतामतिः तेषु द्विते षुपितवु भवति पंचमहापातकिनो रणे हताः सद्गतिं लभंते भवति तेषु पितेति साधी
तिपादे अपि शाहत्तवुशाह्लाथ्याह्लादं विनैव योजना तेषु रिषु पिते तवाति साधी मतिर्भवतीत्यर्थः दैदेवि तं सर्वासुरान्
किं दृष्ट्यैव भस्म न करोषि अपि तु विदधासीव अरिषुयष्ट्कसंप्रहिणोषि प्रहरणं संवसि तत्रेदं कारणं तवाद्विते षुपि अत्यंसा
धीमतिर्भवति सदयत्वात् यद्रिपवोपि शास्त्रपूताः संतः शुभांल्लोकान्प्रयांतु यथारिपूणामपि शोभना गतिर्भवतु भस्मीभू

दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शास्त्रं लोकान्प्रयांतु रिपवोपि हि शास्त्रपूताः इ
त्यं मतिर्भवति तेषु द्वितेषु साधी ९ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन दृशोसुराणां
यन्नागता विलयमंशुमदिंदुखंडयोग्याननं तव विलोकयतां तदेतत् १०

ताः सद्गतिं न लभंते ९ अर्थाितव यः खड्गः
तस्य प्रभानिकरो दीप्तिसमूहः तस्य विस्फुरणैः सर्वतः प्रसरणैः तथा तेनैव प्रकारेणोग्रैर्भयानकैः शूलाग्रस्य शूलश्रेष्ठ
स्य कांतिनिवहेन दीप्तिसमुदायेन चासुराणां दृशः चक्षूंषि विलयं विनाशं यन्नागताः तदेतदाश्चर्यमिति शेषः अथवा
दृशो विलयं नागताः तत्तत्र विनाशप्राप्तौ एतत्तवाननं विलोकनकारणमिति योज्यं कथंभूतमाननं अंशुमत् दी
प्तिमत् इंदुखंडयोग्यं अर्धचंद्रान्वितं च तदृक्तस्य चंद्रकिरणसंपर्केवशाद् दृशोननष्टा इति फलितार्थः दैदेवि यः ख
ड्गप्रभानिकरविस्फुरणैः प्रद्योतनैरुग्रैः तथा शूलाग्रकांतिनिवहेनासुराणां दृशो विलयं न प्राप्ताः तदेतत्तवाननं ॥

विलोकयतां फलं तव वक्त्रविलोकनेनैव रिपुरूपाः स्फुटिताः किंभूतमंशुमदिंदुखंडयोग्य[illegible]मतो मदूख भूमि
तस्येंदुखंडमायोग्य[illegible]स्तनकरान्स्तनाग्राप्यायते न तेषां वक्त्रदानि: १८ हे देवि दुर्वृत्तवृत्तशमनं दुर्मनचे
ष्टानां तव शीलं चरितं मध्याय तत्परिदृश्यमानं तव रूपं सौंदर्यं अविचिंत्य वक्तुमशक्यं अन्यैः सदृशतुल्ये तव वीर्यं च
हंतृ दैत्यानां पराक्रमो यैः [illegible] मतहतत्तद्हंत नाशकं हृतदेवपराक्रमाणामिति कर्मणि षष्ठी अथ मनेन सर्वोत्कर्षत्व
व्यापारस्ततत्वमेव मध्यनरूपेण प्रकारेण वैरिष्वपि दयैव त्वया प्रकटिता अथवा इत्थमेवं सत्यपि दया शास्त्रेण हननलः

दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः वीर्यं
च हंतृ हृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थं १९

क्षणेति व्याख्येयं शास्त्रेण हताः पापिनोपि यतः सुयंते उक्तं च द्वावेतौ प्रथितौ लोके सूर्यमंडलभेदिनौ परिव्राड्यो
गयुक्तश्च रणे चाभिमुखो हतः इति हे देवि तव शीलं चरित्रं दुर्वृत्तवृत्तशमनं दुर्वृत्तानामन्यायिनां वृत्तस्य शमनं
शमयितृ तथैतद्रूपमन्यैरतुल्यं निरुपमं कीदृशमविचारणीयं कथमेवं रूपमजायत इत्यं विचारयितुं न शक्यते
तथा च वीर्यं चान्यैः अतुल्यं किंरूपं हतदेवपराक्रमाणां हंतृ हतो नाशितो देवानां पराक्रमो यैस्तेषां दैत्यानां हिंसकं
हे देवि त्वयेत्थं शस्त्रघातकैः स्वर्गप्रापणेन वैरिष्वपि दया प्रकटिता १९ ॥

32

हेदेवितवास्यपराक्रमस्यकेनोपमाभवतु नकेनापीत्यर्थः शत्रुभयहारि शत्रूणांभयदंरूपंअतिहारि अतिशयेनम
नोहरमप्येवंरूपंकुत्रनकुत्रापि किंतुभुवनत्रयेपितव्येवेत्यन्वयः हेवरदेवांछितप्रदे चित्तेकृपासंग्रामेनिष्ठुरताचभुवनत्रयेपि
त्वय्येवदृष्टानान्यत्रेत्यर्थः हेदेवितवपराक्रमस्यकेनसहोपमाभवतु निरुपमंतावत्तवबलं तथेदमतिहारि अतिम
नोहरंरूपंकुत्रैवंविधंरूपंक्वास्तिकीदृशंशत्रुभयकारि रिपूणांभयावहं चित्तेकृपासमयेनिष्ठुरताचतव्येवदृष्टारूपकृ
पानिष्ठुरतयोरैक्यं त्वय्येवदृष्टाः नान्यत्रभुवनत्रयमध्ये २० एतदखिलंसमग्रंत्रैलोक्यंरिपूणामसुराणांनाशनेनत्वयात्रातंपा

केनोपमाभवतुतेस्यपराक्रमस्यरूपंचशत्रुभयकार्यतिहारिकुत्र चित्तेकृपासमरनिष्ठुरताचदृष्टात्वय्येवदे०
विवरदेभुवनत्रयेपि २० त्रैलोक्यमेतदखिलंरिपुनाशनेनत्रातंत्वयासमरमूर्धनितेपिहत्वा नीतादिवंरिपुग
णाभयमप्यपास्तमस्माकमुन्मदसुरारिभवंनमस्ते २१ शूलेनपाहिनोदेविपाहिखड्गेनचांबिके घंटास्वने
ननःपाहिचापज्यानिःस्वनेनच २२॥

लितंतेअस्माकंरिपुगणाअपिरणमूर्धनिसंग्रामप्रधानेस्थानेहत्वादिवंनीताःस्वर्गंप्रापिताइत्यन्वयः उद्रिक्तोमदो
हंकारोयेषांसुरारीणांतेभ्योभवंजातंभयमप्यस्माकमपास्तमपानीतं अतस्तेतुभ्यंनमः नमस्कारातिरिक्तप्रत्यु
पकारकरणेनास्माकंसामर्थ्यमितिभावः हेदेविएतद्भुवनत्रयंत्वयारक्षितं तेरिपुगणाहत्वास्वर्गंनीताः अस्माकंमत्तदैत
त्यसंभवंभयमपास्तं एतद्गुणजातंत्वय्येवनान्यत्र २१ चापज्यानिःस्वनेनधनुर्गुणविनिर्गमनादाप्तसंचातस्यरवेणपाहि
एतत्करणमंत्रैः शूलादिभिरस्मांस्त्रायस्वेतिसमुदायार्थः २२॥

33

दक्षिणे दक्षभागे भ्रमणेनभ्रमणेन संज्ञापूर्वविधेरनित्यत्वात् वृद्ध्यभावः तथा सर्वैराक्रमयामास्यशस्त्रसंकाशैः
पदैरिति इत्यर्थः काशिकायां के केनचित्वमिति वचनात् शूलस्य उत्तरस्यामित्यत्र केचिद्रूपे धातुसंधिरभावः उत्तरस्यां च दिशि रक्षस्व
मिव्यापारेणास्मान्रक्षस्वेति योज्यं २३ सौम्यानि सत्त्वप्रधानानि स्थितिव्यापाराणि अत्यंतमतिशयेन घोराणि संहारकारकाणि च
अत्यर्थं घोराणीति क्वचित्पाठः तेषामर्थः संहारकृत्प्रयोजनवशात् घोराणि भयानकानि तैरस्मान् रक्ष भुवं पृथिवीं च रक्ष

प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि २३॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते यानि चात्यंतघोराणि तै रक्षास्मांस्तथा भुवं २४
खड्गशूलगदादीनि यानि चास्त्राणि तेंबिके करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः २५॥

यानि धर्मज्ञानवैराग्यैश्वर्यसंपन्नत्वात्सौम्यानि रूपाणि यानि चाधर्माज्ञानावैराग्यानैश्वर्यप्राप्तिसंपन्नत्वात् घोराणि तै
रस्मान् रक्ष ततः सप्तम्यर्थे भुवं मर्त्यलोकवासिनश्च रक्ष २४ आदिशब्देन धनुःप्रासतोमरादीनां ग्रहणं करपल्लवैः संगः
संसर्गो विद्यते येषां तानि तैरस्मान्सर्वतः सर्वप्रकारेण वा रक्षेत्यर्थः हे अंबिके खड्गशूलगदादीनि यानि ते तवास्त्रा॰
णि वर्तंते किंभूतानि करपल्लवसंगीनि पाणिपंकजे वर्तमानानि तैः अस्त्रैः सर्वासु दिक्षु सर्वकालमस्मान्रक्ष २५॥

नंदनोद्भवैर्देवोद्यानजातैर्गंधैः श्रीरागादिभिः अनुलेपनैः श्रीखंडादिभिः सा जगतां धात्री विश्वजननी सुरैर्देवैरेवं पूर्वोक्तप्रकारेण स्तुता तथा नंदनोद्भवैः नंदनवनसमुत्थैः दिव्यैः कुसुमैर्गंधानुलेपनैरर्चिता २६ न केवलमर्चिता धूपिता च दिव्यैर्मनोहरैर्धूपैः सर्वसुरप्रधानत्वात् स्तुतिः शक्रेणैव कृता अन्ये सुराः स्तुतावनुमंतारः अत एषामौपचारिकं स्तुतिकर्तृत्वमादाय सुरैरिति बहुवचनं अन्यथानेकसुरसंभवात् एकाकारणशाहूनिर्गमो न स्यात् प्रस्तुतकोलाहलवर्णादेकस्यापि शाहूस्यार्थप्रतीतिर्न स्यात् गुण ‥ नुरूपा वा च स्तुतिर्न सहुणाय यत्नाहूपा अर्चनादिकं तु सर्वकर्तृकं विरोधाभावात् स

ऋषिरुवाच एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः अर्चिता जगतां धात्री तथा गंधानुलेपनैः २६ भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् २७ देव्युवाच ॥ व्रियतां त्रिदशाः सर्वैर्यदस्मत्तोभिवांछितं ददाम्यहमतिप्रीता स्तवैरेभिः सुतोषिता २८ कर्त्तव्यमपरं यच्च दुष्करं तन्निवेद्यतां २९॥

यदि च सर्वैरेव स्तुतिः कृतेत्याशयः तदि ... त्या ‥ एकवचनप्रयोगो स्यात् ततः सुरगणाः समूहरूपतो ज्ञेयः सा देवी समस्तैस्त्रिदशैर्भक्त्या दिव्यैर्धूपैर्धूपिता सती समस्तान् प्रणतान् सुरान् प्रति प्राह कीदृशी प्रसादसुमुखी प्रसन्ना २७ हे सर्वे त्रिदशाः अस्मत्तः अस्मत्सकाशात् भवद्भिरभिवांछितं व्रियतां अतिप्रीत्या प्रीत्यतिशयेन अतिप्रीतेति वा पाठः हे देवाः सर्वे त्रिदशाः यदस्मत्तोऽभिवांछितं तद्याच्यतां अहमेभिः स्तवैः तोषिता आवर्जिता अतिप्रीता इत्थंभूता सती सर्वं ददामि २८ अपरं अन्यत्कर्तव्यं दुष्करं यच्च तन्निवेद्यतां आयंस्ताकः काचित्कः अपरमपि यदुष्करं कर्त्तव्यं कार्यं तत्कथ्यतां २९॥

स॰ यत्कर्तव्यं तत्त्वया सर्वं कृतं यत्त्वस्मादयं त्वया निहतः एतावतैव त्वया सर्वं कृतं भगवत्या सर्वं कार्यं कृतं किंचिदपि कर्तव्यं ना
प्रा॰ टी॰ वशिष्यते अकृतं किमपि नास्ति यदस्माकं शत्रुरयं महिषासुरो निहतः एतावता सर्वं पर्याप्तं ३ अस्माकमिति चतुर्थ्यर्थे ष
३४ ष्ठी नोस्माकं यदि वरो देयः तर्हि अस्माकं परमापदो हिंसेथाः इत्यन्वयः हिंसेथाः इति हिंसिधातुस्तु रुधादिगणोपि पठ्यते न
त्वात्मनेपदमिति केचित् रुधादिगणस्थस्य परस्मैपदित्वात् हिंस्याः इति स्यात् कथं विदा नेपदानयने पि हिंसीथाः इ
ति स्यात् केचित्तु अदादिगणस्थस्य हिंसेथाः इति वदंति तन्न छंदे अदादि प्रभृतिभ्यः शप इति शपो लुकि कृते विधिलिङ्यात्म
34 नेपदमध्यमपुरुषैकवचने हिंसीथाः इत्येव स्यान्न हिंसेथाः इति हिंसीथाः इत्यपि वित्यादः हिंसेर्णिच् ततआत्मनेपदं वि

देवाऊचुः भगवत्या कृतं सर्वं न किंचिदवशिष्यते यदयं निहतः शत्रुरस्माकं महिषासुरः ३ यदि वापि वरो देयस्त्वया
स्माकं महेश्वरि संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ३५ यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदां वृद्धयेस्मत्प्रसन्ना त्वं भवेथाः सर्वदांबिके ३६

यौ ल्लिङ् पृषोदरादित्वात् सिचो लोपः हिंसेथाः इति केचित् हिंसेः इति संबोधनं थाः इत्यर्थे इति वा एवं सत्यपि हे महेश्वरि त्वया अ
स्माकं वरो देयः तत् संस्मृता सती त्वं नोस्माकं परमापदः उत्कृष्टकष्टानि हिंसीथाः अपनुदः ३५ च अपरं यो मर्त्यः मरणधर्मा
मनुष्य एभिः पूर्वोक्तैः स्तवैः त्वां स्तोष्यति तस्य वित्तं वेदनं ज्ञानं ऋद्धिरुपचयो विभवः ऐश्वर्यं तैः धनदारादिसंपदां वृद्धय उप
चयाय अस्माकं प्रसन्ना सती त्वं सर्वदा भवेथाः इत्यर्थः अथवा वित्तं उत्तमं तत्र धनं वृद्धिः समृद्धिः विभवो भोगः तैः धनदारादिसंप
दां वृद्धये भवेथाः वित्तादिभिर्धनादीनां वृद्धिर्भवति अर्थैः रथानि बाध्यं गजैरिव महागजा इति न्यायात् अन्यच्च ॥

हे देवि मर्त्यो मनुष्य एभिः स्तवैः त्वां स्तोष्यति तस्य वित्तर्धितनयैः वित्तस्य वर्धनेन तथा पुत्रैश्च सततदा भव तथास्मत्प्रसन्नास
तीयनदारादिसंपदं हृदये भवेथाः भूयामा वा त्मनेपदे अमलानने निर्मलमुखि ३४ इत्युक्तप्रकारेण जगतः आत्मनश्चार्थम
हे कल्याणं कलयत्या जनयतीति भद्रकाली अन्तर्हिता ऽदृश्या बभूव हे नृप भद्रकाली सर्वदेवतेजःसंभवा भद्रकाली तुष्य
ते देवैर्विश्वस्य तथात्मनोर्थे इति प्रसादिता सती तथेत्येवं कर्तव्यमित्युक्त्वा अन्तर्हिता बभूव अदृश्या आसीत् ३५ हे पृथिवीपते संभू
ता आविर्भूता न ... तान्ययैव भ्रमितव्यं एवं प्रतिपादितसर्वात्मविरोधत्वात् इति हत्सांतरं सूचयति पुनरिति त्रैलोक्यस्य हित
मिच्छतीति यत्कथितं हे भूप सा देवी यथा पुरा एवं देवशरीरेभ्यः संभूता किंभूता जगत्त्रयहितैषिणी ३६ पुनश्च गौरी देहा

ऋषिरु॰ इति प्रसादिता देवैर्जगतोर्थे तथात्मनः तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ३५ इत्येतत्कथितं भूप संभूता
सा यथा पुरा देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ३६ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् वधाय दुष्टदैत्यानां तथा
शुम्भनिशुम्भयोः ३७ रक्षणाय च लोकानां देवानामुपकारिणी तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ३८ इति श्रीदेवीमा
हात्म्ये शक्रादिस्तुतिर्नाम चतुर्थो

र्वती शरीरे आसन्नमासो ऽवस्थितिर्यस्याः सा गौरी देहा सा गृहीत गौरी शरीरेत्यर्थः अथवा गौ
र्याः देहः शरीरकोशापरदेहो देहकारणं यस्याः सा गौरी देहा शाकपार्थिवादित्वान्मध्यपदलोपी समासः अथवा गौर्या देहा देवा
त्समुद्भूता गौरी सैव देहो यस्याः सा गौरीति माहात्म्यादेवी गृहीत देहा सती यथा समुद्भूताभवत् तच्छृणुष्वेत्यग्रिमेणान्वयः देहदेहे
त्समाहृत्य यथा येति पुनरपि सा देवी यथा पुरा गौरीदेहात्समुद्भूता किमर्थं दुष्टदैत्यानां तथा शुम्भनिशुम्भयोर्वधाय ३७ तच्छृणुष्व मया
ख्यातमित्येको वाक्यार्थः तेन भव्यं यथावत्कथयामीत्यमरः लोकानां देवानां च रक्षणाय समुद्भूता कीदृशी उपकारिणी सदेवोप
कारनिरता ततो मयाख्यातं शृणुष्व तेन च यथाहं ते तत्कथयामि ३८ इति श्रीदेवीमाहात्म्यटीकायां चतुर्थोध्यायः ॥४॥

म॰ पा॰ टी॰ ३५

इदानीं देव्या माहात्म्यांतरमाविर्भावासुरनंतराध्यायसूचितमितिहासमवतारयन्नाह पुरेति अत्र शुंभादनुजाभ्यां तथा च वामनपुराणे तस्यां पुत्रत्रयं जज्ञे महत्सत्त्वबलाधिकं ज्येष्ठः शुंभ इति ख्यातो निशुंभश्चापरः स्मृतः तृतीयो नमुचिर्नाम महाबलपराक्रमः शचीपतेरिंद्रस्य मदो गर्वः बलं शक्तिः तयोराश्रयात् दैत्यपक्षे शुंभनिशुंभाभ्यां देवेंद्रस्य त्रैलोक्यं यज्ञभागाश्च हृताः मदस्य बलस्य दर्पस्य पराक्रमस्य चाश्रयात् १ सूर्यस्य भावः सूर्यता रविलक्षणमधिकारं ऐंदवमिंदुसंबंधिनं कौबेरमधिकारं वरुणस्य चाधिकारं कृतवंतौ तावेव शुंभनिशुंभौ सूर्यत्वं चक्रतुः सूर्य इवाचरतः इंदोः कुबेरस्य यम॰

35

ऋषिरुवाच ॥ पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् १ तावेव सूर्यतां तद्वदधिकारं तथैंदवं कौबेरमथ याम्यं च चक्राते वरुणस्य च २ तथैव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ३ हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः महासुराभ्यां तां देवीं संस्मरंत्यपराजितां ४ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः भवतां नाशयिष्यामि तत्क्षणात्परमापदः ५

स्य वरुणस्य चाधिकारं स्वयं चक्राते २ पवनर्द्धिं वायोरधिकारं ततोऽनंतरं देवीं संस्मरंति स्मेत्यन्वयः तावेव दैत्यौ वातव्यापारं हुतवहकर्तव्यं तथान्येषामपि व्यापारं स्वयं चक्रतुः ततो देवा राज्याद्विनिराकृता भ्रष्टाश्च ३ तिस्रो जन्मयौवनबालकता दशाश्च अवस्था येषां देवानां ते त्रिदशाः संस्मरंति स्म तवंतः विरतितोऽप्यपीजेषु वर्त्तमानतया ज्ञाप्यते महासुराभ्यां निराकृता विलुप्तव्यापाराश्च अवमानिताः अपराजितां विश्वशक्तिं संस्मरंति ४ कथं संस्मरंतीत्यपेक्षायामाह तयेति वरस्य स्वरूपमाह यथेति आपत्सु स्मृताहं तत्क्षणाद्भवतामखिलाः परमापदो नाशयिष्यामीत्यन्वयः ५॥

तत्र हिमवति विष्णुमायां त्रिविधपरिच्छेदरहितां मायामित्यर्थः भक्तिप्रह्वातिशयलक्षणः प्रवाहेन योत्स्यते स्तुतौ देवा इति
मतिं कृत्वा नगेश्वरं हिमवंतं जग्मुः ततस्तत्र विष्णुमायां प्रतुष्टुवुः ८ देव्यै द्योतनशीलायै महतो देवादीन पि द्योतयति सर्गादि-
भिर्व्यवहारयतीति महादेवी शिवं कल्याणं तद्धेतुत्वात् शिवा तस्यै प्रकृत्यै मूलप्रकृतिरूपायै सत्वरजस्तमसां सा-
म्यावस्था प्रकृतिः सर्वशक्तिरूपा तस्यै इत्यर्थः भद्रमखिलप्राणिगणस्य रक्षणं करोतीति भद्रा स्थितिशक्तिस्तस्यै अथवा
भद्रं कल्याणं तद्योगात् तदात्मा भद्रा नियताश्चित्तप्रणिधानभाजो नियमयुक्ताः संतो वा स्मेति पादपूरणे स्म इत्यर्थो वा तां

इति कृत्वा मतिं देवा हिमवंतं नगेश्वरं जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ८ देवा ऊचुः नमो देव्यै
महादेव्यै शिवायै सततं नमः नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म तां ९ नमो रौद्रायै नित्यायै गौ-
र्यै धात्र्यै नमो नमः ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः १०॥

जगद्धेतुत्वेन प्रसिद्धां प्रणताः स्म इत्यर्थः महादेव्यै
सर्वोत्तमायै शिवेत्यादिनामानि भूत्यं तानि महादेव्या गौर्यास्तानि नमस्क्रियंते, न्यानि नानाविधानि श्रीमत्ताया-
गमेषु प्रपंचितानि तानि नेह कथ्यंते ग्रंथगौरवभयात् नियताः सदाचाराः तां देवीं प्रणताः स्म स्मेत्यव्ययपदं ९ रुद्र-
स्येदं रौद्रं दारुणं परिणामकर्कशं संहृतिरूपं कर्मास्या अस्तीति रौद्रा अर्शआदिभ्योच् अन्यथा रौद्रीति स्यात् तस्यै संहृति-
शक्त्यै इत्यर्थः नित्यायै कालानवच्छिन्नायै गौर्यै गौरवर्णायै धात्र्यै जगत्पोषकायै जगद्धारणशीलायै वा नमो नमः इति
भक्त्यातिशये वीप्सा ज्योत्स्नायै सर्वचंद्रमंडलमरीचिरूपायै इंदुरूपिण्यै ज्योत्स्नाश्रयचंद्रमंडलरूपधारिण्यै अतएव सुखायै सु-
खदायिन्यै परमानंदमय्यै वा १०॥

स॰
शु॰टी॰
३९

कल्याण्यै कल्याणकारिण्यै कल्याणरूपायै वा वृद्ध्यै उपचयकारिण्यै सिद्ध्यै अणिमादिरूपायै कुर्म्मः कूर्मरूपिण्यै
कूर्म्मेति पदस्यानेकर्मकत्वात् क्रियापदं [illegible] तिष्ठति अत्र प्रणताः सन्तो नमो नमः कुर्म इत्यन्वयः अन्यत्र कल्याण्यै प्रणताः स
वृद्ध्यै कुर्म्मो नमो नमः इति योजना अयमेव [illegible] समीचीन इति प्रतिभाति अन्यथा उपपदविभक्तेः कारकविभक्तिर्ब
लीयसीति न्यायेन कल्याण्यादिपदेभ्यो द्वितीयैव स्यात् न नमःस्वादेत्यादिना व [illegible] प्रयुक्त्या [illegible] निर्ऋतिर्येन
न्तीत्यत्र विग्रहे निर्ऋतिपदस्य [illegible] केचित्तु निर्ऋतिपदं लक्ष्मीवाचकं [illegible] लक्ष्मीरूपायै अ
र्थः भूभृतां पृथिवीधराणां मेर्वादिपर्वतानां वा लक्ष्म्यै श्रियै शर्वाण्यै शिवधर्मिण्यै [illegible] भवशर्वेत्यादिना ङीष्

कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्म्मो नमो नमः नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ९
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः १०॥

गागमो शर्वस्य स्त्री शर्वाणीत्यर्थः ते तुभ्यं ९ दुर्गायै दुःखेनाधिगम्यायै गत्यर्थानां ज्ञानार्थत्वात् दुर्गे संकटे पारयति पाल
यतीति दुर्गपारः परिच्छेदोस्याः देशकालाद्यनवच्छिन्नत्वादिति वा दुर्गात्संसारात्पारयति पारं करोतीति वा समस्ते
भ्यो दुर्गेभ्यः पारभूता वा दुर्गपारा तस्यै सारो बलं तद्योगिन्यै सर्वश्रेष्ठायै वा सर्वकारिण्यै सर्वजनने स्वतंत्रायै सर्वक
रणशीलायै वा सर्वकारिणीति केचित्पाठः संबोधनरूपः तत्र हे सर्वकारिणि दुर्गादिरूपायै सततं नम इति योजनी
यं ख्यातिर्यथार्थानुभूतिः प्रकृतिपुरुषविवेकज्ञानं तद्रूपायै वा कृष्णायै कृष्णवर्णायै धूम्रवर्णधारिण्यै सर्व
विश्वं करोतीत्येवंशीला संवृद्धिः तस्यै तुभ्यं नमः ११॥

36

अतिसौम्यं ब्रह्मविद्यारूपं संसारतापोच्छेददेत्व अतिरौद्रं संसारहेतुभूतमविद्यात्मकं च रूपं यस्याः सा अतिसौम्यातिरौद्रा त
स्यै नताः संतो नमोनमः ऊर्मेद्रस्यथ्याहारः नताइतिपदस्यानेन नमःपदे क्षचिद्दृष्यते जगत्प्रतिष्ठायै जगदधिष्ठानरूपायै देव्यै
देवशक्त्यै कृत्यै समस्तंतपोयागादिक्रियारूपायै एवमुक्तनाममप्रसिद्धायै देव्यै मानसो वाचिकः कायिकः प्रणामस्त्रि
विधउक्तः ११ सर्वप्राणिषु या प्रसिद्धा विष्णुमाया मूलविद्या विष्णोरपि मोहनरूपेति केचित् इति शब्दः स्वरूपप्रदर्शनार्थः
शब्दिता सर्वागमेषु प्रतिपादिता तस्यै नमो नमः इत्यन्वयः विष्णुमाया हि सात्विकराजसतामसतया त्रिधाभिद्यत इति
तत्परामर्शकं तस्यै पदं त्रिरभ्युद्यते नमःपदं तु प्रसादने संभ्रमे वा पुनःपुनरुच्यते तेन न दोषः उक्तं च विद्यादेविस्मये ह

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ११
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १२

र्षेखेदे दैन्ये च यथारणे प्रसादने संभ्रमे पि हि स्त्रिरुक्तं न दुष्यति अथवा त्रिः प्रणमने महत्फलमिति त्रिर्नमस्कारः का
यिकवाचिकमानसिकनमस्कारत्रयप्रदर्शनार्थो वा एवमितरत्रापि विष्णुमाया चेतना तत्तु बुद्धिनिद्रेत्युधात्तथाक्षु
या शक्तिश्चत्तस्या च क्षांतिर्जातीततः परे लज्जा शांतिस्ततः श्रद्धाकांतिर्लक्ष्मीस्ततः परा वृत्तिस्ततो धृतिर्ज्ञेया स्मृति
स्ततः दया परा तुष्टिपुष्टी ततः स्यातां मातृभ्रांती ततः क्रमात् क्रमोयं कथितोऽस्माभिः संप्रदायानुसारतः अन्नार्थेत्वा
दितोन्यत्स्वरूपेत्तो बुद्धिनिद्रेत्युधात्तथा मन्तरैः पुनिपुष्टीत्वनार्षे इति केचिद् वदंति तदतिमंदं सर्वसांप्रदायिकपुस्त
केष्वविच्छिन्नतया विद्यमानत्वात् १२॥

स॰
शा॰टी॰
३०

37

चेतना अंतःकरणवृत्तिः याभगवतीसर्वलोके चैतन्यरूपेणव्यवस्थिताकथ्यते तस्यैत्रिविधोनमस्कारः १३ बुद्धि
रंतःकरणंसदसद्विचारवान्गीवा १४ निद्रानिर्विद्रियप्रदेशोमनोलयःसर्वेंद्रियाणांविश्रामरूपोभुक्तपीताद्यन्नपरिपा
कगाक्तिः इतिकेचित् १५ पार्थिवधातुक्षयहृतोवसादःअभ्यवहारकारणंक्षुधा १६ छायाशोभाकांतिर्वृत्तिरिक्तवि
तिरित्यभिधानात् शोभात्मिकेतिकेचित् आतपाभावरूपेत्यन्ये १७ शक्तिःसामर्थ्यमुत्साहोवा शिवस्याग्रस्वरूपाशक्ति
र्वा १८ तृष्णा॰नात्मीयवस्तुस्वीकारेकार्यलिप्साच १९ क्षांतिःशान्तैरसत्यामपिपरापकारसहनं २॰जातिः

यादेवीसर्वभूतेषुचेतनेत्यभिधीयते नमस्तस्यै १३ यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता नमस्तस्यै १४
यादेवी॰ निद्रारू॰ नमस्तस्यै १५ यादेवी॰ क्षुधारूपे नमस्त १६ यादेवी छायारू॰ नमस्तस्यै॰ १७ या
देवी शक्तिरू॰ नमस्तस्यै १८ यादेवी तृष्णारूपेण नमस्तस्यै॰ १९ यादेवी क्षांतिरू॰ नमस्तस्यै॰ २॰
यादेवीसर्व जातिरू॰ नमस्तस्यै २१ यादेवी॰ लज्जारू॰ नमस्तस्यै २२ यादेवी शांतिरू॰ नमस्तस्यै २३ या
देवीसर्व श्रद्धारूपेण॰ नमस्तस्यै॰ २४॥

जगदुत्पादनं अनेकेष्वपिदेहेष्वेकाकार व्यवहारसाधकंब्राह्मणत्वादिसा॰
मान्यंवा जातिश्छंदसिसामान्येमातृतीगोत्रजन्मास्वित्यभिधानात् एकाकारामवतिबुद्धिर्यतःसाभवेज्जातिः २१ लो॰
कव्यवहारपालयित्रीअकार्यनिमित्तमन्यतःसंकोचोवालज्जा अकरणीयाप्रवृत्तिर्वास्वकार्यविषयात्तानाङ्गीवा २२ अं
तरिंद्रियनिग्रहःशांतिः २३ गुरुवेदवाक्ययोर्विश्वासःश्रद्धासकलजनेषुसाधारणात्मकंवावा सद्विषयनिरतिशाय
भावनाबुद्धिर्वा नयावदेवलः सांप्रत्याघातिसंप्रीतिरर्थिनांदर्शनेदया सात्कृतिश्चानसूयाचसाश्रद्धापरिकीर्तिता २०

३०

कांतिः कमनीयता प्रतिपादयित्री ऊष्ममयारस्प्रवृत्तिप्रेरणा वा तदुक्तं प्रेरणे मे वदत्वस्तस्मायारेरगप्रवृत्तिता कांतिरुच्यते कांतिमे
वातिविस्तीर्णां दीप्तिमिमिच्छंति सूरय इति २५ लक्ष्मीः धनादिसंपत् पुत्राणां पुरुषप्रणयिनी वा २६ वृत्तिर्जीविका अथ वृत्तिर्वा
वृत्तिः व्यापारः वर्त्तनं वृत्तिः योगक्षेमः अर्थं चतुष्कादिवृत्तित्रयं २७ विपत्तावप्यदीनता धृतिः २८ स्मृतिरनुभवख्यातिवि
षयं ज्ञानं २९ सर्वसत्त्वानुकंपा दया परदुःखपरिहारे निरुपाधिके इच्छा वा ३० अनधिगतानामभिलाषस्तुष्टिः समस्तवस्तुप्र
नाकांक्षा वा ३१ पुरुषार्थसाधनसामर्थ्यं पुष्टिः ३२ देहाधिष्ठात्री ब्राह्मणादिवर्णाभिमानिनी देवता वा ३३ अतस्मिंस्तदि

यादेवी॰ कांतिरू॰ नमस्तस्यै २५ यादेवी॰ लक्ष्मीरू॰ नमस्तस्यै॰ २६ यादेवी॰ वृत्तिरू॰ नमस्तस्यै २७ यादेवी॰
धृतिरू॰ नमस्तस्यै २८ यादेवी॰ स्मृतिरू॰ नमस्तस्यै २९ यादेवी॰ दयारू॰ नमस्तस्यै ३० यादेवीस॰
तुष्टिरू॰ नमस्तस्यै ३१ यादेवी॰ पुष्टिरू॰ नमस्तस्यै ३२ यादेवीस॰ मातृरू॰ नमस्त॰ ३३ यादेवी॰ भ्रांतिरू॰
पेणस॰ नमस्त॰ ३४ इंद्रियाणामधिष्ठात्री भूतानामखिलेषु या भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ३५

तिभ्रमत्वयोर्भ्रांतिः ३४ अखिलेषु समस्तेषु भूतेषु प्राणिषु इंद्रियाणां वाक्पाणिपादपायूपस्थाख्यानां कर्मेंद्रियाणां घ्राणरसन
चक्षुः श्रोत्रत्वक्स्पर्शनसंज्ञानां ज्ञानेंद्रियाणां चाधिष्ठात्री प्रवृत्तिनिवृत्तिकारणं तस्यै व्याप्त्यै देव्यै विभवैकस्वभावायै त्रिविधपरि
च्छेदशून्यायै ब्रह्मणे इत्यर्थः व्याप्तिदेव्यै इति पाठे समस्तं जगत् व्याप्तिर्यस्याः सा वा सा देवी चेति व्याप्तिदेवी तस्यै
यादेवी प्राणिनामिंद्रियाणामधिष्ठात्री देवता पंच कर्मेंद्रियाणि पंच ज्ञानेंद्रियाणि मनश्चेत्युभयात्मकं इत्येकाद
शेंद्रियाणि तानि देव्याधिष्ठानेन स्वस्वकर्मक्षमाणि तथा या देवी अखिलभूतेषु वर्त्तते तस्यै व्यापकरूपायै नमः ३५

स॰
प्रा॰ टी॰
३८

चितिः प्रत्यक्चैतन्यं तद्रूपेण तत्कृत्स्नं जगद्व्याप्य या स्थिता समस्तस्य जगतः सत्तास्फूर्तिश्च चैतन्यसंबंधव्यतिरेकेण न सं
भवतीति चैतन्यव्याप्तिः सर्वैरंगीकार्या अन्यथा चैतन्यसंबंधाभावेन सत्तास्फूर्त्योरभावात् शशविषाणतुल्यता स्यादि
तिभावः चितिश्चयतने यज्ञेकौ चगरुडादिभेदेन प्रसिद्धा ते ३८ सुरैर्देवैः पूर्वं महिषासुरकाले अभीष्टसंश्रयात् अभि
मतलाभहेतोः अभीष्टसंश्रयेति पाठे देवीविशेषणं दिनेषु सर्वकालेषु प्रतिदिनं वा नो स्माकं शुभानि मंगला
नि भद्राणि सुखानि शुभानि भद्राणि निरतिशयकल्याणानि वा भद्रशब्दो योत्कृष्टवचनः यथा भद्रंभद्रं वितरभग

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ३८ स्तुता सुरैः पूर्व
मभीष्टसंश्रयात्तथा सुरेंद्रेण दिनेषु सेविता करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः ३०
या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते या च स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्तिवि
नम्रमूर्तिभिः ३८॥

वन्मे श्रयसे मंगलायेति या देवी पूर्वं सुरैः स्तुता अभिमतफलप्राप्तेः तथा सुरेंद्रेण सुतादिने
षु नश्रीसूर्येण पूजिता साईश्वरी नोस्माकं शुभानि कल्याणानि करोतु यतः शुभहेतुः फविरस्यकारणं कष्टानि
हंतु च परं ३० सांप्रतं चेदानीमपि या ईश्वरी उद्धतैर्दैत्यैस्तापितैरस्माभिर्नमस्यते स्तूयते भक्त्या विनम्रा मूर्तिर्येषां ते
षां तैः नमस्यतीति नमोवरिवश्चित्रङः इति क्यजिति कर्मणि लट् या देव्यस्माभिः सुरगणैरुद्धतदैत्यतापितैः स
द्भिर्नमस्क्रियते साईश्वरी या संस्मृता सती तत्क्षणमेवाखिलापदो निहंति ३८॥

३८

एवमुक्तरीत्यास्तवादियुक्तानांदेवानांस्तवाभियुक्तानामितिक्वचित्पाठः तत्रसमीपप्रदेशो अथवासमम्यर्थेषष्ठी देवे
षुस्तवादियुक्तेषुसत्सु तत्रपार्वतीगंगायास्तोये स्नातुमभ्याययावित्यन्वयः अथवाअनादरेषष्ठी देवाननादृत्या''
'' गतेत्यर्थः यतः सागंगाम्भोजलमयीमूर्तिः सर्वेश्वरस्येतिवदंति नृपनंदन देवानामेवंस्तवाभियोगिनांस
तांतत्रपार्वतीगंगायाःस्नानंकर्तुमाजगाम ३९ शोभनेभ्रुवौयस्याःसातान्सुरान् अत्रप्रदेशेभवद्भिःकास्तूयतेइत्यपृच्छ
त् तस्याःसुरान्पृच्छंत्याःशरीरकोशात् अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयात्मककोशात् तालव्यशाकार

ऋषिरुवाच एवंस्तवाभियुक्तानांदेवानांतत्रपार्वती स्नातुमभ्याययौतोयेजाह्नव्यानृपनंदन ३९ सा
ब्रवीत्तान्सुरान्सुभ्रुर्भवद्भिःस्तूयतेत्रका शरीरकोशतश्चास्याःसमुद्भूताब्रवीच्छिवा ४० स्तोत्रंममैतत्क्रियतेशुं
भदैत्यनिराकृतैः देवैःसमस्तैःसमरेनिशुंभेनपराजितैः ४१ शरीरकोशाद्यत्तस्याःपार्वत्यानिःसृतांबि
का कौशिकीतिसमस्तेषुततोलोकेषुगीयते ४२॥

यादे शरीरावरणकंचुकादित्ये के शरीरावयवसमुदा
यादित्यन्ये सापार्वतीतान्सुरानब्रवीत् भवद्भिरत्रकास्तूयते ततोस्यादेव्यादेहांशात्समुत्पन्नाशिवाभगवत्यब्र
वीत् ४० समस्तैर्मिलितैःसमेतैरितिवापाठः शुंभनिराकृतैर्निशुंभेनचभग्नैश्चदेवैर्मदीयास्तुतिःक्रियते ४१ यद्यस्मा
च्छरीरकोशान्निःसृता ततस्तस्मात्कौशिकीत्येवंरूपेणलोकेषुगीयतेइत्यन्वयः कौशिकीतितालव्यएवशाका
रः मूर्धन्यषकारवतःकोषशब्दात् कोषेभवाकोषिकीतिव्युत्पादनेपृषोदरादित्वात्सिद्ध्यति यत्तस्याःपार्वत्याः
देहगर्भतोंबिकानिःसृता ततःकारणात्समस्तेषुलोकेषुकौशिकीतिस्तूयते ४२॥

स॰
श॰टी॰
३९

सा सर्वरूपा पार्वत्यपि कृष्णाभूत् तस्यां कोशात् विनिर्गतायां सत्यां सापि गौरी कृष्णवर्णाभूत् तदा सा कालिकास
वैरितिनाम्नोक्ता हिमवति विहितसंश्रया ४३ ततो देव्योत्तरदनंतरं वा परं श्रेष्ठं सौंदर्यधारयंतीमंबिकां कौशिकीं चंडो
मुंडश्च ददर्श त्रिलोकीस्त्रीरत्ने सौंदर्यातिशयि सुंदरं रूपं विभ्राणां शुंभनिशुंभभृत्यौ चंडो मुंडश्च ददर्श ४४ कर्मणा यम
भिप्रैति स संप्रदानमित्यत्र क्रियाग्रहणं कर्त्तव्यमित्युक्तं तेन क्रियायमभिप्रैति तस्यापि संप्रदानसंज्ञत्वात् शुंभायेति संप्र
दाने चतुर्थी आख्यानक्रियया प्राप्यमानत्वात् ताभ्यां चंडमुंडाभ्यां शुंभाय दैत्याय कथिता हे महाराज कापि स्त्री मह

तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती कालिकेति समाख्याता हिमाचलकृतालया ततोंबिकां परं रूपं
विभ्राणां सुमनोहरं ददर्श चंडो मुंडश्च भृत्यौ शुंभनिशुंभयोः ४४ ताभ्यां शुंभाय चाख्याता सातीव सुमनोहरा
काप्यास्ते स्त्री महाराज भासयंती हिमाचलं ४५ नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमं ज्ञायतां काप्यसौ दे
वी गृह्यतां चासुरेश्वर ४६ स्त्रीरत्नमतिचार्वंगी द्योतयंती दिशस्त्विषा सा तु तिष्ठति दैत्येंद्र तां भवान्द्रष्टुमर्हति ४७

रूपवती आस्ते हिमाद्रिं द्योतयंती त्विषेति शेषः ४५ तादृगुत्तमं रूपं क्वचिदपि केनचिदपि न दृष्टं एवं प्रकारेण न दृ
ष्टमेवेत्यर्थः अपिशब्दश्चार्थः हे असुरेश्वर एतावद्रूपं क्वचिन्न केन दृष्टं असौ काप्यनिर्वचनीयस्वरूपा देवी ज्ञायतां का
सावितिगृह्यतां च ४६ स्त्रीरत्नमुत्तमा स्त्री अजहल्लिंगत्वान्नपुंसकलिंगत्वं चार्वी अतिरमणीयं अंगं यस्याः सा हे दैत्येंद्र
सा स्त्रीरत्नं तिष्ठति जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते कांत्याकुभा द्योतयंती स्वामिन् तां भवानेव केवलं द्र
ष्टुमर्हति विलोकयितुं तवैवोचितत्वं वर्त्तते ४७॥

39

रत्नानि स्वजातिश्रेष्ठानि मणयो वज्रादयः गजाश्वमादिर्येषां तानि वस्तूनि भांति शोभंते सांप्रतं तानि ते दृष्टे इति कश्चित्
पाठस्तत्र तच्छब्दाध्याहारं विनैव योजना हे प्रभो यानि गजाश्वादीनि रत्नानि तथा मणयस्ते लोके वर्तंते त्रैलोक्ये तानि सम
स्तानि सांप्रतं त्वद्दृष्टे वर्तंते प्रभुत्वं व्यापयन्नाह ४८ गजरत्नमुत्तमगजः समानीतः अश्वोऽपि दिव्यानीततरुः पारिजात
तरुरिति मध्यमलोपसमासः हे प्रभो त्वया गजरत्नमैरावतं इन्द्रात्समानीतः तथा पारिजाततरुरुच्चैःश्रवाश्चादयः समा
नीतः ४९ विमानं व्योमयानं हंससंयुक्तं हंसैरुह्यमानं यद्वेधसो ब्रह्मणो रत्नभूतमासीत् एतत्ते प्रांगने इदानीतं सतिष्ठ

यानि रत्नानि मणयो गजाश्वादीनि हे प्रभो त्रैलोक्ये समस्तानि सांप्रतं भांति ते दृष्टे ४८ ऐरावतः समा
नीतो गजरत्नं पुरंदरात् पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ४९ विमानं हंससंयुक्तमेतत्तिष्ठति ते
गने रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतं ५० निधिरेष महापद्मः समानीतो धनेश्वरात् किंजल्किनीं
ददौ चाब्धिर्मालाममलानपंकजां ५१॥

तितादृशस्य विमानस्यानादरेणांगनस्थित्या समष्टेः परम
काष्ठापात्रत्वं सूच्यते कथंभूतं विमानं अद्भुतं अथवा यस्मात्तव वरप्राप्तिस्तस्यैव विधसो विमानमिहानीतमित्येत
दद्भुतमाश्चर्यं हे प्रभो एतद्धंससंयुक्तं तवांगने तिष्ठत्येव रत्नभूतं अपरं विमानप्रधानं यद्विमानं वेधस आसीत्त द
पि त्वयेहानीतमित्यद्भुतं ५० महापद्मनामा निधिः नाम्ना किंजल्किनी अम्लानकेसरामल्लष्टकेसरयुक्तां वा ददौ अ
र्थात्तुभ्यं सर्वदैवाम्लानानि पंकजानि यस्यां हे देव इंद्र एष महापद्मो निधिस्त्वद्दृष्टे वर्तते यो धनेश्वरादानीतः त
था समुद्रः सपरागां सदैव विकस्वरसरोरुहां मालां ददौ ५१॥

स॰
शती
८०

स्यंदनवरो रथः मृत्योः प्रजापतेर्ब्रह्मणः दक्षस्येत्यन्ये हे प्रभो वारुणं छत्रं तव गेहे तिष्ठति कांचनं गलत् तथायं स्यंदनव
रस्तव तिष्ठति यो रथश्रेष्ठः पुरा प्रजापतेरासीत् ५२ उत्क्रांतिं मरणं ददातीत्युत्क्रांतिदा हे ईश त्वयाहृतः परिग्रहे स्वीकारे परि
गृह्यते नेनेति परिग्रहो हस्तस्तत्रवातिष्ठतीति शेषः हे ईश यमस्योत्क्रांतिदा नाम शक्तिर्हृता तथा वरुणस्य पाशो निशुंभ
स्यगृहे वर्तते ५३ अब्धौ समुद्रे जाता उत्पन्नानि निशुंभस्य नान्यस्येत्यर्थः वाससी परिधानकवस्त्रे अग्निरेव शौचं नैर्मल्य
कारणं ययोः अग्निरेव शौचं ययोरिति वा अग्निना निर्मले भवतः न दह्यते चेत्यर्थः हे ईश अब्धिजाताः समस्तरत्नजातयो

50

छत्रं ते वारुणं गेहे कांचनस्रावि तिष्ठति तथायं स्यंदनवरो यः पुरासीत्प्रजापतेः ५२ मृत्योरुत्क्रांतिदा नाम श
क्तिरीश त्वया हृता पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ५३ निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः व
ह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ५४ एवं दैत्येंद्र रत्नानि समस्तान्याहृतानि ते स्त्रीरत्नमेषा कल्याणी त्व
या कस्मान्न गृह्यते ५५ ऋषिरुवाच निशम्येति वचः शुंभः स तदा चंडमुंडयोः प्रेषयामास सुग्रीवं दूतं देव्या महासुरं (५६॥

निशुंभस्य गेहे आसते तथा वह्निरग्निशौचे विरजसी वाससी ददौ ५४ ते त्वया षष्ठीचतुर्थ्योर्द्वितीयेति
मुक्तक्रमेण द्वेधाविधानात् तृतीयायामपि क्वचिदादेशः तृतीयात्वप्रतिरूपकमव्ययं वा हे दैत्येंद्र अमुना प्रकारेण सम
स्तानि रत्नानि त्वया आनीतानि ततः एषा स्त्रीरत्नं कल्याणी शोभना त्वया कस्मान्न गृह्यते परिगृह्यमानय त्वं ५५
इत्याद्युक्तिचतुर्थ्योर्थे षष्ठी देव्याः समीपे वा शुंभो महासुरः तदा चंडमुंडयोरिति वचः श्रुत्वा सुग्रीवं नाम दूतं देव्याः
सन्निधौ प्राहिणोत् ५६॥

सा पूर्वादेवी इति च सर्वं चंडमुंडवचनं इदं प्रांशुस्पष्टं च कार्यं करणीयं त्वं तु शीघ्रं यथा स्यात् हे दूत त्वं ममादेशेन गत्वा इत्यमि
त्थं वक्तव्या यथा संप्रीत्याभ्येत्यायाति तथा शीघ्रं कार्यं यथा हर्षात्तूर्णमायाति तथा किमपि वचनविशेषं वदेत्यर्थः ५७
स दूतः शैलस्योत्तमप्रदेशे अतिमनोहरे यत्र सा आस्ते तत्र गत्वा ततस्तदनंतरं तां देवीं श्लक्ष्णमनुत्कटं मनोहरं वा यथा
स्यात्तथा मधुरया मृदुया गिरा प्राह स दूतो यत्र गिरिप्रदेशे देव्यास्ते तत्र गत्वा देवीं मधुरया गिरा कोमलमुक्तवान् ५८ त्रैलो
क्यपरमेश्वरस्त्वत्सकाशं त्वत्समीपं प्रेषितः सन् अहमस्थाने त्वत्सकाशमागत इति काकादिव त्वत्सकाशपदस्मभयत्रयो·

इति वेति च वक्तव्या सा गत्वा वचनान्मम यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ५७ स तत्र गत्वा यत्रास्ते·
शैलोद्देशेऽतिशोभने तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ५८ दूत उवाच॥ देवि दैत्येश्वरः शुंभस्त्रैलोक्यप
रमेश्वरः दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ५९ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु निर्जिताखिलदै
त्यारिः स यदाह शृणुष्व तत् ६० मम त्रैलोक्यमखिलं मम देवा वशानुगाः यज्ञभागानहं सर्वानुपाश्नामि पृ
थक्पृथक् ६१

थ्यं हे देवि त्रैलोक्ये परमश्चासावीश्वरश्च परमेश्वर ऐश्वर्ययुक्तः शुंभो नाम महान्प्रभुः तेनाहं दूतः प्रेषितः
सन्भवत्याः समीपमागतः ५९ न व्याहताज्ञा यस्य देवयोनिषु निर्जिता अखिला दैत्यारयो देवा येन शृणुष्वाकर्णय
हे देवि यः सर्वोदपशासदेवयोनिषु प्रतिहतशासनः तथा भग्नदैत्यश्च स यदाह कितत् शृणु किमाहेत्याकांक्षायामाह ६० वशाः
स्वाधीना वशे ते वशानुगाः वशानुविधायिनो वा वशानुगा इति वा उपाश्नामि समीपे भक्षयामि पृथक्पृथक् इंद्रादिभे
देन पंक्तिद्विरूपाहहे देव्यखिलं त्रैलोक्यं मम त्रैलोक्याधिपतिरहं देवा मम वशवर्तिनः यज्ञभागान्सर्वानुपभुंजे पृथक्पृथक्तर्वं

स· प्रा· टी· ८१

अशेषतः अशेषाणि गजरत्नानि नानादिग्देशप्रसिद्धानि ममवशगानीत्यनुषज्यते इत्येतस्यायमिमेऽणयोजनीयं त्रैलो
क्येवररत्नानि जातौ जातौ विद्यादीनि समग्राणि ममवशगानि किं किं तदुच्यते गजरत्नमैरावताख्यमद्राहृतं ९२ उच्चैः
श्रवसम् पाहोवाचको स्यास्तीति मत्वर्थीयाच प्रत्ययेनोच्चैःश्रवसमप्यहमकारांतं आकाशस्थैर्दिवौकसैरिति इत्थं वासव
दिवौकसमध्ये हृद्युस्थाय संज्ञाप्राह्वेनबहुव्रीहिं कुर्वंति तन्मंदं मत्वर्थीयामत्ययेनैव बहुव्रीह्यर्थस्य लब्धत्वात् तस्मात्स
षोऽभ्यादितः छांदसत्वाद्धुकारांतता अश्वरत्नं देवैः इवादनेस्हत्वा देवैंद्राच्चोरयिता आत्मनो रक्षार्थममरैः प्रणिपत्य स

41

त्रैलोके वररत्नानि मम वश्यान्यशेषतः तथैव गजरत्नं च हृतं देवेंद्रवाहनं ९२ क्षीरोदमथनोद्भूतमश्व
रत्नं ममामरैः उच्चैःश्रवसूसंज्ञं तत्प्रणिपत्य समर्पितं ९३ यानि चान्यानि देवेषु गंधर्वेषूरगेषु च रत्न
भूतानि भूतानि तानि मय्येव शोभने ९४ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयं सा त्वमस्मानुपाग।
च्छ यतो रत्नभुजो वयं ९५॥

मर्पितमित्यन्वयः क्षीरसागरोत्पन्नं उच्चैःश्रवससंज्ञं तत्प्रणिपातपूर्वं स
मर्पितं ९३ रत्नभूतानि वस्तूनि यानि मय्येवाशोभनानि भूतानि स्थितानि हे शोभने शोभनदेहे यानि देवादिषूत्क
ष्टवस्तूनि यानि सर्वेषामपास्यानि भूतानि गजाश्वस्त्रीरत्नप्रभृतीनि तानि मय्येव संति ९४ अस्मदो द्वयोश्चैकस्मिन्
पि सभे वयमिति बहुवचनं अन्यासुरमादित्येन वा उपागच्छाश्रय।। हे देवि लोकमध्ये त्वां स्त्रीरत्नभूतां मन्याम
हे स्त्रीषु मध्ये रत्नभूता सा त्वं समीपे अस्माकमायाहि यतः कारणात् वयं रत्नानि तद्वयमेवोपभुंजामः ९५॥

भजाश्रय उरुविक्रमातिशयभाजं चपलस्वभावो ऽपांगो यस्याः वै प्रसिद्धौ हे चपलापांगि मां वा मम मानुजं निशुं
भं भज यतस्त्वं रत्नस्थाने वर्तसे, तो वयमेवाश्रयणीयाः ८६ प्राप्स्यसे इति निसंपरस्मैपदित्वाद्यद्यप्यसंगतं तथाप्यंतर्भा
विण्यर्थत्वात् कर्मण्यात्मनेपदं मया त्वमैश्वर्यं प्रापयितव्यासीत्यर्थः मत्परिग्रहान्मदाश्रयणात् एतद्बुद्ध्यांतःकरणेन समा
लोक्य विचार्य मत्परिग्रहतां मम पत्नीत्वं हे देवि त्वं मदीयात्स्वीकारात् निरुपमं प्रभुत्वं प्राप्स्यसे एतद्गंभीरया बुद्ध्या विमृश्य मत्क
लत्रभावं प्राप्नुहि ८७ गंभीरं अंतः अभ्यंतरे स्मितमीषद्धास्यं यस्याः जगौ उवाच भगवती अचिंत्यमाहात्म्या विशेषणत्रयमत्यंतो
त्कर्षप्रतिपादनाय तत् सा देवी इत्येनेनोक्ता गंभीरमध्यगतं हास्यं यस्याः क्रियाविशेषणं वा यत्र गानेन दुर्गा भगवती भद्रा इतीति

मां वा ममानुजं वापि निसुंभमुरुविक्रमं भज त्वं चंचलापांगि रत्नभूतासि वै यतः ८६ परमैश्वर्यमतुलं प्राप्स्यसे म
त्परिग्रहात् एतद्बुद्ध्या समालोक्य मत्परिग्रहतां व्रज ८७ इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ दुर्गा भगवती भ
द्रा ययेदं धार्यते जगत् ८८ श्रीदेव्युवाच सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितं त्रैलोक्याधिपतिः शुंभो निशुं
भश्चापि तादृशः ८९ किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत् क्रियते कथं श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ९०

नामत्रयेण त्रिगुणेति भेदत्रयं सूचितं यया देव्या इदं जगद्धार्यते ८८ अत्र स्थाने गुणवर्णने वा मिथ्या किंचिन्न त्वयोदितमिति स
त्यतायाः दार्ढ्यं प्रतिपाद्यते हे दूत त्वया सत्यमुक्तं त्वयात्र मिथ्या किंचिन्नोक्तं शुंभस्त्रैलोक्याधिपतिः निसुंभोपि तदधिपतिः
८९ किंत्विति वाक्यांतरारंभे अत्र स्थाने परिग्रहे वा यत्संकल्पितं तत् मिथ्या कथं क्रियते अपि तु न क्रियते इत्यर्थः अल्पबुद्धित्वा
दिति परिहासोक्तिः हे दूत किं तु कारणं विद्यते मया यत् सत्यत्वेन प्रतिष्ठितं तदलीकं कथं क्रियते मया स्त्रीत्वेन मूढत
या पुरा या प्रतिज्ञा कृता तां कथयाम्याकर्ण्यतां का प्रतिज्ञेत्याकांक्षायामाह ९० ॥

संग्रामव्यतिरिक्तेनप्रकारेणजयति अभिभवति संग्रामेबलदर्पवद् अभिमानंअपनयति प्रतिबलःसमानसामर्थ्यःसर्व
स्वीभावेसतीतिभावः हे हृतयः पुमान् संग्रामेमांजयति यश्चमन्मदंछिनत्ति यश्चलोके, प्रतिमल्लःसममभर्त्ताभविष्यति ७१
ततस्माद् अत्रशुम्भःआगच्छतु विवाहंकरोतु किंचिरेणविलंबेनालंलघुमनोज्ञंयथास्यात् तस्मान्महासुरःशुम्भोनिशुम्भोवा
यातु विलंबेकोहेतुः मांजित्वाकिंचिरेणअत्रपाणिग्रहमहस्तग्रहणंतु ७२ हे देवि त्वमवलिप्तागर्वितासत्व्यावादर्पपूर्णासिममा

योमांजयतिसंग्रामेयोमेदर्पंव्यपोहति योमेप्रतिबलोलोकेसोमेभर्त्ताभविष्यति ७१ तदागच्छतुशुम्भोत्रनिशुम्भो
वामहासुरः मांजित्वाकिंचिरेणात्रपाणिंगृह्णातुमेलघु ७२ दूतउवाच अवलिप्तासिमैवंत्वंब्रूहिदेविसमा
ग्रतः त्रैलोक्येकःपुमांस्तिष्ठेदग्रेशुम्भनिशुम्भयोः ७३ अन्येषामपिदैत्यानांसर्वेदेवानवैयुधि तिष्ठन्तिसंमुखा
देविकिंपुनःस्त्रीत्वमेकिका ७४ इन्द्राद्याःसकलादेवास्तस्थुर्येषांनसंयुगे शुम्भादीनांकथंतेषांस्त्रीप्रयास्य
तिसंमुखं ७५ सात्वंगच्छमयैवोक्तापार्श्वंशुम्भनिशुम्भयोः केशाकर्षणनिर्धूतगौरवामागमिष्यसि ७६॥

ग्रतः एवंमाब्रूहि त्रैलोक्येशुम्भनिशुम्भयोःपुरतःकःपुमांस्तिष्ठेत्नकोपीत्यर्थः ७३ हे देवि संग्रामेसर्वेदेवाअन्येषामपि
दैत्यानांसंमुखानतिष्ठन्ति त्वमेकास्त्रीकिंपुनः भरणसे एकिका एका एकाकिऊत्सायांस्वार्थेवाकः ७४ येषांशुम्भादी
नांसंग्रामेइन्द्राद्याःसकलादेवानतस्थुःतेषांस्त्रीसंमुखीकथंप्रयास्यति ७५ सात्वंमयैवोक्तासतीशुम्भनिशुम्भयोःस
मीपंगच्छ पश्चात्केशाकर्षणेननिर्धूतंगौरवंयस्याःसा मागमिष्यसि अपितुगमिष्यस्येवेत्यभिप्रायः ७६॥

एवमेतदित्युपहासोक्तिः एतत्त्वउक्तं एवमेवसत्यमेव शुंभोबलिष्टः निशुंभश्चापिबलवानेव परंतु किंकरोमि यस्मान्मया
प्रतिज्ञाः विरुद्धाविहिता ७७ यद्यस्मादाहतः सयत्नः सन् मयायद्युक्तं एतत्सर्वमादितोमूलादारभ्यासुरेंद्राय कथयस
वचयुक्तं तद्धिसख्यकरोवित्यन्वयः ७८ इतिश्रीसप्तशतिकाटीकायांदूतसंवादेपंचमोध्यायः ५ सदूतोदेव्याइतिवचश्रा
कर्ण्यामर्षपूरितः कोपध्मातः समागम्यदैत्यराजायविस्तरात्समाचष्टकथितवान् १ अथतदाशुंभस्तस्यदूतस्यतद्वा

श्रीदेव्युवाच॥ एवमेतद्बलीशुंभोनिशुंभश्चापितादृशः किंकरोमिप्रतिज्ञेयंयदनालोचनात्कृता ७७ सत्वं
गच्छमयैवोक्तंयदेतत्सर्वमादृतः तदाचक्ष्वासुरेंद्रायसचयुक्तंकरोतुतत् ७८ इतिश्रीसावर्णिकेमन्वंतरे
देवीमाहात्म्येदूतसंवादःपंचमोध्यायः ५ ऋषिरुवाच॥ इत्याकर्ण्यवचोदेव्याःसदूतोमर्षपूरितः समा
गत्यसमाचष्टदैत्यराजायविस्तरात् १ तस्यदूतस्यतद्वाक्यमाकर्ण्यासुरराट्ततः सक्रोधःप्राहदैत्या
नामधिपंधूम्रलोचनं २ हेधूम्रलोचनाशुत्वंस्वसैन्यपरिवारितः तामानयबलाद्दुष्टांकेशाकर्षणवि
ह्वलां ३ तत्परित्राणदःकश्चिद्यदिवोत्तिष्ठतेपरः सहंतव्योमरोवापियक्षोगंधर्वएववा ४॥

क्यमाकर्ण्यक्रोधयुक्तःसन् दैत्यानामधिपंसेनानाथंधूम्रलोचननामानमब्रवीत् २ हेधूम्रलोचनत्वंशीघ्रंस्व
सैन्यपरिवारितःसन्बलात्तांदुष्टांदुःशीलांकेशाकर्षणेनाकुलीकृतांआनय ३ तस्याःपरित्राणंददाति एवं
भूतोयदिकश्चिदपरःउत्तिष्ठते समीहते युद्धायसज्जीभवति सहंतव्यःअमरोयक्षोगंधर्वोवाभवतु तदोर्ध्वे
कर्मणीत्यात्मनेपदं ४॥

ततोनंतरं स धूम्रलोचनो दैत्यस्तेन शुंभेनादिष्टः सन्न् असुराणां सहस्राणां षष्ट्या वृतो द्रुतं सत्वरं चचाल ५ स धूम्रलोचनः तां
हिमाद्रिशिखरे वर्त्तमानां दृष्ट्वा उच्चैः स्वरेण गाढमिति जगाद चेद् हे देवि निशुंभनिशुंभयोः समीपं प्रयाहि मूलमास्यति कश्रेषि
तिनामघासनात् ६ चेयदि भवती प्रीत्या मम स्वामिनः समीपं नायास्यसि ततप्रयोहमिति सा बलेपोक्तिः अथवेदानीमेव ब
लात्त्वां केशाकर्षणविह्वलां नयामि एतत्क्रूरप्रयोगेपि नयामीत्युत्तमपुरुषः यदुक्तं अस्मद्वचः क्वचिदेवमेतल्लिंगविभा
षया वैयाकरणमानिकामवदद्दोहिरणीपतिः पशुपतोंथन्विनां वायं सर्वेषां नरपुंगवाः आदायवैदिशणीरत्नमेषगच्छामि

ऋषिरुवाच तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः। वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ५ स दृष्ट्वा तां त
तो देवीं तुहिनाचलसंस्थितां जगादोच्चैः प्रयाहीति मूलं शुंभनिशुंभयोः ६ न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति
ततो बलान्नयाम्येष केशाकर्षणविह्वलां ७ श्रीदेव्युवाच॥ दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः बलान्नयसि
मामेवं ततः किं ते करोम्यहं ८ ऋषिरुवाच॥ इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः हुंकारेणैव तं भस्म सा च
कारांबिका ततः ९ अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः १०

लीलया ७ हे हृतवं दैत्येश्वरेण शुंभेन प्रेषितो बलवान् सामर्थ्यवान् बलमेोरसं सैन्ययुक्तः विशेषणद्वयं सोपहासं यदिमां ब
लात्कारेणैवं नयसि तत्किं करोमि किमपि कर्तुं न शक्नोमि त्वां हनिष्यामीति भाव इति वा ८ सोसुरो धूम्रलोचनो देव्येत्युक्तो
देवीं प्रतिधावति स्म ततः सांबिका हुंकारेणैव तं भस्म चकारेत्यन्वयः भस्मसादिति पाठे भस्मस्वरूपमित्यर्थः ९ महासैन्यं
सेनासमुदायः कर्तृसायकैः शरैः शक्तिभिः परश्वधैः कुठारैश्च कर्मभूतां देवीं ववर्ष अथ धूम्रलोचने भस्मीकृते सति कुपितं ब

धूम्रलोचनवधः ॥ ६ ॥

ततोनंतरं कोपात्कंपितकेसरः पपात प्राविशत् वासते ऽतिवाहनः बहुलोकैः कर्मणित्सुट स्वः अनन्यसाधारणो वा
हनः अर्वादित्वात्पुंस्त्वं ततोनंतरं देव्यावाहने सिंहे असुरसेनायां पपात कोपाद्घोरं सिंहनादं कृत्वा धूनितस्कंधकेशः ११
अधरेणाधरकायेनाक्रम्यातिक्रम्य आक्रांत्याधरेणेति क्विप्सादः तत्राधरकायेन या आक्रांतिस्तया जघानेत्यर्थः
स सिंहः कांश्चिद्दैत्यान्हस्तघातेनावधीत् आस्येनापरान्मुखेनान्यांश्चरणेनान्यान्पादप्रहारेणाक्रम्याहनत् १२ कोष्ठा
निरुदयमध्यानि तउक्तं कोष्ठेऽउदोऽऊर्गोले च मंदिरेऽवयवे निजे इति केसरी सिंहः तलप्रहारेण चपेटप्रहारेण ततो

ततो धुतसटः कोपात्कृत्वा नादं सुभैरवं पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ११ कांश्चित्करप्रहा
रेण दैत्यानास्येन चापरान् आक्रम्य चरणेनान्यान्स जघान महासुरान् १२ केषांचित्पाटयामास नखैः
कोष्ठानि केसरी तथा तलप्रहारेण शिरांसि कृतवान्पृथक् १३ विछिन्नबाहुशिरसः कृतास्तेन रणाजिरे
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः १४ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना तेन केसरिणा देव्या
वाहनेनातिकोपिना १५

विस्तृतांगुलिः करः सिंहः केषांचिदसुराणां कोष्ठानि नखैः पाटयामास तथा के
षांचिच्छिरांसि देहात्पृथक् कृतवान् १३ कोष्ठादिति ल्यब्लोपे पंचमी उदरं विदार्य रुधिरं पीतवानित्यर्थः तेन के
सरिणा विछिन्नाः कृता बाहवः शिरांसि येषां ते केषां कोष्ठाउदरगर्भाद्रुधिरं पपौ कंटकितस्कंधदेशः १४
महात्मना महोत्साहेन तेन देव्या वाहनेन महात्मना केसरिणा तत्सर्वं बलं क्षयं नीतं अत्यंतक्रुद्धेन १५ ॥

स॰
ग॰ टी॰
४४

देव्यातंनिरस्तंदेव्याःसिंहेनसमस्तंसैन्यंक्षयितंचश्रुत्वा क्षयितमिति नाशकादित्वादितच् अथवाक्षयंकरोतीत्यर्थेणि
च् ततोनिष्ठा नोसर्वौंको दैत्याधिपतिःशुंभस्तमसुरंधूम्रलोचनंदेव्यानिहतंश्रुत्वा देवीकेसरिणाचकृत्स्नंसैन्यंचनि
हतमाकर्ण्यततोभृशंकोपंकृतवान् कोपात्कंपमानोष्ठःसौचंडमुंडावादिदेश ६ गच्छतेति हेदोनुरोधात्स्वार
लोपः व्यत्ययाद्वा द्वित्वेएव बहुवचनंगौरवप्रतिपादनायप्रत्येकंवा इतरासुरसाहित्येनवागच्छतमितिवापाठः कि
मादिशदित्याह हेचंडमुंडौयुवांबहुलैःसैन्यैःपरिवारितौ तत्रांगनासमीपेगच्छतं गत्वाचतांशीघ्रंसमानीयतां केनप्र

५५

श्रुत्वातमसुरंदेव्यानिरस्तंधूम्रलोचनं बलंचक्षयितंकृत्स्नंदेवीकेसरिणाततः ५ चुकोपदैत्याधिपतिः
शुंभःप्रस्फुरिताधरः आज्ञापयामासचतौचंडमुंडौमहासुरौ ६ हेचंडहेमुंडबलैर्बहुभिःपरिवारितौ तत्रग
च्छतगत्वाचतांसमानीयतांलघु ७ केशेष्वाकृष्यबद्ध्वावायदिवःसंशयोयुधि तदाशेषायुधैःसर्वैरसुरैर्विनि
हन्यतां ८॥

कारेणानेनवाऽस्याकांक्षायामाह ८ केशेष्विति केशाकर्षणंकृत्वाबद्ध्वावासमानी यतामिति प्राक्तने
नसंबंधः वःइतिबहुवचनंपूर्ववद्व्याख्येयं वामितिवापाठः यदिवोयुष्माकंयुधिसंग्रामविषयेसंशयोजेतुंनशक्नोति
संशयस्तदाक्रमेणास्त्रक्षेपादिशुद्धधर्ममपरित्यज्यअशेषैःसमस्तैरायुधैःसर्वैरसुरैर्मिलित्वाविनिहन्यतांताड्यतां वि
करेणधृत्वाअथवाबद्ध्वासमानीयतांवा अथवायथानयनेसंशयःतदासंग्रामेसर्वैरसुरैरशेषायुधैर्विनिहन्यतां ८॥

तस्यां हतायां ताडितायां सत्यां यदि सा मृता स्यात् तदा तां गृहीत्वा शीघ्रमागम्यतां यदि न मृता स्यात् तदा तां बद्ध्वा गृही-
त्वा शीघ्रमागम्यतामित्यन्वयः अथवा समानीयतामित्यादिना बंधनपूर्वकमानयनमुक्तं यदीत्यादिना शीघ्रमागम्य-
तामित्यनेन हननपक्ष उक्तः तयोः श्रेयानित्याकांक्षायां पूर्वोक्तो बंधनपूर्वकानयनपक्ष एव श्रेयानिति निर्धारयितु-
माह बद्ध्वा गृहीत्वा तामिति अथवा हननानंतरं गम्यतामित्यर्थः तथा चाशेषायुधप्रहारवधप्रहतायां भूमौ गतायां तस्यां तां गृही-
त्वा बद्ध्वा शीघ्रमागम्यतामित्यर्थः अस्मिन्पक्षे बद्ध्वा समानीयतामित्युक्ते युद्धमध्ये कथं सा बंधनीयेति यदि वः संशयस्त-
दा शेषैरित्यादिना बंधनोपयोगि हननं बंधनोपायत्वेनोपदिश्यते न प्राणवियोगपर्यवसायि तदेति मंतव्यं अ-

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथांबिकां २

इति श्रीसावर्णिके मन्वंतरे देवीमाहात्म्ये धूम्रलोचनवधो नाम षष्ठोऽध्यायः ६॥

थ यदि वः संशय इत्येवमथवाक्यो योजनीयः ये तु बंधनपूर्वकानयन … देहवता … तत्राप्यसामर्थ्ये शु-
न बद्ध्वानयनपक्षांतर … उच्यत इति वदंति तन्मंदं बंधना … येषां हननमुद्दिष्टं … हननेऽप्यसम-
र्थानां हननाकाठिन्य … नोपदेशस्य व्यर्थत्वात् तस्यां दुष्टायां हतायां सत्यां तथा सिंहे च विनिपातिते सति
शीघ्रमागम्यतां अथोन्मनतव वप्रहारैः ताममंबिकां बद्ध्वा गृहीत्वा गम्यतां २ इति श्रीरामाश्रमविरचितायां दे-
वीमाहात्म्यटीकायामन्वयकृतायां च धूम्रलोचनवधः षष्ठोऽध्यायः ६॥

ततोनंतरंचंडमुंडौपुरोगमौयेषांतेदैत्याआदिष्टाःसंतोययुःप्रतस्थिरे किंभूताःगजतुरगरथपदातिपूर्णंयद्बलंतेनोपेता
स्तथोद्यतप्रहरणाः १ शैलेंद्रस्यहिमाचलस्यशृंगेसिंहस्योपरिव्यवस्थितामित्यन्वयः कांचनस्यसुवर्णस्येदंकांचनंतस्मि
न्विकारार्थेतन्नित्यंवृद्धशरादिभ्यइतिमयडेवस्यात् नाणू ततोसुरास्तांदेवींसस्मितांसिंहस्योपरिशैलवर्णेमहतिशैलेंद्रशृं
गेव्यवस्थितां २ तेदैत्यास्तांदृष्ट्वासमादातुंग्रहीतुंउद्यमंचक्रुःउद्यताउत्साहिनःग्रहीतुंतस्याःसमीपेगच्छेति तेऽसुरास्तां
देवींदृष्ट्वाग्रहीतुमुद्यताउद्गूर्णायुधाःउद्यमंचक्रुःआकृष्टंसज्जंचापासिंधारयंतीति तथान्येतस्याःसमीपंगताः ३ ततः

45

ऋषिरुवाच आज्ञप्तास्तेततोदैत्याश्चंडमुंडपुरोगमाः चतुरंगबलोपेताययुरभ्युद्यतायुधाः १ ददृशुस्तेततो
देवीमीषद्धासांव्यवस्थितां सिंहस्योपरिशैलेंद्रशृंगेमहतिकांचने २ तेदृष्ट्वातांसमादातुमुद्यमंचक्रुरुद्यताः
आकृष्टचापासिधरास्तथान्येतत्समीपगाः ३ ततःकोपंचकारोच्चैरंबिकातानरीन्प्रति कोपेनचास्यावदनं
मषीवर्णमभूत्तदा ४ भ्रुकुटीकुटिलात्तस्याललाटफलकाद्द्रुतं कालीकरालवदनाविनिष्क्रांतासिपाशिनी
५ विचित्रखट्वांगधरानरमालाविभूषणा द्वीपिचर्मपरीधानाशुष्कमांसातिभैरवा ६॥

पश्चादंबिकातानरीन्प्रति असुरान्प्रति उच्चैरत्यर्थंकोपंचकार तदास्यावदनंकोपेनांजनाभमासीत् ४ तस्यादेव्या
भ्रुकुट्यारौद्राल्ललाटफलकाद्द्रुतंशीघ्रंखड्गपाशधराकालीनामादेवीतत्क्षणंविनिर्गता ५ किंभूतादेवीविचित्र
खट्वांगधराखट्वांगमायुधविशेषस्तद्धारयतीति नरशाहेनपुरुषशिरांस्युच्यंते तेषांमालाविभूषणंयस्याः सा
द्वीपिचित्रकचर्मपरीधानंवासःस्थानेयस्याःसाशुष्कमांसेनत्वगस्थिभूतत्वान्महारौद्रा ६॥

निमग्ने अरुणे आरक्ते नेत्रे यस्याः सा नादेनाट्टहासेनापूरितानि दिङ्मुखानि यया सा ७ सा कालिका महासुरान् घातयंती
सती तत्रासुराणां सैन्ये वेगेन शीघ्रमभिपतिता सती घोरादिकःपतितान् तद्बलमभक्षयत् ८ पार्ष्णिग्राहः पार्श्वस्थासननि
षण्णः अंकुशग्राहो गजासननिषण्णः योधिभिर्हस्त्यारोहिभिः सह घंटाभिः समन्वितान्वारणानेकहस्तेन मुखे क्षिपत्
९ तथैव तेन प्रकारेणैव योधमश्ववारं तुरगैः सह रथं सारथिना सह वक्त्रे निक्षिप्यातिभयानकं यथा स्यात् तथा चर्वयंती पे
षयंती सती केशेषु एकं सा जग्राह इति संबंधः वर्त्तमाननिर्देशस्तु भूतवदधिगंतव्यः चर्वितवती अचर्वयत् इति वा चर्वय

अतिविस्तारवदना जिह्वाललनभीषणा निमग्नारक्तनयना नादापूरितदिङ्मुखा ७ सा वेगेनाभिपतिता
घातयंती महासुरान् सैन्ये तत्र सुरारीणामभक्षयत तद्बलं ८ पार्ष्णिग्राहांकुशग्राहयोधघंटासमन्विता
न् समादायैकहस्तेन मुखे चिक्षेप वारणान् ९ तथैव योधं तुरगै रथं सारथिना सह निक्षिप्य वक्त्रे दशनै
श्चर्वयंत्यतिभैरवं १० एकं जग्राह केशेषु ग्रीवायामथ चापरं पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ११

तीति पाठस्तु सुगम एव अतिभाति तथा तुरगैः सह अश्ववारान् सारथिनां सह रथं वक्त्रे निक्षिप्य दंतैरतिभैरवं चर्वयति भक्षयति १० अ
परं च ग्रीवायां केशेषु जग्राह चरणघातेनान्यमाक्रम्य वक्षसान्यमपोथयत् आलोडितवती योधानिहिंसायां योधं तुरगैरित्यत्र
योधमित्येकवचनं जात्यभिप्रायेण क्वचित् तथैव योधांस्तुरगैरित्यादौ बहुवचनांतः पाठः क्वचित्कः कल्पितः अवभाति
सा देवी एकं महासुरं केशेषु जग्राह तथापरं ग्रीवायां जग्राह अन्यं पादेनाक्रम्य ममर्द अन्यमुरसा स्वदेहपातेनाचूर्णयत् ॥

शस्त्राणि प्रासादीनि अस्त्राणि समंत्राणि ब्रह्मास्त्रादीनि मुखेन कृत्वा सा प्रथमं जग्राह देवी पश्चात्कर्त्तनया रुषा क्रोधेन करु
णाभूतैर्दंतैर्मथितानि तैर्महासुरैर्मुक्तानि शस्त्राण्यायुधानि अस्त्राणि वायव्यादीनि कालीमुखेन जग्राह अपितु पादशनै
र्मथितानि चर्वितानि १२ सा देवी बलिनां दुरात्मनां बलं सर्वं निष्पिपेष चोदयत् अन्यान भक्षयत् अन्यान ताडयत् १३
केचिदसुरा देव्या खड्गेन द्विधा कृताः केचित्खट्वांगताडिताः संतः केचिद् दंताग्राभिहताश्च विनाशं जग्मुः १४ किं बहुनातत्

46

तैर्मुक्तान्यथ शस्त्राणि तथास्त्राणि महासुरैः मुखेन काली जग्राह दशनैर्मथितान्यपि १२ बलिनां तद्बलं स
र्वमसुराणां दुरात्मनां ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तदा १३ असिना निहताः केचित्केचित्खट्वांग
ताडिताः जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा १४ क्षणेन तद्बलं सर्वमसुराणां निपातितं दृष्ट्वा
चंडोभिदुद्राव तां कालीमतिभीषणां १५ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः छादयामास चक्रैश्च
उक्षिप्तैः सहस्रशः १६

दसुराणां बलं क्षणेनाल्पेन कालेन निपातितं क्षयं नीतं दृष्ट्वा चंडस्तां कालीमतिभयानकाकृतिमभिदुद्राव अभिमुखं ध
योधावतिस्म १५ क्षिप्तैः प्रक्षिप्तैश्चक्रैर्मुंडस्तां छादयामासेत्यन्वयः क्वचिन्मुंडक्षिप्तैरित्येकं पदं तत्र मुंडनाम्नासुरे
ण क्षिप्तैः छादयामास अर्थान्मुंडः अथवा मुंडद्वारा क्षिप्तैश्चक्रैश्छादयामासेत्यर्थः सहस्रश इति संख्यैकवचनाद्व
वीप्सायामिति शस् चंडो महासुरस्तां भीमाक्षीं कालीं महाभीमैः शरवर्षैः सहस्रशः क्षिप्तैश्चक्रैश्चाच्छादयामास १६

तस्यादेव्यामुखंप्रविशमानानिसंतिबभुः शुशुभिरे घनोदरंमेघाभ्यंतरं बहूनांरविबिंबानांघनोदरेप्रवेशःकदापिनज्ञा
तइतिकारणादभूतोपमेयं तान्यनेकानिसहस्राणितन्मुखंविशमानानिबभुः १७ भीमंभयंकरंयथास्यात्तथातिरुषातिक्रो
धेन जहासभैरवंभयानकंनदितुंशीलंयस्याः साकरालंघट्टकंतस्यातेमध्येयेदुर्दर्शादशनाः तैरुज्ज्वला अंतश्शाहस्यमथवा
विवमत्राशाउच्यते अथकारनिकरसवित ... दशनपालिप्रतिभासमानचंद्रकलांकुरविषदाभगवतीदुर्दर्शइतिरव
त्वमत्ययांते ततोनंतरंसाकाली अतिकोपेनरोदमट्टहासंचकार घोरस्वनाभैरवाननादिनी दुरुज्ज्वलादशनादंतायस्याःसा १०
महासिंमहाखड्गं उत्थायोद्यम्य हमितिशेषोत्र नुकारः अथवाहदंडेनैरुक्तोवर्णनाशः उक्तंचभाष्यकारेण वर्णागमो
वर्णविपर्ययश्चद्वौचापरौवर्णविकारनाशौ धातोस्तदर्थातिशयेनयोगस्तदुच्यते पंचविधंनिरुक्तमिति अस्यचंडस्यशिरः

तानिचक्राण्यनेकानिविशमानानितन्मुखं बभुर्यथार्कबिंबानिसुबहूनिघनोदरं १७ ततोजहासातिरुषाभीमंभैर
वनादिनी कालीकरालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला १८ उत्थायचमहासिंहंदेवीचंडमधावत गृहीत्वाचास्यकेशेषु शिरस्तेनासिनाछिनत् १९

केशेषु गृहीत्वा तेन खड्गेनवा यत्तेनासिनाछिनत् केचित्तुमहासिंहं उत्थायारुह्येतिवदंति तन्मंदं स
र्वमतत्तस्यासेः तेनासिनेतितच्छब्देनपरामर्शस्यानुपपद्यमानत्वात् येनासिनासह ललाटफलकादुत्पन्ना तेनासिनेतित
च्छब्देनपरामर्शसमर्थयंतेतदपिमंदं अतिव्यवहितस्यतच्छब्देनपरामर्शायोगात् कस्याःसिंहोवाहनमेवनभवति अतो
स्याःसिंहारोहणोक्तेःसमर्थयितुमशक्यत्वाच्च अतएवमहासिंहमुत्थाप्येति अंतर्भूतण्यर्थतयापिकेषांचिद्व्याख्यानमनुपप
न्नमिति अथवोत्थायोद्यम्य कृत्वादेवीचंडमधावत कथंभूतंमहासिंहमिवविक्रमशालिनमिति रूपकेणनिर्देशः उपमैवाति
शोभूतरूपारूपकमिष्यतेइति सादेवीमहासिंहाइतिकृत्वामहाखड्गमसूर्यचंडंप्रत्यधावत ततःकेशेषुगृहीत्वातेनासिनास्यचंड

स·
प्र·टी·
८०

निपातितं अर्थाद्देव्या तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषेति क्वचित्पाठः तत्र सा खड्गेन हत्वा पातयदित्यर्थः अथ मुंडस्तां देवीमभ्यधावत् किं कृत्वा चंडं निपातितं दृष्ट्वा कोपेन खड्गाग्रं मांशुपविशेषस्तेन ताडितं भूमावपातयत् २० चंडं महावीर्यं मुंडं च विनिपातितं दृष्ट्वा ततो हतशेषं भयेन व्याकुलं सद्दिशो भेजे दिक्षु विदिक्षु पलायत २१ मुंडमेव चेत्यत्र मुंडशब्देन मुंडस्य मुंडमवयवलक्षणयोच्यते प्रचंडोट्टहासो महाहासः तेन मिश्रं संयुक्तं यथा स्यात्तथाभ्येत्याभिमुखमागत्येति वा चंडिकां कौशिकीं काली देवी चंडस्य मुंडं च शिरो गृहीत्वाभ्येत्य प्रचंडाट्टहासमिश्रं चंडिकां प्राह २२ युद्धयज्ञे इत्यन्वयः

47

अथ मुंडोभ्यधावत्तां दृष्ट्वा चंडं निपातितं तमप्यपातयद्भूमौ खड्गेनाभिहतं रुषा २०· हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं २१ शिरश्चंडस्य काली च गृहीत्वा मुंडमेव च प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकां २२ श्रीदेव्युवाच॥ मया तवात्रोपहृतौ चंडमुंडौ महापशू युद्धयज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि २३ ऋषिरुवाच तावानीतौ ततो दृष्ट्वा चंडमुंडौ महापशू उवाच कालीं कल्याणी चंडिका ललितं वचः २४ यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता चामुंडेति ततो लोके ख्याता देवि भविष्यसि २५ इति श्री
देवीमाहात्म्ये चंडमुंडवधः सप्तमः ७

महापशू इति रूपकाभिप्रायेणोपहृतौ उपहारीकृतौ हे चंडिके मया अत्र ते तौ महापशू
उपहारीकृतौ शुंभं निशुंभं च स्वयं हनिष्यसि २३ तौ चंडमुंडौ महासुरौ आनीतौ दृष्ट्वा कल्याणी कल्याणकारिणी चंडिका ललितं सविलासं कालीं देवीं प्रत्युवाच कल्याणीमिति द्वितीयांतः क्वचित्पाठः तत्र कालीमित्यस्य विशेषणं ललितं स्पष्टं २४ चंडं च मुंडं चेत्यत्रावयवलक्षणया चंडमुंडयोः शिरसी उच्यते चामुंडेति पृषोदरादित्वेन रूपं २५ इति श्रीसप्तशतीटीका [illegible]

[illegible] ॥१॥

तत्संयोगता प्रतिपादनार्थं चकारद्वयं बहुलेषु सैन्येषु क्षतयोरर्थात् क्षपिते क्षिति तारकादित्वादितच् अथवा तत्
यमाख्यातं करोतीति तदाचष्टे इति णिच् ततो निष्ठा चंडे दैत्ये निहते मुंडे च विनिपातिते सति तथा बहुलेषु सैन्येषु क्षयि
तेषु क्षयं नीतेषु सत्सु असुरेश्वरः शुंभः १ कोपपराधीनमस्वतंत्रं चेतो यस्य सः कोपपराधीनं चेतो यस्येति वा दैत्यानां यानि स
र्वाणि सैन्यानि तेषामित्यन्वयः सर्वसैन्यानामिति दैत्यानां वा विशेषणं उद्योगमुद्यममादिदेशाज्ञप्तवान् ह इति पादपूरणे
॥ ततोनंतरमसुरेश्वरः शुंभो दैत्यसंबंधिनां सर्वसैन्यानां उत्साहमाज्ञापयत् कोपवशीकृतांतःकरणः सप्रतापः २ सर्व

ऋषिरुवाच चंडे च निहते दैत्ये मुंडे च विनिपातिते बहुलेषु च सैन्येषु क्षपितेष्वसुरेश्वरः १ ततः कोपपरा
धीनचेताः शुंभः प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह २ अद्य सर्वबलैर्दैत्याः षडशीतिरुदा
युधाः कंबूनां चतुरशीतिर्निर्यांतु स्वबलैर्वृताः ३ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै शतं कु
लानि धूम्राणां निर्गच्छंतु ममाज्ञया ४॥

बलैः सहिता दैत्या निर्यांतु षडशीतिः प्रधानभूताः उदायुधा
उद्यतास्त्राः कंबूनां कंबुनाम्नि दैत्यकुले जातानां चतुरशीतिः चतुर्भिरधिका अशीतिः चतुरशीतिरिति पादे आद्यः अ
धिकार्थः कुलानीत्यत्राग्रिमश्लोकगतमत्रापि संबध्यते सिंहावलोकन्यायेन अथवा कंबूनां हस्तिनां दैत्या हस्ति
योद्धारः इत्यर्थः [illegible] कंबुः स्यात्कंबुगजयोः ३ कोटिवीर्याणि कोटिवीर्यकुलोद्भवानि कुलानि हृदानि धूम्राणि
असुरवंश्यानां ह दैत्या ममाज्ञया असुराणां कोटिवीर्याणि महाबलानि पंचाशत्कुलानि तथा धूम्राणां शतं कुला
नि निर्गच्छंतु कुलानि जातिसंदोहः ४॥

स॰
प्र॰ टी॰
५८

48

कालकाः कालवंशजाः कालकनामानो वा दौर्हृदा दुर्हृद्वंशजाः दौर्हृता इति पाठे दुर्हृतेरपत्यानि दुर्हृतकुलसंभवा वा मौर्या मुरवंश्याः कालकेया कालकाया अपत्यानि स्त्रीभ्यो ढक् सज्जाः ससामग्रीकाः सन्नद्धास्त्वरिताश्च संतः निर्यान्त्वाज्ञया इत्यत्र संधिर्न भवति अविवक्षितत्वात् ५ असुरपतिः शुंभो दैत्य इत्यादि स्पष्टं बहुभिर्महासैन्यसहस्रैर्वृतः महांति सैन्यानि सेनासमुदायास्तेषां सहस्रैः भैरवमुग्रं शासनमाज्ञा यस्य दारुणादेशः ६ आयांतमागच्छंतं संभ्रमं दृष्ट्वा किंभूतं तत्सर्वोक्तसैन्यं यस्य सः तत्सैन्यस्तं तत्सैन्यं अथवा आयांतं संभ्रमं तत्सैन्यं च दृष्ट्वेति चकाराध्याहारेण योजनीयं आयातमिति पाठे या प्रापणे इत्यस्मान्नपुंसके भावे क्तः धरणीगगनयोरंतरं मध्यं ज्यानिनादै रोदसी पूरयामास ७ अतीवात्यर्थ

कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ५ इत्याज्ञाप्यासुरपतिः
शुंभो भैरवशासनः निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ६ आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणं
ज्यास्वनैः पूरयामास धरणीगगनांतरं ७ ततः सिंहो महानादमतीव कृतवान्नृप घंटास्वनेन तन्नादमंबि
काचोपबृंहयत् ८ धनुर्ज्यासिंहघंटानां नादापूरितदिङ्मुखा निनादैर्भीषणैः काली जिग्ये विस्तारितानना ९

मनेकवारमित्यर्थः अंबिका च तान् सिंहकृतान्नादाननुपबृंहयत् अवर्धयत् बृहि बृहि वृद्धौ छंदस्यमाङ्योगेपीति छांदसः अडागमाभावः ततः सिंहेति ङः सं सिंहनादं विदधे हे नृप अंबिका घंटास्वनेन तन्नादं वर्धयामास ८ धनुर्ज्येति स्वभावव्यापनमात्रं ज्यापदेनैव धनुर्गुणप्रतीतेः धनुर्ज्यादीनां निनादैरापूरितं दिङ्मुखं यया सा निनादैर्निजनादैर्भीषणैः शत्रुभयानकैः जिग्ये जितवती नाशानित्यन्वयः आत्मनेपदं छांदसं अथवा नादापूरितदिङ्मुखापि काली देव्या धनुर्ज्यासिंहघंटानां निनादैर्जिग्ये इति कर्मण्यात्मनेपदं ततः काली विस्तारितानना सती भीषणैर्निनादैर्जितमिति जगौ धनुषः सिंहस्य घंटानां च निनादैः

चतसृणां दिशानां समाहारश्चतुर्दिशं आवेंताद्दिशाशब्दात्साधनीयमन्यत्र चतुर्दिगिति स्यात् दिक्षु विदिक्षु चेत्यर्थः सरोषैः
सक्रोधैर्दैत्यसैन्यैर्देवी सिंहः परिवारितो वेष्टितः काली च परिवारितेति लिंगव्यत्ययेन योज्यं परिवारितेत्यपि क्वचित्पाठः सरोषै-
रितिस्थाने घोरैश्चैविति क्वचित्पाठः ९ हे भूप एतस्मिन्नन्तरे अवसरे समये दैत्यानां विनाशाय अमरसैन्यानां भवाय उदयाय अमरव-
सिंहानाममरश्रेष्ठानां भवाय संपदे च ईशः शिवो गुहः कार्त्तिकेयः विष्णुश्चेति द्वन्द्वः सिंहावपि संदृष्टी ते तेजः सामर्थ्या-
न्विताः शक्तयः स्वाव्यतिरेकिण्यो देवताः ब्रह्मादीनामेव शरीरेभ्यः सकाशाद्विनिष्क्रम्य तद्रूपैर्ब्रह्मादिसदृशाकारैरेव साक्षा-

तंनिनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशं देवी सिंहस्तथा काली सरोषैः परिवारिताः ९ एतस्मिन्नन्तरे भूप विना
शाय सुरद्विषां भवायामरसिंहानामतिवीर्यबलान्विताः ११ ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः शरीरेभ्यो वि
निष्क्रम्य तद्रूपैश्चंडिकां ययुः १२ यस्य देवस्य यद्रूपं यथा वाहनभूषणं तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ
(१३ हंसयुक्तविमानस्था साक्षसूत्रकमंडलुः आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते १४॥

यार्थं चंडिकां भ

गवतीं ययुः

एतदेव प्रकटयन्नाह १२ यथा भूषणवाहनं भूषणवाहनानतिक्रमेणेत्यर्थः तथाविधा यस्य ब्रह्मादेः यादृशं रूपं यद्भूष-
णं यच्च वाहनं तत्सर्वं प्रतिपद्य तस्य शक्तिरसुरान्योद्धुमभ्याययावित्यर्थः यस्य देवस्य यथा येन प्रकारेण रूपवाहनभूष-
णादिः तस्य देवस्य शक्तिः तेनैव प्रकारेण तथाभूषणवाहना असुरान्योद्धुमाययौ तदेव व्याकुरुते १३ अग्रे उपरि अक्ष-
सूत्रं जपमालिका ब्रह्माणं प्रनिति गच्छतीति ब्रह्माणी धातूनामनेकार्थत्वात् कर्मण्यण् ब्रह्माणी तत्र ब्रह्मणः श-
क्तिः हंसयुक्तविमाने स्थिता जपमालिकाकमंडलुहस्ता सा शक्तिः ब्रह्माणी कथ्यते १४॥

स॰
श॰टी॰
५९

वरशब्दः श्रेष्ठवचनः महाहीमहासर्पौ अनंततक्षकौ कंकणौ यस्याः सा प्राप्ता प्राप्तवती माहेश्वरी शक्तिर्वृषभवाहना प्रधानं
त्रिशूलधरा महासर्पकंकणा चंद्रकलाभरणा प्राप्ता १५ कौमारी शक्तिः अंबिका विश्वमाता कार्तिकेयरूपधरा शक्तिर्हस्ते यस्याः
मयूरस्कंधेमध्यःप्रेनिष्ठासमसेव्या प्रधानमयूरारूढा दैत्यान्योद्धुमभ्याययौ १६ यज्ञवराहयज्ञेनोपलक्षितं वराहं तद्रूपं वे
दधारो रूपं दंष्ट्रः कृतहस्तस्थितौ शंखः त्रिककुद्दीर्घरोमा ब्रह्मशीर्षो महातपा इति हरेर्या शक्तिरित्यन्वयः वाराहीं वरा
हाकारां मूर्तिं धारयंती शंखः पांचजन्यः चक्रं सुदर्शनं गदा कौमोदकी शार्ङ्गं शृंगविकारभूतं धनुः धनुषः साहचर्याद्बाणो
ऽप्यूहनीयः खड्गो नंदकः एते हस्ते यस्याः ननु वैष्णव्याः शक्तेश्चतुर्भुजत्वात्कथं षडायुधधारकत्वेन षड्बाहुत्वमुच्यत इति चे

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी महाहिवलया प्राप्ता चंद्ररेखाविभूषणा १५ कौमारी शक्तिहस्ता च म
यूरवरवाहना योद्धुमभ्याययौ दैत्यानंबिका गुहरूपिणी १६ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता शंखचक्र
गदाशार्ङ्गखड्गहस्ताभ्युपाययौ १७ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः शक्तिः साप्याययौ तत्र वाराहीं बिभ्र
ती तनुं १८

न्न वामनपुराणादस्याः षड्बाहुत्वस्य प्रतीतेः तथा च श्रूयते बाहुभ्यां गरुडारूढा शंखचक्रगदासिनी शा र्ङ्गबा
णधरा जाता वैष्णवी रूपशालिनी बाहुभ्यामिति द्वयग्रहणायते तदाष्टबाहुत्वमन्यथा षड्बाहुत्वं अष्टबाहुत्वपक्षे खड्गसाह
चर्याच्चर्मोहनमपि न विरुध्यते तथाप्येकबाहुरिक्तत्वे दोष इति चेन्न माहेश्वर्यादावेकायुधधारित्वोक्तेन परबाहुरि
क्तत्वस्य दोषत्वानंगीकारात् अथवा शार्ङ्गः शाङ्गः शोभनवचनः खड्गविशेषणं तथा योऽन्यस्तथा च चत्वार्येवायुधानीति चतुर्बा
हुत्वं न विरुध्यते शोभने धनुषि शार्ङ्गः स्यात्केगजेतयोस्तु प्यलिनी अथवा शृंगशाङ्गो नदतिदंतवाचकः तथा च तद्धिकारस्त्रिद्व

५९

शां॰ स्तद्युक्तः अथवा यजुर्युक्तः खट्वाङ्गपकस्मिन्करे यष्टा दधे श्रीवासुदेवस्य वाराहरूपं बिभ्रतः सतः या शक्तिर्जज्ञे समुत्प-
न्ना सा शक्तिर्वाराही तत्तद्विभ्रती तत्राजगाम १८ नारसिंही शक्तिर्नरसिंहस्य सदृशं शरीरं बिभ्रती सटानां केसराणां स्कंध-
देशांचलानां च आसमंतात् यः क्षेपः आक्षेपेन ताडनेन वातेन क्षिप्ता उत्क्षिप्ताः पातिता प्रेरिता वा नक्षत्राणां संहतिः प्रकरो य-
या सा १९ तथैंद्री शक्तिर्वज्रायुधधारिणी ऐरावतपृष्ठस्थिता नेत्रसहस्रवती यथा देवेंद्रस्तथैवेंद्ररूपधारिणी आगता २०
ईशानो महादेवो देवशक्तिभिर्ब्रह्माण्यादिभिः सप्तभिः परिवृतो वेष्टितो मम प्रीत्याह त्वरया असुरा हन्यतामिति चंडिकां कौ-

नारसिंहीन्रसिंहस्यबिभ्रतीसदृशंवपुः प्राप्तातत्रसटाक्षेपक्षिप्तनक्षत्रसंहतिः १९ वज्रहस्तातथैवैंद्रीगजराजो-
परिस्थिता प्राप्तासहस्रनयनायथाशक्रस्तथैवसा २० ततःपरिवृतस्ताभिरीशानोदेवशक्तिभिः हन्यतामसुराः
शीघ्रंममप्रीत्याहचंडिकां २१ ततोदेवीशरीरात्तुविनिष्क्रांतातिभीषणा चंडिकाशक्तिरत्युग्राशिवाशतनि-
नादिनी २२ साचाहधूम्रजटिलमीशानमपराजिता दूतत्वंभगवन्गच्छपार्श्वंशुंभनिशुंभयोः २३॥

शिकीमाहोक्तवान् २१ ततः कौशिकीशरीरात् चंडिकाशक्तिस्तस्या द्वितीया मूर्तिरत्युग्राऽतीवोत्कटा चंडिकातोपि शा-
शुशामताद्यैप्रचंडा शिवानां सृगालीनां निनादश्रुत्यां संतीति अथवा शिवस्य कल्याणस्य आसमंतात् शतनिनादः असं-
ख्यशब्दो स्यामस्तीति तथा २२ साऽपराजिता विष्णुशक्तिः ईशानं प्रत्याह धूम्रवर्णजटाशालिनं दूतो वार्ताहरस्त्वं भो
दूतत्वं तद्गच्छ शुंभनिशुंभयोः पार्श्वं गच्छ गच्छेति काकाक्षिवडुभयत्रसंबध्यते भगवंस्त्वं दूतो दूतत्वाय आशु शुं-
भ निशुंभयोः पार्श्वं गच्छ २३॥

स॰
श॰ टी॰
५॰

50

हतं वै शुंभनिशुंभौ चातिगर्वितौ दानवौ ब्रूहि वद ये चान्ये तत्र दानवाः शुंभनिशुंभांतिके ये अन्ये तांश्च ब्रूहि २४ हे दैत्या त्रैलो
क्यमिंद्रो लभतां देवा यज्ञभागभुजो भवंतु यूयं पातालं प्रयात अथवा नागहत्यै गच्छत यदि जीवितुमिच्छथ अन्यथा जीवितं ना
स्ति २५ बलगर्वादथ चेद्भवंतो युद्धकांक्षिणो वर्त्तंते अथ युद्धेन प्रयोजनं तर्ह्यागच्छत तद्यागमने किं न सेत्स्यति वो
युष्माकं पिशितेन मांसेन मच्छिवा मम सृगालिकाः प्राक्तृप्यंतु २६ तया देव्या शिवो महेश्वरः स्वयं दूत्येन दूतत्वकारणे
न दूतकर्मणा वा दूतवणिग्भ्यां चेति यत्प्रत्ययेन यद्यपि दूत्यमित्येव भवति तथापि ब्राह्मणादित्वात् ष्यञ् प्रदिष्टः ततः

ब्रूहि शुंभं निशुंभं च दानवावतिगर्वितौ ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः २४ त्रैलोक्यमिंद्रो लभतां देवाः
संतु हविर्भुजः यूयं प्रयात पातालं यदि जीवितुमिच्छथ २५ बलावलेपादथ चेद्भवंतो युद्धकांक्षिणः तदागच्छ
त तृप्यंतु मच्छिवाः पिशितेन वः २६ यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयं शिवदूतीति लोकेऽस्मिंस्ततः सा
ख्यातिमागता २७ तेऽपि देव्या वचः श्रुत्वा शिवाख्यातं महासुराः अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता २८

सा देवी काली अस्मिंल्लोके शिवो दूतो यस्याः सा शिवदूती बहुव्रीहेरंतोदात्तत्वादिति ङीप् अथवा शिवं दूतं करोतीति
णिच् णिजंतात्कर्मण्यण् ततो ङीप् २७ तेऽपि शुंभादयो महासुराः शिवेन कथितं देव्या वचः श्रुत्वा कोपाविष्टास्तत्र जग्मुः
यत्र कात्यायनी गौरीदेहजा स्थिता यतः कात्यायनीति पाठे सार्वविभक्तिकस्तसिल् यत्रेत्यर्थः यद्वा ल्यब्लोपे पंचमी यद्दे
शमाक्रम्य कात्यायनी स्थिता तं देशमाजग्मुः यतो हेतोः स्थिता वा यतो हेतोः अमर्षेण क्रोधेन व्याप्ताः २८॥

ततोमरारयोदैत्याअग्रेसम्मुखेभूत्वाप्रथममादौशराणांशक्तीनांऋष्टीनामेकधारासीनांवृष्टिभिस्तांदेवींववर्षुरितिऊ
द्धताउग्राः बहुवृद्धिरस्यपिकचिन्मावः उद्धतामर्षाअसह्यतक्रुद्धाः २९ सादेवीतैरसुरैःमुक्तान्बाणाञ्छूलशक्तिपरश्वधान्ध्मात
सम्यग्दृढंकृतंयद्धनुस्तेनमुक्तैः टंकारोयत्रधनुषःप्राक्आकर्णसंपूर्णंकृत्वापश्चात्तैर्वामहेषुभिर्लीलयानिहंततत ३० तस्याःकौशि
क्याअग्रतस्तस्याःअग्रतः भोभगोइत्यादिनायवेलोपः शाकल्यस्येतियलोपस्यसंधिप्रत्ययसिद्धत्वेयद्यपि तथाप्यार्षःसंधिः
अथवातस्यशुंभस्याग्रतः तस्याग्रस्तथाग्रतइतिपाठस्तुकाल्पनिकः पोथितान्मारितान्वाकुर्वतीसतीव्यचरत् कुर्वतीस

ततःप्रथममेवाग्रेशरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तांदेवीममरारयः २९ साचतान्प्रहितान्बाणा
ञ्छूलशक्तिपरश्वधान् चिच्छेदलीलयाध्मातधनुर्मुक्तैर्महेषुभिः ३० तस्याग्रतस्तथाकालीशूलपातविदा
रितान् खट्वांगपोथितांश्चारीन्कुर्वतीव्यचरत्तदा ३१ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणीचा
करोच्छत्रून्येनयेनस्मधावति ३२॥

तीव्यचरत् कुर्वतीत्यत्रनुमागमश्छांदसः शाहृतिगणत्वात्कर
णाथः कुर्वध्यातुर्भौवादिकस्तस्येदंरूपमित्यन्येकुर्वतीतिपाठःकल्पनिकः तस्याःकात्यायन्याअग्रतःकालिकावि
चचार अरीञ्छूलपातविदारितान् खट्वांगताडितांश्चकुर्वतीसती ३१ कमंडलुजलाक्षेपेनहतंवीर्यंयेषांते
णिचूकमंडलुपराञ्चपूर्येनयेनप्रदेशेनप्रकृत्यादिभ्यस्तृतीया धावतिस्मेतियोगेअतीतेपिल
टाब्रह्माणीयेनयेनमार्गेणवाधावततेनतेनशत्रूनुक्तविधांश्चमतेजसोकरोत् अतिकोपेनेतिसर्वत्रयोजनीयं ३२

ऐंद्रीवज्रप्रहारेण विदारिताः सहस्रसंख्या दितिजदनुजा रुधिरस्यौघं प्रवाहं वर्षंतीत्येवंशीलाः पृथ्व्यामपतन् ३३ केचि
त्तुंडप्रहारेण पोत्राघातेन विध्वंसितास्ताडिताः केचिद्दंष्ट्राग्रेण क्षतं विदारितं वक्षो येषां ३४ नारसिंही पाक्लिरन्यान्कांश्चिन्महा
सुरान्नखैः स्फाटितान्भक्षयंती संग्रामे विललास नादेनापूर्णे दिगाकाशो यया नादेनापूरितं दिङ्मुखं यया सा ३५ चंडाट्ट
हासाः सकोपा वा प्रहासमहांतस्त्वयेदृशास्तैः शिवदूत्याभिदूषिताः सर्वतो भीषिताः संतः पृथ्व्यां पेतुः पतितांस्तांश्च शिवदूती

ऐंद्रीकुलिशपातेन शतशो दैत्यदानवाः पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ३३ तुंडप्रहारविध्वस्ता दं
ष्ट्राग्रक्षतवक्षसः वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ३४ नखैर्विदारितांश्चान्यान् भक्षयंती महासुरान्
नारसिंही चचाराजौ नादापूरितदिङ्मुखा ३५ चंडाट्टहासैरसुराः शिवदूत्याभिदूषिताः पेतुः पृथिव्यां पतितां
स्तांश्चखादाथ सा सुरान् ३६ इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः
३७ पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ३८ ॥

नारसिंही काली चखाद अभक्षयत् ३६ इत्यनेन पूर्वोक्तेन प्रकारेण विविधैरभ्युपायैर्जलप्रक्षेपणादिभिर्महासुरान्
हिंसंतं मातृगणं दृष्ट्वा प्रसुरसेनायाः सुखा नेशुः दर्पानं प्राप्ताः पलायिता इत्यर्थः ३७ मातृगणेन अर्दितान् पीडिता
न् पलायनपरान्दृष्ट्वा रक्तबीजो महासुरो योद्धुमभिमुखे आययौ देव्या अभ्यगात् ३८ ॥

51

अस्य रक्तबीजस्य समुत्पतत्युत्तिष्ठति मेदिन्यामित्यधिकरणे सप्तमी पंचम्यं तत्पादे त्यब्लोपे पंचमी मेदिनीमाश्रित्योत्ति
ष्ठतीत्यर्थः समुत्पन्नो रक्तबिंदोरेव प्रकृतित्वेन मेदिन्याः प्रकृतित्वाभावान्नापादानत्वं स रक्तबीज एव प्रमाणं यस्य तदा तत्प्रमाणमेव यदा
स्य शरीरतो रक्तबिंदुर्भूमौ पतति तदा रक्तबीजसमानोन्योसुरो मेदिन्यामुत्तिष्ठति रक्तबीजाकारमन्येषामुद्भवे कारणं यस्य सः अत
एव रक्तबीजः ३९ ततः स महासुरो गदापाणिः सन्निंद्रशक्त्या सह युयुधे ततश्चैंद्री स्ववज्रेण रक्तबीजं विव्यधे ४० आशु शीघ्रं अथा
नंतरं कुलिशेनाहतस्य सतो बहुशोणितं सुस्राव तदानंतकाले ततः सुतशोणितादितिवा रक्तबीजसदृशा रक्तबीजसमान
वीर्या योधा उत्थितवंतः ४१ तस्य रक्तबीजस्य शरीराद्यावंतो रक्तबिंदवः पतितास्तावंतः पुरुषा नवीना जाताः तद्वद्रक्तबीज

रक्तबिंदुर्यदा भूमौ पतत्यस्य शरीरतः समुत्पतति मेदिन्यां तत्प्रमाणो महासुरः ३९ युयुधे स गदापाणिरिंद्रशक्त्या
महासुरः ततश्चैंद्री स्ववज्रेण रक्तबीजमताडयत् ४० कुलिशेनाहतस्याशु बहु सुस्राव शोणितं समुत्तस्थुस्ततो योधा
स्तद्रूपास्तत्पराक्रमाः ४१ यावंतः पतितास्तस्य शरीराद्रक्तबिंदवः तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ४२ ते
चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः समं मातृभिरत्युग्रशस्त्रपातातिभीषणं ४३ पुनश्च वज्रपातेन क्षतमस्य शिरो य
(दा ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ४४

वद्वीर्यप्रभावस्तेजो वा बलं सैन्यं शरीरं वा विक्रमः सामर्थ्यातिशयउद्य
मश्च येषां ते ४२ ते पि रक्तबीजसंभवाः पुरुषाः शक्तिभिः समं सह अत्युग्रमत्युत्कटं यथा स्यात्तथा यः शस्त्रपातः तेनातिभयान
कं यथा स्यात्तथा युयुधे चक्रुः ४३ ववाह सुस्राव संप्रसारणाभावश्छांदसः वहगतौ वित्यस्य रूपं वद प्रयत्ने इत्यस्य वा धातूना
मनेकार्थत्वात् संप्रसारणं तु वहस्यापरोक्ष्यस्य वयजादित्वात् प्राप्नोति नान्यस्य अथवा रक्तं ववह स्पाद वदतीव शरीरा
द्वेगेन निर्गच्छतो रक्तात् ववह इत्याकारः शब्दो भवतीत्यर्थः ततो रक्तात्सहस्रशो संख्याः पुनरपि वज्रप्रहारेण यदास्य शि
र आहतं तदा रक्तं बहु गलति स्म ततश्चाहतस्य सतो यो रक्तौघो भूमौ पपात रुधिरात्सहस्रशः पुरुषा जाताः ४४ ॥

स॰ प्र॰ टी॰ ५२ समरे रणे एनमसुरेश्वरं चक्रेणाभिजघान गदया ताडयामास च कथंभूतं ऐंद्र्याः इंद्रशक्तेः सकाशात् इतं गतं अथवा त
मुलघुहेपकस्मिन्ननेकस्य शस्त्रसंपातः संभाव्यते ऐंद्र्यपि गदयानं ताडयामास अथवा गद्यते पद्यते उच्यते अनयेति गदा
वाक् तया ताडयामास ताडयामास ऐंद्री विवक्षितत्वान्न संधिः वैष्णवी शक्तिश्चैनं रक्तबीजं सुदर्शनेन जघानैंद्री तमसुरेश्वरं
गदया ताडयामास ४५ अस्य वैष्णवीशक्तिभिन्नस्य सतः रुधिरस्रावसंभवैः सहस्रशो सहस्रशो रणे इत्यर्थः संख्यैकवचनाद्वी
प्सायामिति शस् सहस्रसंख्याकैः तत्प्रमाणैर्महासुरैर्विश्वं व्याप्तं ४६ कुमारः कार्तिकेयस्तस्येयं कौमारी शक्तिः शक्त्या

52

वैष्णवी समरे चैनं चक्रेणाभिजघान ह गदया ताडयामास ऐंद्री तमसुरेश्वरं ४५ वैष्णवीचक्रभिन्नस्य रुधिरस्रा
वसंभवैः सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ४६ शक्त्या जघान कौमारी वाराही च तथासिना माहेश्वरी त्रिशू
लेन रक्तबीजमताडयत् ४७ स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् मातॄः कोपसमाविष्टो रक्तबीजो महासु
रः ४८ तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि पपात यो वै रक्तौघस्तेनासञ्छतशोसुराः ४९॥

तं जघान तथा वाराही असिना तं हंति स्म माहेश्वरी शक्तिः त्रिशूलेनाहनत् ४७ अहनत् जघान हंतेर्लङि शपो लुकि कृ
ते अहन् इति निष्पद्यते यद्यपि तथापि छांदसः शपो लुगभावः अथवा हंत्यर्थाश्चेति चुरादिपाठात् हन हिंसायामित्य
स्मात् विकल्पणिजंतात् सिवो रूपं शपप्रत्यये सति लङि स रक्तबीजोपि क्रोधाकुलः सर्वा एव मातॄः पृथगवधी
त् दैत्यो दितिसंभवः ४८ तस्य रक्तबीजस्य बहुधा शक्तिशूलादिभिराहतस्य सतः यो रक्तौघो भूमौ पपात तेन शतशो
सुरा उत्पन्नाः बभूवुः ४९॥

तैरक्तवीजस्यरुधिरसमुत्थैरसुरैःसकलंविश्वंव्याप्यतेस्म ततस्तदनंतरं असुरैःजगद्व्यापनाद्धेतोर्वा उत्तममुत्कृष्टंनिरति
शयंभयमाजग्मुः ५० प्रकर्षेणाहन्यतेदननंप्रक्रियतेवेतिप्राहोरणात्तत्वसत्वरा प्राग्व्यापरनोदनंतोई प्रमथेसतिप्राह इतिनिष्प
द्यते रथेनकांचनांगेनमथ्यो प्राहल्लालसः उतिस्कंदपुराणेपिप्राहल्लालसः संग्राममल्लालसपवोच्यते अतउवावेत्यस्यनउत
रुक्तिः अथवासुरान्दृष्ट्वातेषांमोत्साहनार्थंप्राहसत् प्रकर्षेणाहूहांसंकृतवती त्वरात्वरावती अर्शआदिभ्योच् अथवात्वरा
त्वरयेत्यर्थः नैरुक्तोवर्णविनाशः क्विवंतात्तृतीयावा अथवाभयाकुलान्सुरान्दृष्ट्वा चंडिकाप्राह स्वागतंब्रूते ततः सत्वरासती
विस्तृतंवदनंकुर्विति कालीमुवाचेतियोज्यं विस्तृतंविततंविस्तीर्णंवदनमिति क्वचित्पाठः तान्सुरान्विषादंप्राप्तान्दृष्ट्वा चं

तैश्चासुरासृक्संभूतैरसुरैःसकलंजगत् व्याप्तमासीत्ततोदेवाभयमाजग्मुरुत्तमं ५० तान्विषण्णान्सुरान्दृष्ट्वा चं
डिकाप्राहसत्वरा उवाचकालींचामुंडे विस्तीर्णंवदनंकुरु ५१ मच्छस्त्रपातसंभूतान्रक्तबीजान्महासुरान् रक्तविं
दून्प्रतीछत्वंवक्त्रेणानेनवेगिना ५२॥

डिकास्पर्धंजहास नदाप्राहसत् ततश्चकालींप्रत्युवाच हे चामुं डे विस्तीर्णंवद
नंकुरु ५१ रक्तविंदोरितिजात्यापेक्षयैकवचनंजाताः नित्यपादानपंचम्यादिष्यते जायमानमहासुरप्रकृतित्वाद्वारक्त
विंदोर्जनिकर्तुः प्रकृतिरित्यनेनापादानत्वं अथवा रक्तंविंदुर्यस्य तेनयस्यसरक्तविंदुः रक्तबीजउच्यते रक्तविंदुंप्रतिकार
णत्वाद्वारक्तबीजएवरक्तविंदुशब्देनोच्यते कारणेकार्योपचारात् तस्यरक्तविंदून्वक्त्रेणप्रतीछकथंभूतान्महासुरा
न्कारणत्वात् अनेनभयानककृतयाप्रसिद्धेनवेगिनात्वरावतीसती हे देवि त्वमनेनवक्त्रेणवेगिनावेगवता रक्तबीना
न्महासुरान् मच्छस्त्रपातसंभूतान्रक्तविंदून्प्रतिगृहाण ५२॥

स॰ श॰ टी॰ ५३ तदुत्पन्नान्रक्तविंदुजातान्भक्षयंती सती रणे चर विचर एवमनेन प्रकारेण क्षीणरक्तः सन्नेष क्षयं गमिष्यति नचोत्पत्स्यंती
तिपरस्मैपदं छांदसं एवं त्वया रक्ते पीते दैत्यो नीरुधिरः क्षयं गमिष्यति तथा त्वया भक्ष्यमाणाश्चापरे नैवोत्पत्स्यंति ५३ देवी चं
डिका तां कालीमित्युक्त्वा ततः शूलेन तं रक्तवीजमवधीत् ततः काली चामुंडा रक्तवीजस्य शोणितं वक्त्रेण प्रतीच्छति स्म जगृहे इ
त्युभयपदित्वादात्मनेपदं ५४ ततो हतोरसौ रक्तवीजस्तत्र समये युद्धे वा॰ यानंतरं गदया चंडिकामाहतवान् स गदापातो॰
स्याश्चंडिकाया अल्पिकामपि स्तोकमपि वेदनां पीडां न वक्रे गदालग्नानाजायि ५५ तस्य रक्तवीजस्य घातायस्माद्देहात् देहांगा
त् तस्माद्देहांगात्तच्छोणितं वक्त्रेण कृत्वा संप्रयच्छति ददातीत्यर्थात् आत्मनेवा चामुंडा संप्रतीच्छतीति पाठे ग्रहणातीत्यर्थः अथवा

भक्षयंती चर रणे तदुत्पन्नान्महासुरान् एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यं
ति चापरे ५३ ऋषिरुवाच॥ इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तं मुखेन काली जगृहे रक्तवीजस्य शोणितं ५४
ततोसावाजघानाथ गदया तत्र चंडिकां न चास्या वेदनां चक्रे गदापातोल्पिकामपि ५५ तस्याहतस्य देहात्तु बहु सुस्रा
व शोणितं यतस्ततस्तद्वक्त्रेण चामुंडा संप्रतीच्छति ५६ मुखे समुद्गता येस्या रक्तपातान्महासुराः तांश्चखादाथ चा
मुंडा पपौ तस्य च शोणितं ५७॥

यतः कारणाद्देहाच्छोणितं सुस्राव ततो हेतोस्तच्छोणितं वक्त्रेण संप्रतीच्छतीत्यपि योज्यं य
तो गच्छतस्तस्येति केचित् तस्य रक्तवीजस्याहतस्य सतः प्रचुरं रुधिरमगलत् यतस्ततो यत्र कुत्रापि पतितं तच्छोणितं चामुं
डा संप्रतीच्छति स्म जग्राह ५६ समुद्गता जाताः न तु रक्तस्य भूमौ पाते सति असुरा जायंते कथं तस्यां मुखेऽसुरसंभव इति चे
न्न मुखेपि पार्थिवांशस्य विद्यमानत्वेन दोषाभावात् उत्पाद्यमानासुराभिप्रायेण तानिति बहुवचनं रक्तवीजाभिप्रायेण
तस्येत्येकवचनं रक्तपाताद्येमहासुराश्चास्या मुखे समुद्गताः पतितास्ता चामुंडा काली तान्दैत्यानभक्षयद्रक्तवीजस्य शोणितं च प पौ ५७॥

असिभिरित्यादिनानां बहुवचनं ऋष्टिभिरेकथाप्यवद्वैः · · · देवी श्रीचंडिका चामुंडापीतशोणितं
संतं रक्तबीजं हंतिस्म ५८ हे महीपाल स रक्तबीजस्त्याम जगाम महीपृष्ठे शस्त्रसंघसमाहतः सन्नीरक्तो भूत्वा पपात देव्याः शस्त्रा-
णि देवतास्वरूपत्वात्प्राणिस्वरूपाणि भवंति तेन संघसार्थीकृतं तावेव प्रयुज्यते इति कथमचेतने संघशब्दप्रयोग इत्य-
पि न शंकनीयं संघ इव वा संघः हे राजन् स रक्तबीजः प्रहरणसमूहेन व्यापादितो रुधिररहितः सन्महीपृष्ठे पपात ५९
तेषां त्रिदशानां संबंधि तथा जातो मातृगणः अथवा तेषां त्रिदशानां मध्ये सृङ्मदोद्धतो जातो ननर्तेत्यन्वयः अथवा ते-

देवी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः जघान रक्तबीजं तं चामुंडापीतशोणितं ५८ स पपात महीपृष्ठे
शस्त्रसंघसमाहतः नीरक्तश्च महीपाल रक्तबीजो महासुरः ५९ ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ते-
षां मातृगणो जातो ननर्तासृङ्मदोद्धतः ६० इति श्रीसावर्णिके मन्वंतरे देवीमाहात्म्ये रक्तबीजवधो ना-
माष्टमोध्यायः ८ राजोवाच विचित्रमिदमाख्यातं भगवन्भवता मम देव्याश्चरितमाहात्म्यं रक्तबीज-
वधाश्रितं १॥
षां मातृगणानां मध्ये एवमदस्तेनोद्धत इत्यन्वयः अस्मिन्पक्षे समर्थं · असृङ्मदोद्धत इत्यसमा-
पेक्षत्वा · · ततोऽनंतरं हे नृप तस्मिन्रक्तबीजे हते सति देवा निरुपमं हर्षं प्रापुः रुधिरपानेनोद्धतो ब्रह्मा-
णीप्रमुखो मातृगणश्चानृत्यत् ६० इति श्रीरामाश्रमविरचितायां देवीमाहात्म्यटीकायामन्यकृतायां च रक्तबी-
जवधो नामाष्टमोध्यायः ८॥ इदं देव्याश्चरितस्य चेष्टितस्य माहात्म्यमौदार्यं विचित्रं नानाप्रकारमाश्चर्यकरं व्या-
ख्यातं कथितं यद्वा चरितं चेष्टितं माहात्म्यं प्रतापातिशयः तयोः समाहारो रक्तबीजवधाश्रितं १॥

स॰
प्र॰ टी॰
५४

54

स्वामिन् रक्तबीजे निपातिते सति शुंभो निशुंभश्चातिकोपेन यत्कर्म चकार तच्छ्रोतुमिच्छामि २ रक्तबीजे निपातिते स
ति संग्रामे ऽन्येषु धूम्रलोचनादिषु च हतेषु सत्सु शुंभो निशुंभश्चातुलं कोपं चकार ३ महासैन्यं हन्यमानं विलोक्य क्रोधमुद्व
हन् अभ्यधावत् अभिमुखं ययौ अपि शब्दः इतरसमुच्चयार्थः मुख्यया प्रधानभूतया दैत्यसेनया सह उपलक्षितो वा सेनाया
यावति स्म ४ तस्य निशुंभस्याग्रे पृष्ठे च पार्श्वयोश्च महासुरा देवीं हंतुं समीपमाजग्मुः क्रुद्धा अत्यंतसरोषा अत एव कोपेन सं

भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते चकार शुंभो यत्कर्म निशुंभश्चातिकोपितः २ ऋषिरुवाच चकार को
पमतुलं रक्तबीजे निपातिते शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ३ हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन्
अभ्यधावन्निशुंभोपि मुख्ययासुरसेनया ४ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः संदष्टौष्ठपुटाः क्रुद्धा देवी
हंतुमुपाययुः ५ आजगाम महासैन्यः शुंभोपि स्वबलैर्वृतः निहंतुं चंडिकां कोपात्कृत्वा युद्धं च मातृभिः ६
ततो युद्धमतीवासीद्देव्याः शुंभनिशुंभयोः शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ७ चिच्छेदस्ताञ्छरांस्ताभ्यां चं
डिका स्वशरोत्करैः ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ ८॥

दष्टौष्ठपुटा येस्ते ५ शुंभोपि स्व सैन्यैर्वृतः सन् कोपा
च्चंडिकां निहंतुमाजगाम मातृभिः सह युद्धं कृत्वा चंडिकां प्रत्याययौ ६ एकत्वाद्देव्याः देव्या इत्येकवचनं शुंभनिशुंभ
योर्द्वित्वात्तयोर्द्विवचनं देव्येति तृतीयांतपाठे सहार्थे तृतीया तृतीया सहशब्दयोगेपि ···
ततोनंतरं देव्याः शुंभनिशुंभयोश्चातीव युद्धमासीत् तत्रातीव शरवर्षमुग्रं बभूव अत्र दृष्टांतः वर्षतोर्मेघयोरिवेति ७ चंडि
काताभ्याममस्तान् विमुक्तान् देवी स्वशरसमूहैश्चिच्छेद शस्त्रौघैः शुंभनिशुंभौ अंगेषु हस्तपादादिषु चाजघान ८॥

निशितं दत्तदशनं चर्मफलकं शोभनाप्रभायस्य तत्तथा आदाय देव्या वाहनोत्तमभूतं सिंहं मूर्ध्नि ताडयामास ९ वाहने सिंहे ता
डिते सति देवी चंडिका निशुंभस्योत्तममसिं क्षुरप्रेण बाणविशेषेण अर्धचंद्रेण बाणविशेषेण वा तथा च प्रयोगः दंभाग्रनखैश्च
क्षुरप्रखंडितं इति तेनाशु शीघ्रं अष्टौ चंद्राः चंद्राकाररचनाविशेषा यत्र तच्चर्म चापि खड्गाभरणं वाछिनत् १० सा अर्धादेवी तामपि
शक्तिमभिमुखागतां चक्रेण द्विधा खंडं कृतवती ११ अथ निशुंभः कोपेन प्रज्वालितः शूलं जग्राह देवी मुष्टिप्रहारेण शू
लोस्त्रीति द्विलिंगत्वेन शूलशब्दस्याभिधानसंग्रहीतत्वात् आयांतं मुष्टिपातेनेति पाठः पुंलिंगे शूलशब्दप्रयोगाभिप्राये

निशुंभो निशितं खड्गं चर्म चादाय सुप्रभं अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमं ९ ताडिते वाहने देवी क्षुरप्रे-
णासिमुत्तमं निशुंभस्याशु चिच्छेद चर्म चाप्यष्टचंद्रकं १० छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोसुरः ताम
प्यस्य द्विधा चक्रे चक्रेणाभिमुखागतां ११ कोपाध्मातो निशुंभोथ शूलं जग्राह दानवः आयांतं मुष्टिपातेन देवी
तच्चाप्यचूर्णयत् १२ आकृष्याथ गदां सोपि चिक्षेप प्रति चंडिकां सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता १३

णेति तेयं तमप्यायांतं चूर्णीचकार १२ आविध्य भ्रामयित्वा आङ् विपूर्वस्य अजेर्वीतिवीभावे कृते यीवर्णयो दीधीवेव्यो
रिति योगविभागादीकारलोपे रूपं अथवा शूलं चूर्णीकृतवान् आविध्याथ समंताद्व्यथितोभूत् व्यथङ् दुःखसंचलन-
योरित्यस्मात् ल्यप् आत्मनेपदाभावश्छांदसः गदामपि चिक्षेप आविध्येति पाठे ताडयित्वेत्यर्थः देव्याः कर्यासे शूलेन का-
रणेन भिन्ना भस्मत्वमागता भस्मभूतेत्यर्थः देव्या त्रिशूलेनेति षष्ठ्यंतपाठे देवी त्रिशूलेनेत्येकपदपाठे कर्तरि तृतीया
सापि निशुंभो गदामाकृष्यादाय चंडिकां प्रति चिक्षेप गदापि देव्या त्रिशूलेन भिन्ना सती भस्मीबभूव १३॥

स॰
प्रा॰टी॰
५५

ततस्तं दैत्यपुङ्गवं दैत्यमुख्यं परशुर्हस्ते यस्य सः तं बाणौघैः शरसमूहैराहत्य भूतले, पातयत पातयामास लिचश्छेत्यात्मनेपदं १४ तस्मिं भीमविक्रमे भ्रातरि निशुम्भे भूमौ निपतिते सति संक्रोधातीव क्रुद्धोऽम्बिकां हन्तुं प्रययौ १५ स शुम्भस्तथा सामुद्रिकोक्तलक्षणप्रकारेणात्युच्चैः गृहीतपरमास्त्रैर्निरुपमैः शेषमाकाशं व्याप्य भातिस्म तदाष्टभुजैरित्यपि क्वचित्पाठः १६ तं शुम्भमायान्तं समालोक्य देवी शंखं पूरयामास न धनुर्ध्वनुषश्चापस्यातीव दुःसहं टंकारशब्दं चकार यत्तु प्रकृतिस्वभाववशाख्यानं त्रयन्त्यजन्या संबन्धाभावात् १७ समस्तदैत्यसैन्यानां ककुभो दिश इत्यन्वयः यावद्दिक्षु दैत्यसैन्यानि स्थितानि तावद्दिशो निजघण्टास्वनेन पू

ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवं आहत्य देवी बाणौघैरपातयत भूतले १४ तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकां १५ स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभो १६ तमायान्तं समालोक्य देवी शंखमवादयत् ज्याशब्दं चापि धनुषश्चकारातीव दुःसहं १७ पूरयामास ककुभो निजघण्टास्वनेन च समस्तदैत्यसैन्यानां तेजोवधविधायिना १८ ततः सिंहो महानादै॰
(स्त्याजितेभमहामदैः पूरयामास गगनं गां तथैव दिशो दश १९ ॥

रयामासेत्यर्थः तेजोवधविधायिना तेजोवधकारणशीलानां तेजोवधविधायिनेति पाठे स्वनविशेषणं तथा घण्टास्वनेन समस्तदैत्यसैन्यानां तेजोवधं विदधातीत्येवं शीलेन ककुभः पूरयामास १८ त्याजिता इभानां महामदा यैर्गगनमाकाशं गां पृथिवीं दश दिशश्च तथैव पूरयामास उपदिशोऽपि दश व्यामा इत्यर्थः दिशामिवोपदिशामपि दशसंख्याप्रतिच्छेदः नन्वदिशोऽदशैव वर्णिते किं दशग्रहणेनेति चेदुच्यते अदशप्रोहावान्तरे इति वचनात् दिशा इत्युक्ता कादशोत्पकां ताया मुपदिश इति योज्यं उपदिक्त द्विनादिश इति मध्यपदलोपीसमा

55

ततोनंतरंसिंहोमहानादैःपृथिवींतथादशदिशःपूरयामास तत्सिंहनादंश्रुत्वाद्विरदाविमदाअभूवन्नित्यर्थः १९ ततोनंतरं
कालीचामुंडासमुत्पत्योत्पत्य तेनहृताकराभ्यांगगनंक्ष्मांचाताडयत् तेनताडनशब्देनशब्दाःप्रथममुत्पन्नास्तेसर्वेतथानिनी
ताः गगनेसमुत्पत्योत्प्लुत्यकराभ्यांक्ष्मांभूमिमताडयत् तन्निनादेनकरयोर्निनादेनतिरोहिताःपिहिताः २० अथशिवदूती
काली अट्टाट्टहासं उच्चैर्हासं अशिवंभीषणंरौद्रंचकार तैर्वहाट्टहासशब्दैरसुरास्त्रस्ताउद्विविजिरे शुंभोत्यर्थंकोपंययौ क्रुद्धोजा
तः २१ अंबिकायदा दुरात्मंस्तिष्ठतिष्ठेति कोपेवीप्साइत्युक्तवती तदाकाशसंस्थितैर्देवैर्जयदेवीत्युक्ते २२ शुंभेनागत्ययाश
क्तिःक्षिप्तासतीज्वालावदतिशयेनभीषणारौद्रा,श्चिचयतस्याआयांतीसतीउल्कायानिपातेननिराकृतामहाकृततादंविक

ततःकालीसमुत्पत्यगगनंक्ष्मामताडयत् कराभ्यांतन्निनादेनप्राक्स्वनास्तेतिरोहिताः २० अट्टाट्टहासमशिवंशिवदूती
चकार २ तैःशब्दैरसुरास्त्रेसुःशुंभःकोपंपरंययौ २१ दुरात्मंस्तिष्ठतिष्ठेतिव्याजहाराम्बिकायदा तदाजयेत्यभिहितं
देवैराकाशसंस्थितैः २२ शुंभेनागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा आयांतीवह्निकूटाभासानिरस्तामहोल्कया २३

या २३ लोकत्रयस्यभूर्भुवःस्वर्लक्षणस्यांतरंमध्यंभुवोलोकइतियावत् अवनिपते हेराजन् निर्घातनिःस्वनउत्पातध्वनिर्जि
तवानर्थात्सिंहनादं मातृगणस्यनिर्घातध्वनिनाशुंभस्यसिंहनादोभिभूतइत्यर्थः अथवाभावेक्तः जितंपराजयनं अभि
भवोस्यास्तीतिजितवान् पराजयवान् परिभववानभूदित्यर्थः अर्थात्सिंहनादेनकर्मणिवाछांदसःक्तवतुः सिंहना
देनोत्पातध्वनिरपिजितइत्यर्थः अथवासिंहनादेनसहितउत्पातध्वनिःसमस्तंलोकत्रयांतरंपरिभूतवानित्यर्थः शुंभस्य
वीरध्वनिनात्रिभुवनमध्यंव्याप्तं हेनृपघोरसिंहनादेनघोरोनिर्घातनिःस्वनस्तिरोदधे २४ ॥

स॰ ॥ देवीश्रीचंडिका शुंभमुक्तान्बाणांश्चिच्छेद शुंभो देव्या प्रहितान्बाणान्शतसहस्रसंख्याकैर्बाणैरहनत् २५ सा चंडिका क्रुद्धा
प्रा॰टी॰ सती शूलेन तं शुंभमताडयत् स शुंभस्तेन शूलेनाभिहतः सन्मूर्छां प्राप्तो विचेता निपपात २६ ततः शुंभपतनानंतरं मूर्छानंतरं
५८ वा निशुंभश्चेतनां सम्यक्प्राप्य कार्मुकमादाय देवीं चंडिकां कालीं शिवदूतीं केसरिणं चाहतवान् २७ पुनरपि दनुजेश्वरः शुंभः श
तसहस्रसंख्याकान्बाहून्कृत्वा चक्राणामयुतेन चंडिकां छादयामास यद्येवं दनुज दितिजः २८ दुःखेन ग

56

सिंहनादेन शुंभस्य व्याप्तं लोकत्रयांतरं निर्घातनिःस्वनो घोरो जितवानवनीपते २४ शुंभमुक्ताञ्छरान्देवी शुंभ
स्तत्प्रहिताञ्छरान् चिच्छेद स्वशरैरुग्रैः शतशोथ सहस्रशः २५ ततः सा चंडिका क्रुद्धा शूलेनाभिजघान तं स त
दाभिहतो भूमौ मूर्छितो निपपात ह २६ ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः आजघान ततो देवी कालीके
सरिणं तथा २७ पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः चक्रायुधेन दितिजश्छादयामास चंडिकां २८ ततो भगव
ती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् २९ ततो निशुंभो वेगेन गदामादाय चं
डिकां अभ्यधावत वै हंतुं दैत्यसैन्यसमावृतः ३० ॥

म्यते त्रायते स्यात्तत्त्वमिति दुर्गा इति प्रार्थिता आर्तिः पीडा अथवा दुर्गे सं
कटे आडिसमुद्रादौ या आर्तिस्तां नाशयतीति दुर्गार्तिनाशिनी कर्तरि ल्युट् ततो ऽपि प्रनाशिनीति पाठे ताच्छील्ये णिनिः
ततो भगवती चंडिका क्रुद्धा सती स्वशरैस्तानि चक्राणि तान् निशुंभप्रहितांश्च बाणांश्छेत्सीत् दुर्गा विषमा आर्तिः पीडा र
क्षत्येवंशीला २९ ततोनंतरं निशुंभो वेगेन गदामादाय दितिजसैन्येन परिवृतः चंडिकां हंतुमुपाद्रवत् ३० ॥

तस्याभिमुखमागछतएवशीघ्रंतीक्ष्णधारेणगदांविछेद ततोनिशुंभःशूलंजग्राह ३१ देवनिसूदनंनिशुंभंशूलहस्तमाग
छंतंदृष्ट्वावेगभ्रामितेनशूलेनहृदिविव्याधतस्मिन् ३२ तिष्ठतिवदन्नपरःपुरुषोहृदयान्निर्गतःसंतस्थः तस्यनिशुंभस्यशूलेन॰
भिन्नस्यसतोहृदयादपरोदैत्योमहाबलःशरीरवीर्यतेजोयस्येतितिष्ठेतिजल्पन् ३३ तस्यपुरुषस्यनिर्गछतःसतःश्रीचंडिका
स्वनवत्समयाहृदयास्यात्तथाप्रहस्यप्रकर्षेणहासिवासमंतात्महदहासंकृत्वाखड्गेणशिरश्छिछेद ततोसौपुरुषोभुविपपात ३४

तस्यापततएवाशुगदांविछेदचंडिका खड्गेनशितधारेणसचशूलंसमाददे ३१ शूलहस्तंतमायांतंनिशुंभ
ममरार्दनं हृदिविव्याधशूलेनगदाविद्धेनचंडिका ३२ भिन्नस्यतस्यशूलेनहृदयान्निःसृतोपरः महाबलोमहावीर्य
स्तिष्ठेतिपुरुषोवदन् ३३ तस्यनिष्क्रम्यतोदेवीप्रहस्यस्वनवत्ततः शिरश्छिछेदखड्गेनततोसावपतद्भुवि ३४ ततःसिंह
श्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथाकालीशिवदूतीतथापरान् ३५ कौमारीशक्तिनिर्भिन्नाःकेचिन्ने
शुर्महासुराः ब्रह्माणीमंत्रपूतेनतोयेनान्येनिराकृताः ३६ माहेश्वरीत्रिशूलेनभिन्नाःपेतुस्तथापरे वाराहीतुंड
घातेनकेचिच्चूर्णीकृताभुवि ३७ खंडंखंडंचचक्रेणवैष्णव्यादानवाःकृताः वज्रेणचैंद्रीहस्ताग्रविमुक्तेनतथापरे ३८

ततःशिरश्छेदनानंतरंसिंहस्तानसुरानभक्षयत् उग्रदंष्ट्राभिःक्षुण्णा.संमर्दिताःशिरोधराग्रीवायेषांतान् तथाकालीशिव
दूतीचापरान्जघान ३५ केचिन्महासुराःकौमारीशक्तिनिर्भिन्नाःसंतोनाशंप्रापुर्वंतःकेचिद्ब्रह्माण्याःशाक्तेमंत्रपूतेनतोयेन
विधस्ताःसंतोविनष्टाः ३६ माहेश्वर्यास्त्रिशूलेनभिन्नाश्चूर्णीकृताःसंतोपरेकेचिद्वाराह्यास्तुंडघातेनचूर्णिताभुविपतं
तिस्म ३७ वैष्णव्याःशक्त्याचक्रेणदानवाःखंडशःकृताःऐंद्रीहस्ताग्रविमुक्तेनान्येतिलशःकृताः ३८॥

स॰
श॰ टी॰
५७

57

विनेशुः स्तताः महाहवात्महासंग्रामात्यातालं नष्टाश्चपस्तताः कास्यादिभिरपदेजीवंतपवभक्षिताः मातृभिर्मर्दिताः केचि
दैत्याः पातालं विविशुः केचित्संग्रामात्रेशुर्नेष्टाः केचिद्वाम्बंडचंडिकादिभिर्भक्षिताः ३९॥ इति श्रीदेवीमाहात्म्ये टीकाद्वय
समवृपेनिशुंभवधोनाम नवमोध्यायः ९ प्राणेन सहसम्यग्मितं तुलितं जीवसममित्यर्थः प्राणवत्संमतं प्रियं
भ्रातरं निशुंभं निहतं दृष्ट्वा शुंभः क्रुद्धः सन्वचनमब्रवीत् १ बलेन योबलेपोगर्वस्तस्मात् हे दुष्टे दुर्विनीते अन्यासां बल
माश्रित्य यातिमानिनी महाहंकारवती त्वं युध्यसे मावंगर्वमावहमाकुरु स्वतो बलाभावादित्यर्थः युध्यसे चातिमानि
नीति पाठेन छहाध्याहारं विनेव योजना किमुवाचेत्याह हे दुष्टे दुर्गे चंडिके दर्पाच्छ्रयाद्दर्वं माकुरु अन्यासां ब्रह्माण्या॰

केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ३९ इति श्रीदेवीमाहा
त्म्ये सावर्णिके मन्वंतरे निशुंभवधोनाम नवमोध्यायः ९॥ ऋषिरुवाच॥ निशुंभं निहतं दृष्ट्वा भ्रातरं प्राण॰
सम्मितं हन्यमानं बलं चैव शुंभः क्रुद्धोब्रवीद्वचः १ बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह अन्यासां बलमाश्रि
त्य युध्यसे चातिमानिनी २ देव्युवाच॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा पश्यैता दुष्ट मय्येव विशंत्यो म॰
द्वीनां मातृणां बलमाश्रित्याभिमानवती अहंकारिणी २ एका सजातीयस्वगतभेदहीना अत्र जगति म (द्विभूतयः ३॥
मापराव्यतिरिक्ता द्वितीया न कापीत्यर्थः केति किंपदं आक्षेपे ननु त्वद्व्यतिरिक्ताब्रह्माण्याद्याः प्रत्यक्षसिद्धा इति क
थं तदपलापः स्या साक्षादनुभूयमानस्य भेदस्य काल्पनिकत्वेनाप्युपपत्तेर्न वास्तवत्वसिद्धिरित्याशयेनाह पश्यैति एता
ब्रह्माण्याद्या मद्विभूतयः हे दुष्ट अह्मरणे एकैवाहं द्विभूतयो मम प्राकृतयः संपत्तयो वा मय्येव विशंत्यः सतीति पश्य अथवा द्वितीयार्थे छांद
सी प्रथमा मय्येव विशंतीः पश्य पश्य अतो भेदस्यैव दुष्ट अह्मरणे एकैवाहं वर्ते ममापरा द्वितीया का ममैव प्राकृतयो मय्येव विशंत्यस्त्वया र

दृष्टा तां हंतुमारभत इति॥

प्राप्ति॥

५७

ततोनंतरं ताः समस्ता ब्रह्माणीप्रमुखास्तनौ शरीरे लयमाश्लेषं अदर्शनभावं जग्मुरित्यन्वयः बहुषिली नाबभूवुरित्यर्थः
तदांबिका एकैवासीत् ४ अहमिह जगति स्थाने वा स्वविभूत्या निजमहिम्ना बहुभी रूपैर्यदास्थिता ० तस्याने शामामया तत्सर्वं संहृ
तं अथाहमेकैव रणे तिष्ठामि त्वं स्थिरो भव ५ अनादरे षष्ठी पश्यतः सर्वदेवान् सुरांश्चानादृत्येत्यर्थः ततो देव्याः शुंभस्य
चोभयोः सर्वदेवानां पश्यतां घोरं युद्धं प्रवर्तते स्म ६ तयोः शुंभिकाशुंभयोः वीरणशष्टिभिः तीक्ष्णैः शस्त्रैस्तथा दारुणैरस्त्रैर्गांडी
वं वारुणेन वारुणं वायव्येन वायव्यं सार्पेण सार्पं गारुडेन गारुडं वैष्णवेन एवमस्त्रमस्त्रेण निघ्नतोस्तयोर्युद्धमभूद्यतो

ऋषिरुवाच ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ४ श्रीदेव्यु
अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ५ ततः प्रववृते युद्धं देव्याः शुंभ
स्य चोभयोः पश्यतां सर्वदेवानामसुराणां च दारुणं ६ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः तयोर्युद्धम
भूद्भूयः सर्वलोकभयंकरं ७ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथांबिका बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृ
भिः ८ मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः ९॥

युद्धं त्रिलोकलोकानां व्यथिताः भूयो महत् पुनर्वा ७ यानि दिव्यान्यस्त्राणि मुमोच तेषां प्रतीघातं उर्वैती तितत्प्रतीघातकर्तृ
णि तैरस्त्रैरिति विभक्तेर्विपरिणामेन पुनरत्र प्राहुः स्यान्वयः प्रतीघात इति उपसर्गस्य घञ्यमनुष्ये बहुलमिति दीर्घः अथांबि
काया नि दिव्यान्यस्त्राणि मुमुचे अस्त्राणां पूर्वोक्तविधिना प्रतीकारकैः प्रत्यस्त्रैस्तानि शतशो ० भनक् ८ तेन शुंभेन दिव्यान्य
स्त्राणि मुक्तानि परमेश्वरी लीलया ० नायासेन उग्रमिति भिन्नपदे क्रियाविशेषणम् उग्रं उत्कटं यथा स्यात्तथा बभंज उग्र
हुंकार इत्येकपदपाठे उग्राये हुंकारोच्चारणादय उपायाः तैरिति योज्यं ९॥

ततः शरशतैः सोऽसुरो देवीमपि छादयति स्म सापि तस्मिन् कुपिता तत्कुपिता वा बाणैश्चापं छिन्नवती तदित्यव्ययं तस्येत्यर्थः १०
तथा तेन प्रकारेणाथ धनुषि छिन्ने सति दैत्येंद्रः शक्तिं जग्राह चंडिकास्य करस्थितां तामपि शक्तिं चक्रेणाहंतिस्म ११ दैत्या
नामधिपा निशुंभादयस्तेषामपीश्वरः अधिपश्चासावीश्वरश्चेति वा शतचंद्रः कृत्रिमचंद्रशतान्वितं चंद्रशतविरचितं दे
दीप्यमानं चर्म चोपादाय भानुमत् रश्मिमत् भानू रश्मिदिवाकरावित्यमरः तेजस्विदित्यर्थोऽभ्यद्रवत तदा देवीं चंडिकां
धावतिस्म १२ चंडिका तस्य संमुखमागच्छत एव धनुर्मुक्तैः शितैर्बाणैः खड्गं सूर्यरश्मिवन्निर्मलं चर्मं च विच्छेद १३ अश्वांश्च पा

ततः शरशतैर्देवीमाच्छादयत सोऽसुरः सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः १० छिन्ने धनुषि दैत्येंद्रस्तथा
शक्तिमथाददे चिच्छेद देवी चक्रेण तामप्यस्य करे स्थितां ११ ततः खड्गमुपादाय शतचंद्रं च भानुमत् अभ्यधावत
तदा देवीं दैत्यानामधिपेश्वरः १२ तस्यापतत एवाशु खड्गं चिच्छेद चंडिका धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककराम
लं १३ अश्वांश्च पातयामास रथं सारथिना सह हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः १४ जग्राह मुद्गरं घोरं चं
डिकानिधनोद्यतः चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः १५॥

तयामास रथं सारथि नासहेति पदार्थः क्वचिन्नास्ति
तत्र हताश्व इत्यादिना तस्मिन्नवसरे अश्वादिवधोऽप्यनुमीयते केचित्त्वश्ववधस्यानुक्तत्वात् हताश्व इति स्थाने हता
सिरिति पाठे तन्मते विसारथिरिति नियामकस्य विद्यमानत्वेन हताश्व इति पाठस्याधिकत्वप्रतीतेः १४ सा देवी तस्य दै
त्यस्याश्वान् पातयामास सारथिना सह रथमपातयत् ततः स दैत्यो हततुरगः छिन्नचापः सारथिरहितो बभूव
१४ ततः स मुद्गरं चंडिकाया निधनायोद्यमपरः सन् घोरं मुद्गरं अग्रहीत् ॥

जग्राह तस्याग्रच्छतः सत्तो देवी प्रहृत्य ताडयत्यस्य प्रहाराभिहतं कृत्वा शरैर्मुद्गरं छिनत्ति स्म १५ मुद्गरे छिन्नेपि तथापि स शुंभो मुष्टि
मुद्यम्य वेगेन तां चंडिकां प्रति धावति स्म स दैत्यपुंगवस्तं मुष्टिं देव्या हृदये पातयामास पुमांश्चासौ गौश्चेति गोरतद्धितलुकीति
टच् ३ असि तलेन करतलेन चपेटेनाजघान संपिंडितांगुलिर्मुष्टिः प्रसृतिः कुंचितांगुलिः प्रसारितांगुलिः पाणिः कथ्यते प्र
तलस्तले दृश्युटश्रंप्राह्णित १६ स दैत्यस्तलप्रहाराभिहतः सन्महीतले मसृणो तले चाधःस्वरूपयोरिति नामानुशासनात्
पतितः सन्पुनस्तत्क्षणादेवोत्थितः ७ स संभ्रमउच्चैरत्यर्थमुत्पत्य ऊर्ध्वं गत्वा देवीं प्रगृह्योच्चैस्तां च गगनमास्थितोधिरूढः

तथापि सोभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् स मुष्टिं पातयामास हृदये दैत्यपुंगवः १६ देव्यास्तं चापि सा देवी त
लेनोरस्यताडयत् तलप्रहाराभिहतो मूर्छितो निपपात ह ७ स दैत्यराजः सहसा पुनरेव तथोत्थितः ७ उ
त्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः तत्रापि सा निराधारा युयुधे तेन चंडिका १८ नियुद्धं खे तदा दैत्यश्चंडिका
च परस्परं चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकं १९

सा देवी तत्रापि गगनेपि निराश्रया ... पाताभाववद्देवहीनेत्यर्थः तेन संभ्रमेन सह युद्धं चकार १८ तदा दै
त्यश्चंडिका च नियुद्धं बाहुयुद्धं खे व्योम्नि चक्रतुरिति कर्मव्यतिहारे सत्यपि नात्मनेपदं परस्परशब्दयोगेन निषेधात् कीदृशं
प्रथममभूतपूर्वं अत एव सिद्धमुनिविस्मयकारकं सिद्धा देवयोनिविशेषाः मुनयो मननशीलाः मरीच्यादयः सिद्धपद
स्थाने युद्धमिति क्वचित्पाठः स प्रामादिकः प्रामाणिकैरव्याख्यातत्वात् तस्मिन्काले दैत्यश्चंडिका च बाहुयुद्धं परस्परं
चक्रतुः तत्प्रथमं परमं युद्धं मुनिविस्मयकारणं बभूव १९ ॥

ततोंबिका तेन सह सुचिरं नियुद्धं कृत्वा उत्पत्य ऊर्ध्वं नीत्वा उत्पाट्येति पाठे तोलयित्वेत्यर्थः भ्रामयामासेत्यत्र संज्ञापूर्वको विधिरनित्य इति मित्वाभावेन ह्रस्वत्वाभावः तदनु भ्रामयित्वा धरणीतले धरण्या अधःस्वरूपयोस्तले चिक्षेप चेति विनापि चकारं चकारार्थो वगंतव्यः २० स क्षिप्तः क्षिप्तः सन् पृथ्वीं प्राप्य मुष्टिमुद्यम्य वेगितो वेगयुक्तः सन् वेगग्रहणात्तत्करोतीत्यर्थे णिचुतदंतात्क्तः स दुष्टात्मा वेगतश्चंडिकाया वधकांक्षयाभ्यधावत् २१ ततस्तं सर्वदैत्यजनेश्वरं आगच्छंतं शूलेन वक्षसि भित्त्वा भूमौ पातयामास २२ स शंभो गतासुः गताः असवः प्राणा यस्य स गतासुः मृतः सन् पृथ्व्यां पपात देव्याः शूलस्याग्रभागेन शूलस्तवेन वावि

ततो नियुद्धं सुचिरं कृत्वा तेनांबिका सह उत्पात्य भ्रामयामास चिक्षेप धरणीतले २० स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्य
म्य वेगतः अभ्यधावत दुष्टात्मा चंडिकानिधनोद्यतः २१ तमायांतं ततो देवी सर्वदैत्यजनेश्वरं जगत्यां पातयामास
भित्वा शूलेन वक्षसि २२ स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वतां २३
ततः प्रसन्नमखिलं हते तस्मिन्दुरात्मनि जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः २४॥

क्षतः विक्षोभेणाकृ सितः चल हिं
सायामित्यस्मात् क्तप्रत्यये अनुदात्तोपदेशेत्यादिना अनुनासिकलोपे च रूपं वीक्षत इति पाठे अन्येषामपि दृश्यत इति दीर्घत्वे चालयन् कंपयन् यद्यपि कंपने चलिरिति मित्वाद्ध्रस्वत्वं न प्राप्नोति तथापि चालयतिनियमेन स्थानांतरं प्रापयतीत्यर्थे विवक्षिते न कंपनं अथवा चलनं चालः तं करोतीति णिच् तदंतात् शतृप्रत्ययः स शंभो देवीशूलाग्रविक्षतः समस्तसमुद्रद्वीपपर्वतसहितां पृथ्वीं चालयन् पृथ्व्यां पपात २३ तस्मिन् शंभे दुरात्मनि निहते सति अशेषं जगत्प्रसन्नं प्रकाशीभूतं स्वास्थ्यं प्राप विश्वं प्रसन्नमभूत् स्वास्थ्यं च प्राप आकाशं च निर्मलं बभूव २४॥

उत्पातसूचकामेघाउल्कासहितायेशुंभवधात्पूर्वमासन् तेशममुपशांतिंययुः तत्रशुंभेमारितेसति नद्यःस्ववर्त्मगामिन्यो
भूवन् येपूर्वंशुंभोत्पातनिमित्तामेघाअप्रयतनाबभूवुः दिष्टानिसर्वाणिकष्टानिचानयन् नद्यश्चमार्गवाहिन्योभूवन् २५ तस्मिं
शुंभेनिहतेसतिसर्वेदेवगणाहर्षेणनिर्भरंपूर्णाचेतसश्चासन् गंधर्वाश्चललितंमनोहरंमधुरंयथास्यात्तथागानंकृतवंतः
२६ अन्येकेचनवाद्यान्यवादयन् नित्यवक्रर्भिप्रायेणापरस्मैपदं अप्सरोगणानर्तयंतिस्म तथापुण्याःपवित्रामंदाःसुरभयो
नकूलारजःसत्याश्चवाताववुः दिवाकरश्चविमलतेजस्कोभूत् २७ शांताःशुंभवधात्प्राग्येउपशांताअग्नयआसन् तेजज्व

उत्पातमेघाःसोल्कायेप्रागासंस्तेशमंययुः सरितोमार्गवाहिन्यस्तथासंस्तत्रपातिते २५ ततोदेवगणाःसर्वेहर्ष
निर्भरमानसाः बभूवुर्निहतेतस्मिन्गंधर्वाललितंजगुः २६ अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः ववुःपु
ण्यास्तथावाताःसुप्रभोभूद्दिवाकरः २७ जज्वलुश्चाग्नयःशांताःशांतादिग्जनितस्वनाः २८ इतिश्रीसावर्णि
केमन्वंतरेदेवीमाहात्म्येशुंभवधोनामदशमोध्यायः १०॥

लुः यद्वाशांताःसौम्याःसंतोजज्वलुः दिग्जनितःस्व
नोदिग्जनितस्वनःशांतोदिग्जनितस्वनोयेषां उत्पातपूर्वकदिग्दाहदशायामशौभस्फुरणादिशब्दआसीत्सशांतइत्यर्थः य
द्वाशांतादिग्जनितःस्वनोयैःशांतिकमंत्रैःहुतैरग्निभिःकृत्वादिग्जनितउत्पातसूचकोनिर्घातशब्दःशांतइत्यर्थः यद्वाशां
ताःसद्दिग्जनितःस्वनोयैः अंगारिणीदिग्रविविमुक्तायस्यांरविस्तिष्ठतिसाप्रदीप्ताप्रधूमितायास्यतितांदिनेशःशेषाश्च
शांताःशुभदाश्चताःस्युरितिवराहमिहिरोक्ताःशांतादिशोज्ञेयाः अग्नयःशांताःसौम्याःप्रदक्षिणवर्तिनोनिर्धूमाश्चज्वलंति
सदिग्जनिताःस्वनाउपशममायाताः एतावतासर्वारिष्टोपशांतिर्बभूवेत्यर्थः २८ इतिश्रीदेवीमाहात्म्येटीकाहृयसमन्वयेशुंभव

॥८॥ सप्त.टी.

स॰ देव्याहते तस्मिन्महासुरेंद्रे इंद्रसहिता वह्निः पुरोगमो येषां ते सुरास्तां कात्यायनीं गौरीं देहसमुद्भवां तुष्टुवुः इष्टस्या
प्रा॰ टी॰ भिमतस्यार्थस्य लाभात्प्राप्तेः इष्टलाभादिति पाठे उपसर्गाद्धल्यजोरिति षष्ठ्योगकरणान्नुम् विकसनं विकासः सोस्त्येषां
९॰ तानि विकासीनि तेषां वक्त्राब्जानां रश्मिभिर्विकासिताः प्रकाशिता आशा दिशो यैः विकासिवक्त्रान्तु विकासिताशा इति पाठे विकासि
ना विकस्वरेण वक्त्राब्जेन प्रकटीकृता आशा प्रत्याशा यैरिति योज्यं १ तामेव स्तुतिमाह हे देवि प्रपन्नानां भक्तानां तेषामार्तिं दुःखं हरती
ति तस्याः संबोधनं हरतेरनुद्यमने चूततः प्रसीद प्रसन्ना भव संभ्रमे प्रसीदेति द्विरुक्तिः ईश्वरी स्वतंत्रा चराचरस्येति निर्धारणे
षष्ठी चराचरमध्ये त्वमेव स्वतंत्रेत्यर्थः अथवा॰ खिलस्य जगतस्त्वमेव माता चराचरस्य त्वमेवेश्वरी स्वामिनी अतो विश्वं पाहीति योज्यं

60

ऋषिरुवाच॥ देव्याहते तत्र महासुरेंद्रे सेंद्राः सुरा वह्निपुरोगमांस्तां कात्यायनीं तुष्टुवुरिष्टलाभाद्विकासिवक्त्राब्जवि
कासिताशाः १ देवा ऊचुः देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोखिलस्य प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी दे
वि चराचरस्य २ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नम लंघ्यवीर्ये

हे जगन्मातर्हे विश्वेश्वरि प्रसादं कुरु ननु कथं चराचरस्य स्वामिनीत्याशंक्याह २ हे देवि त्वमेका विश्वस्य जगत आधारभूता त्वामेवा
धारमाश्रित्य जगद्वर्तते ननु कथमाधारत्वं यतः पृथ्वीरूपेणाधारभूता वर्तसे सर्वेषामपि धरैवाधारभूता हे अनतिक्रमणीय बले
उदकरूपमाश्रितया त्वयैवाजीव्यते अंभसैव सर्वे प्राणिनि तदपि त्वैव रूपं जलस्वरूपया त्वयैतत्समग्रं जगदाप्यायते आप्या
यी वृद्धौ कर्मणि लट् धातूनामनेकार्थत्वात्स्थिरीक्रियते इत्यर्थः अपां स्वरूपस्थितयेति षष्ठी राहोः शिर इतिवदर्थशून्या जलस्व
रूपयेत्यर्थः नान्येन लंघ्यं अनतिक्रमणीयं वीर्यं प्रभावो यस्याः तस्याः संबोधनं अतस्त्वमेव चराचरस्वामिनीति सिद्धं ३॥

९॰

हे देवि त्वं वैष्णवी शक्तिः विष्णोर्व्यापनशीलस्येयं वैष्णवी अथवा विष्णुरेव वैष्णवी स्वार्थे ऽण् सर्वव्यापिकेत्यर्थः अन्यथा विष्णुसंबं
धित्वमात्रोक्तौ सा स्वतः सर्वव्यापकत्वानुक्तेः स्तुतित्वं न प्रतीयेत अनंतं नानाविधसंसारसंपादकं वीर्यं सामर्थ्यं यस्याः सा विश्वस्य बी
जं मूलकारणं बीजभूता यायास्त्वत्त एव विश्वमुत्पद्यते परमा निरतिशया अघटितघटनापटीयसीत्यर्थः एवंभूता माया ऽविद्या
शक्तिरसि भवसि एतत्समस्तं जगत्त्वया संमोहितं विषयीकृतं ममतामायादिना सर्वमेव मोहे पातितं त्वयेति शेषः वै निश्चि
तं प्रसन्ना सती इष्टा ब्रह्मविद्यास्वरूपेण मुक्तेः कारणभूता संसारसागरे त्वमेव पातयसि मुक्तिमपि त्वमेव ददासीत्यर्थः ४
विद्याः वेदविद्यांगादिलक्षणाः समस्ता अष्टादशसंख्याकाः ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति चत्वारो वेदाः शिक्षाकल्पो

त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ४
विद्याः समस्तास्तव देवि भेदाः स्त्रियाः समस्ताः सकलं जगत्सु त्वयैकया पूरितमंबसर्वं का ते स्तुतिः स्तव्यपरापरोक्तिः ५

व्याकरणं निरुक्तं ज्योतिषं छंदश्चेति षडंगानि पुराणन्यायमीमांसाधर्मशास्त्ररूपाणि चत्वार्युपांगानि आयुर्वेदो धनुर्वे
दो गांधर्वमर्थशास्त्रं चेति चत्वारि एवमष्टादशसंख्या विद्यास्तु निष्पद्यते उक्तं च अंगानि वेदाश्चत्वारो मीमांसान्यायविस्तरः
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश आयुर्वेदो धनुर्वेदो गांधर्वश्चेति ते त्रयः अर्थशास्त्रं पुराणं च विद्या अष्टादशोक्ताः
हे देवि एताः समस्ता विद्यास्तव भेदा विशेषाः सामान्यरूपा सर्वात्मिका त्वं अवांतरविशेषास्त्वेवैता इत्यर्थः एवं समस्ताः स्त्रि
योऽपि तवैव भेदाः समष्टिरूपा त्वं अन्याः समस्ताः स्त्रियस्तवैव व्यष्टयो ऽवांतरविशेषरूपाः कथंभूताः सकलाः चतुःषष्टि
कलाभिः सह वर्तमानाः ।

61

आलिंगनायाश्चतुःषष्टिकलाः कामशास्त्रोक्ता यिगंतव्याः एतज्जगत्त्वयैकया पूरितं अतिशयेन व्याप्तं कथंभूतया अंबया जननीरूप
या जननी यथा स्वोदरे विद्यमानं गर्भं व्याप्नोति तथा त्वोदरे विद्यमानं जगत्त्वया व्याप्यते इत्याशयः एवं च सति तेन त्व स्तुतिः का
न कापीत्यर्थः कुतइत्याशंक्याह स्तव्येति स्तव्यस्य या परा मुख्यतयोक्तिः अपरा गौणतया चोक्तिः सा स्तुतिः सा गौणमु
ख्यव्यवहारस्य परस्परसापेक्षत्वेन भेदघटितत्वात् सर्वात्मिकायां त्वयि भेदाभावात् भेदघटितगौणमुख्यभावकीर्तनरू
पा स्तुतिर्न संभवतीत्याशयः ननु मुख्यगौणगुणकीर्तनरूपस्तुत्यसंभवेपि मुख्यगुणमात्रकीर्तनमेव स्तुतिर्भवि
ष्यतीति चेन्न तस्यानुवादमात्रत्वेन स्तुतित्वाभावात् अथवा स्तव्यपरा स्तव्यविषयिणी परोक्तिः स्तव्यापेक्षया भिन्न
स्योक्तिः सा स्तुतिरिति लोके व्यवह्रियते न च सा भेदघटितात्वयि संभवति सर्वात्मिकायास्तव ततो भिन्नस्य स्तुतिः
कर्तुर्निरूपणानर्हत्वात् एकस्य कर्मकर्तृत्वासंभवश्चेति व्याख्येयं अथवा का कीदृशी अनिर्वचनीया स्तुतिरित्यर्थः
अथवा स्तव्यपरा स्तव्यविषयिणी परोक्तिः श्रेष्ठोक्तिः स्तुतिरिति व्याख्येयं अथवा स्तुतिरपि त्वमेवेत्याह स्तव्यपरा
परोक्तिश्चेति स्तव्यपरा परोक्तिः प्राणमयी वाक् अपरोक्तिः पश्यंत्यादिरूपा वाक् सा उभयविधापि त्वमेव चितिप्रत्य
वमर्शात्मा परा वाक्स्वरसोदिता सैव सारतया प्रोक्ता हृदयं परमेष्ठिनः इति परावाक्स्वरूपं प्रतिपादितं तथा सूक्ष्मा
कुंडलिनीमध्ये ज्योतिर्मात्रास्वरूपिणी अश्रोत्रविषया तस्मादूर्ध्वगामिनी स्वयंप्रकाशा पश्यंती सुषुम्नामा
श्रिता भवेत् सैव हृत्पंकजं प्राप्य मध्यमा नादरूपिणी सैवोरःकंठतालुस्थाशिरोघ्राणद्विजोपमा जिह्वामूलोष्ठनिः
सृता सकलवर्णपरिग्रहा शब्दप्रपंचजननी श्रोत्रग्राह्या तु वैखरी इति च अतएव परा पश्यंती मध्यमा वैखरी भेदेन
चतुर्विधा वाक् श्रूयते चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि ॥

निहितानींगयंतितुरीयंवाचोमनुष्यावदंतीति अस्यार्थः वाचः शब्दब्रह्मणः परिमितापरिमितानि गणितानि पद्यते ज्ञायते
पदं तत्त्व मेभिरितिपदशनिरूपाणि चत्वारि तानि चत्वार्यपि ये मनीषिणोंतर्दृष्टयस्ते विदुर्जानंति नान्ये यतो गुहायां देहमध्ये
त्रीणि निहितानि निहितानि नेंगयंति स्वरूपं न प्रकाशयंति ततः केवलं वाचस्तुरीयं चतुर्थभागं वैखरीरूपं मनुष्याः प्राणिनो वदं
ति तदपि वदंत्येव न तु तत्त्वतो जानंतीति तथा चैवं विधपरापरशब्दरूपत्वात्स्तुतिरूपा तमेवेति भावः ॥ अस्याटीका ॥ हे देवि
समस्ताश्चतस्रश्चान्वीक्षिक्याद्याः पुराणन्यायविद्यास्थानान्यष्टादश तवरूपं समस्ताः क्रियाः श्रौताः स्मार्ताश्च आगमिकास्तव
रूपं सकला वाचः संस्कृतप्राकृताद्या भाषास्तवरूपं संस्कृतप्राकृतं किं बहुना हे अंब त्वयैकया नानारूपत्वेन सर्वं पूरितं तेन

सर्वभूता यदा देवि स्वर्गमुक्तिप्रदायिनी त्वं स्तुता स्तुतये का वा भवंतु परमोक्तयः ६॥

वपरोक्तेः पराख्यायाः परा तु उक्तिर्यस्याः सा तस्याः स्तुतिः का कीदृक् यतस्तथ्यसत्का सत्यसत्का अविद्यमानं गुणकीर्त
नं स्तुतिः तत्र यत्किंचिदुच्यते तत्सर्वं सत्यमेव स्तुतिः किंभूता उक्तेः परा वचनातीता तव स्वरूपं न स्तोतुं समर्था वयं ५
सर्वंभूतं प्राप्तं तया सा सकलस्थावरजंगमात्मिका वा स्वर्गः सुखविशेषः मुक्तिरविद्यानिवृत्तिः परमानंदावाप्तिर्वा ते प्र
दातुं शीलं यस्याः सा स्वर्गमुक्तिप्रदायिनी एवंरूपा यदास्माभिस्त्वं स्तुता उक्तासि तदा तव स्तुतये परमोक्तयः श्रेष्ठोक्तयः
का वा भवंतु न का अपीत्यर्थः हे देवि त्वं सर्वभूता सर्वस्वरूपेण स्थिता यत्र सर्वमुक्तिप्रदायिनी त्वं स्तुता का वा अन्याः प
रमोक्तयः स्तुत्यर्थं भवंतु ६॥

स॰
श॰ टी॰
६२

तथाभ्युपगम्यमभ्यस्तदेवाह सर्वस्य जनस्य हृदि बुद्धिरूपेण संस्थिते संस्थिता प्राह्वस्य संबोधने रूपं स्वर्गापवर्गदे इत्यपि संबोधनं अपवर्गो मोक्षः नराद्धिंसोरुद्भूतानारा आपः अयनं निलयो यस्य नारं जीवसमूहं अयते गच्छतीति अन्तर्यामिरूपेणाव्याप्नोतीति वा नारायणस्तस्येयं शक्तिः तद्रूपा वा नारायणी तस्याः संबोधनं हे नारायणि ते तुभ्यं नमोऽस्तु ७ हे देवि कलात्रिंशत्काष्ठात्मकः कालः काष्ठा अष्टादशनिमेषात्मकः आदिपदेन निमेषमुहूर्तादिपक्षमाससंवत्सरवर्षयुगव्यवस्थाभिः विश्वस्य परिणामस्तावत्कोऽन्यथाभावस्तं प्रदातुं शीलं यस्याः सा तस्याः संबोधनं उपरतौ विश्वस्य विनाशे शक्ते समर्थे शक्ति प्राह्वस्य संबुद्धौ रूपं शक्ते इति पाठे शक्तिरास शक्तिः प्रकृतिर्वा कलादिषु गणितव्यवस्थाभिः स्वरूपं तत्समये विश्वस्य परिणामं प्रददातीत्येवं शीले हे देवि तुभ्यं नमः ८ सर्वेषु मंगलेषु वेदवेदांगादिषु मंगल्या मंगलाय हिता

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ७ कलाकाष्ठादिरूपेण परिणामप्रदायिनि विश्वस्योपरतौ शक्ते नारायण॰ ८ सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यंबके गौरि नारा॰ (९॥

अथवा सर्वं मंगलं मंगल्यं मंगलाय हितं यस्यां मंगलेषु साध्वी मंगल्या सर्वाणि मंगलानि यस्यां सा सर्वमंगला साचासौ मंगल्या च तस्याः संबोधनं अथवा सर्वेषां मंगलानां मंगल्यं मंगलभावस्तद्रूपा मंगलं त्वमेवेति भावः अत एव शिवे कल्याणकारिणि शरणं रक्षणं तत्र साध्वी शरण्या अथवा शरणार्हा आश्रयणीया तस्याः संबोधनं शरणागतानामतीतानागतवर्तमानजनसमीहितेक्षणार्थं अग्निसोमसूर्यात्मकानि त्रीणि अंबकानि नेत्राणि यस्याः सा त्र्यंबका तस्याः संबोधनं स्त्रियां टाप् इति टापो देवदीपालोचनमंबकमित्यभिधानात् हे गौरि गौरवर्णे कौशिके वा सर्वदा मंगलस्य मंगल्ये नित्ये शिवे कल्याणकारिणि सर्वेषामर्थसाधयित्रि शरणागतरक्षके त्रिनयने गौरि नमोऽस्तु ते ९

सृष्टिस्थितिविनाशानां कारणभूताः क्रमेण रजःसत्वतमोगुणप्रधानब्रह्महरिहराणां शक्तयस्तद्रूपा तस्याः संबोधनं सनात
ने हे नित्ये गुणानां महदादीनां आश्रयभूते सत्वरजस्तमसां साम्यावस्थास्वरूपत्वात्तगुणमये गुणत्रयस्वरूपे मयडंताद्यपि
ङीप् प्राप्नोति तथापि वाहुलकत्वात् टाप् मयडागतावित्यस्माद्वा गुणामयंते जायंते स्यामिति गुणमयेति व्युत्पादनीयं अथवा स
त्वरजस्तमसां साम्यावस्थारूपत्वाद्विद्यमानो गुणमयो गुणविकारो यस्यां सा अत्र गुणमये त्यकारप्रश्लेषेण व्याख्येयं आकाशादि
रूपेण शब्दादिगुणाश्रया शब्दादिरूपत्वेन च गुणमया चेति व्याख्येयं ९ दीनाः सार्वदिक्दुःखभाजः आर्ताः क्लेशशत्रुरोगादिपीडिताः श
रणागता ये दीनार्तास्तेषां परित्राणं सर्वभावेन रक्षणं परायणम् अभीष्टं यस्याः तस्याः संबोधनं परायणम् अभीष्टं स्यादिति नाम॰

रूपे

सृष्टिस्थितिविनाशानां शक्तिभूते सनातने गुणाश्रये गुणमये नारायणि ९ शरणागतदीनार्तपरित्राणपराय
णे सर्वस्यार्तिहरे देवि नारायणि॰ १० हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि कौशांभःक्षरिके देवि नारायणि ११

णासनात् सर्वा त्रिशूलचंद्राहिधरे महावृषभवाहिनि माहेश्वरीस्वरूपेण नारायणि॰ १२॥ धियाधिनाशिनि देवि नमस्तेन
मः ११ देवानां यथारूपं शक्तीनामपि तथैवाह ब्रह्माणी रूपं धरतीति तस्याः संबोधनं रूपधारिणी तत्संबोधनं रूपोदि
येपादोयःसक्ताविकता · · · सार्द्वपत्वाचनास्माकं समतः एवमग्रेऽपि युक्ताः हंसाः यद्वा राजदंतादित्वाद्युक्तशब्दस्य
परनिपातः हंसैर्युक्तं वायुर्हि मानं तत्र तिष्ठतीति तस्याः संबोधनं कुशांजलं तस्याश्रयः कौशः कमंडलुः तस्यांभः कौशां
भः कौशांभसः क्षरिका कौशांभः क्षरिका शेषिकविवक्षायामेव षष्ठी तेन कर्तरि चेति षष्ठी समासनिषेधे न कुशांभः क्ष
रेति पाठे कुशस्येदं कौशं हृद्यभावश्छांदसः कुशयुक्तं वाअंभः हंसवाहने ब्रह्माणि जपमालाकमंडलुधारिणि १२॥
हे देवि नारायणि विश्वशक्ते माहेश्वरी शक्तिरूपेण संस्थिते त्रिशूलं चंद्रमहिं धारयतीति महावृषभं धारयसीति ॥

त्रिशूलं चंद्रश्चंद्रैकदेशः अहिः सर्पस्तेषां धरेति विग्रहः तान्धरतीति विग्रहे कर्मण्यण्स्यात् वृषभं वाहयितुं शीलं यस्याः १३
कौमारीरूपसंस्थानमवयवसन्निवेशो यस्याः सा कौमारीरूपसंस्थाना तस्याः संबोधनं मयूरैः कुक्कुटैश्च वृता वेष्टिता मयूरकुक्कु
टपक्षाभ्यां मयूरकुक्कुटपिच्छानिलव्यंजते तैरलंकारतया वृते इति केचित् अघं पापं दुःखं च तद्धीनाः अनघा मयूर
कुक्कुटवाहने महाशक्तिधरे निष्पापे कौमारि त्वभ्यं नमः १४ शंखादीनि गृहीतानि परमायुधानि यया सा प्रहरणार्थेभ्यः परे
निष्ठा सप्तम्याविति गृहीतशब्दस्य परनिपातः गृहीतविविधायुधेति केचित्पाठः हे वैष्णवीरूपधारिणि त्वभ्यं नमः १५

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे कौमारीरूपसंस्थाने नाराय० १४ शंखचक्रगदाशार्ङ्ग गृहीतपरमायुधे प्र
सीद वैष्णवीरूपेण नाराय० १५ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे वराहरूपिणि शिवे नारायणि १६ नृसिंहरूपेणो
ग्रेण हन्तुं दैत्यान्कृतोद्यमे त्रैलोक्यत्राणसहिते नारा० १७ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले वृत्रप्राणहरे चैं
द्रि नाराय० १८ शिवदूतीस्वरूपेण हतदैत्यमहाबले घोररूपे महारावे नारायणि नमोस्तु ते १९॥

गृहीतमुग्रं महाचक्रं सुदर्शनचक्रं यया अतो दंष्ट्रयोद्धृता वसुंधरा यया सा वराहरूपमस्यास्तीति शिवे कल्याणकारिणि
नमोस्तु १६ उग्रेण नृसिंहरूपेण हिरण्यकशिपुप्रभृतीन्हन्तुमुद्यमपरे त्रैलोक्यस्य त्राणं रक्षणं तेन सहिता त्रैलोक्यत्रा
णसंहिता वा समसो वा हि ततयोरिति मकारलोपः हे देवि त्वभ्यं नमः १७ ऐंद्रि इंद्ररूपधरे किरीटो मुकुटो यस्या अस्तीति संबो
धनं महान्वज्रो यस्याः सहस्रैर्नयनैरुज्ज्वला वृत्राख्यो विश्वकर्मणोपत्यं तस्य प्राणान्हरतीति १८ शिवदूतीस्वरूपे
ण हतं दैत्यानां बलं यया भयानकरूपे महामुक्तरावे हे देवि त्वभ्यं नमः १९॥



दंष्ट्रयाकरालं वदनं यस्याः शिरसां मुंडानां माला विभूषणं यस्याः मुंडस्य मथनीति मथना चंडस्य मुंडस्य च शिरोधरणाद्वा मुंडे
ध्वनेतावत्तेवमुंडमथनत्वमपि प्राप्तं यद्यपि तथापि स्तुतित्वान्नपौनरुक्त्यंदोषावहं ४ लक्ष्मी पाहृस्य यूस्त्र्याख्यौ नदीति नदीसं
ज्ञत्वाद्ध्रस्वत्वे संबुद्धौ सर्वसम्मतं केचित्तु औणादिकप्रत्ययांतत्वेन नदीसंज्ञाभावात्सुलोपं ह्रस्वत्वं च नेच्छंति ते उपेक्षणीया मंद
बुद्धित्वात् लज्जे ... महतो ब्रह्मणः प्राप्तिहेतुत्वाद्विषयीकरणाद्वा महाविद्या ब्रह्मणोपि हृति विषयत्वमिष्यत एव ते
नविषयीकरणपक्षो ऽदृष्टेन मंतव्यः उपनिषद्रूपेत्यर्थः श्रद्धे ... पुष्टिरूपत्वात् संबुद्धौ गुणाभावश्छांदसः सुलो

दंष्ट्राकरालवदने शिरोमालाविभूषणे चामुंडे मुंडमथने नारायणि नमोस्तु ते २०॥
लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे महारात्रि महामाये नारायणि नमोस्तु ते २१

पशुभवप्रलयरूपाया ... ह्रस्वांतत्वात् अथवा पुष्टिर्युक्ता स्वधेति मध्यमपदलोपी समासो ज्ञेयः स्वधापितृदेविदं
नमंत्रः ध्रुवे स्थिरे महती चासौ रात्रिश्च परार्थद्वयावसानतया प्रलयरूपाया रात्रेर्महत्त्वं रात्रिशब्दात् कृदिकारादक्ति
न इति ङीषि कृते संबुद्धौ ह्रस्वत्वं छांदसो वा गुणाभावः महती च विद्या महाविद्या सा च नित्या शुचिर्डः खानात्मसन्नित्यशु
विशुद्धत्वान्महाख्यातिरूपा महत्त्वं चास्याः सर्वजीवान्प्रति ब्रह्मस्वरूपावरणे सामर्थ्यस्य विद्यमानत्वात् २१॥

स०
श० टी०
६४

मेधे वहुग्रंथावधारणशक्ते सरस्वति वाग्देवते श्रुतिस्मृतीतिहासादिरूपे वा वरे श्रेष्ठे भूतिः सत्वगुणः कारणे कार्योपचारा-
त्सत्वगुणयोगाद्भूतिः सात्विकी संभूतो गुणभावश्छांदसः अथवा भूतिरुत्तरोत्तरसंपत् अणिमाद्यैश्वर्यरूपा बभ्रुशब्देन रजो
गुण उच्यते इत्ययं बाभ्रवी बभ्रुर्वैश्वानरः कदाचिदुत्पन्ना वभ्रोर्विष्णोर्वेयं बाभ्रवी विपुले नकुले विष्णौ बभ्रुः स्यात्पिंगले त्रिषु इति
धरणिः तामसीति रूपेति व्याख्येयं नियते नियतरूपे प्राचीनकर्मरूपे अवश्यंभावे रूपे वा ईशे स्वामिनि कालांतराद-
विस्मरणरूपा मेधा श्री भारती रूपे भूतिसंपदं ददासीति संसारं विना प्राग्मुक्तिं ददासीति सनातने सर्वेषामीशे प्रसीद त्वभ्यं नमः

64

मेधे सरस्वति वरे भूति बाभ्रवि तामसि नियते त्वं प्रसीदेशि नारा० २२ सर्वतः पाणिपादांते सर्वतोऽक्षिशिरोमुखे
सर्वतः श्रवणघ्राणे नाराय० २३ सर्वस्वरूपे सर्वेशि सर्वशक्तिसमन्विते भयेभ्यस्त्राहि नो देवि नारायणि०
२४ एतत्ते वदनं सौम्यं लोचनत्रयभूषितं पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते २५॥

२२ सर्वतः सर्वास्वपि दिक्षु सर्वभावेनाभिव्याप्य वा पाणीपादौ चांते यस्याः सर्वतोऽक्षीणि शिरांसि मुखानि सर्वत्र वर्तंते
श्रवणघ्राणाद्यवयवैः सर्वमेव व्याप्तमित्यवगंतव्यं अयं श्लोको गौडैर्न पठ्यते २३ सर्वं विश्वं स्वरूपं यस्याः सर्वेषामी
शे स्वामिनि सर्वेषां शक्तिभिः सर्वासां मातॄणां वा शक्तिभिः सर्वाभिः वा शक्तिभिः समन्विते नोऽस्मान् त्राहि पालय
हे दुर्गे देवीति पदद्वयं प्रसादने अथवा दीव्यतीति देवी देवस्येयं वेति व्युत्पत्तिभेदेन पदद्वयं व्याख्येयं २४ एत
ते मुखं मनोज्ञं नेत्रत्रयालंकृतं सर्वभीतिभ्योऽस्मान् पातु कात्यायनोऽश्रमोऽद्भवे देवि श्रीगौरि त्वभ्यं नमः २५॥

भद्राचासौकालीचकृत्स्नाच ज्वालयाकरालंभीषणं उग्रंवा सकलदैत्यविध्वंसनं त्रिशूलमस्मान्भयात्पातु श्रीभद्रकालिगौ॰
रीदेहसमुद्भवेभ्यो नमः ॥२६॥ साघंटानोस्मान्पापेभ्यः प्रतिकूलेभ्योरक्षतु कःकानिव अनःप्राणीसुतानपत्यानिव अनप्राणने
इत्यस्मादचिरूपं अनितीत्यनः प्राणी सचार्थात्पितायथानोस्माकंपापेभ्योनोस्मान्रक्षतु यद्व अनःपाकटंसुतान्बालकान्
पापेभ्योदुष्टेभ्यःपाति पाकटेपिहित्वा बालकाःस्थाप्यन्तेयतः अथवानस्सुतान्दुष्टसुतानिव नमकौटिल्ये इत्यस्मात्कर्तरि कि
प अथवा सानःपातु पापेभ्योनः सुतानिवपातु योजनीयं सुष्टुशोभनानिचतानिसुतानितानीत्यपेक्षायां साघंटास्सव स्व॰

ज्वालाकरालमत्युग्रमशेषासुरसूदनं त्रिशूलंपातुनोभीतेर्भद्रकालिनमोस्तुते २६॥
हिनस्तिदैत्यतेजांसिस्वनेनापूर्ययाजगत् साघंटापातुनोदेविपापेभ्योनःसुतानिव २७
असुरासृग्वसापंकचर्चितस्तेकरोज्वलः शुभायखड्गोभवतुचंडिकेत्वांनतावयं २८॥

लः तच्चवदनं तानित्यदादीनिसर्वैर्नित्यमित्येकशेषः घंटास्मान्पापेभ्योरक्षतु याघंटास्वनेनजगत्त्रितयमापूर्य दैत्यतेजां
सि हिनस्ति दैत्यानतीवभीषयति यथा अनोमाता पापेभ्यः सुतान्पाति अनोमातरि शाकटेचेति हिनस्तीतितदृहिंसि हिंसा॰
यां रुधादिकः २७ हेदेविनखरखड्गः शुभायभवतु असुराणांरुधिरमेदःपंकेनचर्चितोविलिप्तः करेहस्तेसमुज्वलयती॰
तिकरोज्वलः करैःकिरणैर्वाउज्वलः २८॥



रुजंतिव्यथयंतीतिरोगाउपद्रवाःतानपहंसिनाशयसिरुष्टातुपुनःकामान्मनोरथानभीष्टान्सकलानप
हंसीत्यनुवर्त्यते विपत् ऋणयोगात्ऋणाविपत्तिःईतिविशेषार्थे एवार्थेपादपूरणेइत्यभिधानात् विशेषतोयेत्वा
माश्रितास्तेप्यन्येषामाश्रयतांप्रयांतीत्यन्वयः २९ हेदेवियत्त्वयाप्रकामात्ममूर्तिमनेकै रूपैर्ब्रह्माण्यादिलक्षणैर्बहुधा

रोगानशेषानपहंसितुष्टारुष्टातुकामान्सकलानभीष्टान् त्वामाश्रितानांनविपन्नरा
णांत्वामाश्रिताह्याश्रयतांप्रयांति. २९ एतत्कृतंयत्कदनंत्वयाद्यधर्मद्विषांदेविमहा
सुराणां रूपैरनेकैर्बहुधात्ममूर्तिंकृत्वांबिकेतत्प्रकरोतिकान्या ३० ॥

बहुप्रकारांकृत्वामूर्तिंबाहुल्यंकृत्वेत्यर्थः रूपैरितिप्रकृत्यादित्वात्तृतीया धर्मद्विषांपापिष्ठानांमहासुराणांक
दनंमारणंकृतं एतदेवंकर्मतत् कदनंतदितरःकाप्रकर्तुमर्हति नकापीत्यर्थः ३० ॥
॥

विद्यासु इंद्रजालादिलक्षणासु लोकस्य योगक्षेमविधायिनीषु वा आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिषु प्रमाणेषु वेदेतरवि
द्यास्थानेषु विवेकस्तत्त्वसाक्षात्कारस्तं दीपयंति उद्बोधयंतीति विवेकदीपा वेदांतास्तेषु आद्येषु वाक्येषु कर्मकांडेषु तेषामु
पनिषद्भ्यः प्राचीनत्वात् अथवा आद्येषु वाक्येषु वेदेषु किंभूतेषु विवेकदीपेषु कर्मब्रह्मप्रतिपादकेषु त्वदन्या का त्वमेव सर्वत्र
विद्यादिषु नानारूपेण भासीत्यर्थः न केवलं विद्यासु प्रतिभासि अपितु प्रत्यक्षतयानुभूयमानं विश्वं ममत्वगर्त्ते ममता
श्रयः संसारस्तस्मिन्नतिमहांधकारे महतामपि संसारनिवर्तकब्रह्मज्ञानप्रतिबंधके विभ्रामयसि पुनः पुनः प्रवर्तयसि
संज्ञा सर्वस्य विषये अनित्यत्वात्मिन्नेपि स्वत्वाभावः अथवा ममत्वगर्ते ये विद्यादयस्तेषु एतद्विश्वं त्वदन्या का विभ्रामयति
अपितु त्वमेव विभ्रामयसीति योज्यं विद्यास्वाध्यात्मिकादिषु इह सारस्वतागमे वेदांतसिद्धांतादिषु शास्त्रेषु आद्येषु वाक्येषु

विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ममत्वगर्तेतिमहांधकारे विभ्रामयस्येकमिवाकैवि
श्वं ३१ रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि वि
श्वं ३२॥

श्रुतिस्मृतिपुराणादिषु विवेकदीपतुल्यैः प्रमाणैः विवेकवस्तुदर्शनं जन्यते का त्वदन्या जगत्तितरां तत्र त्वं वागर्थरू
पा अथवा तेषु त्वमेव गीयसे तथा महांधकारे मोहरूपे ममत्वगर्ते अयमहं बहुगुणोहं त्वं यता एते सुतदारविभवदेहप्रमा
दयो ममेति ममता सैव गर्त्त आवर्तस्तत्रैतद्विश्वं विविधप्रकारेण भ्रामयसि एतस्मिन्संसारे जन्मजरामरणादिभ्रमणे को
पि यदुक्तं श्रीभागवते हित्वात्मपातं गृहमंधकूपं परे स्थितो यद्धनमाश्रयेत ३१ हे देवि यत्र रक्षांसि राक्षसाः यत्रोत्कटविषाः
सर्पाः यत्र प्राणवः यत्र तस्करसमूहः यत्रारण्ये दावानलः परिपीडयति तत्र स्थिता त्वं परिपासि तथाब्धिमध्ये उपद्रवस्तत्रा
पि त्वमेवेति योज्यं केचिद्दावानलपदं वडवाग्निपरतया व्याकृत्यैकवाक्यतया योजयंति ३२॥

स· प्रा· टी· ९०

हे देवि त्वं सर्वस्येश्वरी अत एव प्रभुत्वात्त्वं विश्वं परिपासि हे देवि त्वं विश्वात्मिका विश्वस्वरूपा विश्वं त्वमेवेति कारणाद्विश्वं धारय
सि इतीदं प्रकाशमानं वा इंद्रादीनां वंद्या त्वं विश्वेशस्य ब्रह्मणो वंद्या स्तव्या नमस्या वा ये त्वयि भक्त्या प्रणतिपरास्ते विश्वेषामा
धारभूता भवंति ३३ हे देवि चंडिके प्रसीद प्रसन्ना भव प्रसादं कुरु अस्मान्शत्रुभयात्परिपालय अरिभयं मा भवत्व नित्यं
यथासुरवधादिदानीमधुनैव तत्क्षणं जाता तथा नित्यं परिपालयेति शेषः तथा सर्वजगतां पापमुपशमं शीघ्रं प्रापय जगंति
निष्पापानि विधेहि यथा कष्टं कदाचन नोत्पद्यते उत्पातेत्यत्राविवक्षितत्वान्न संधिः उत्पाता अरिष्टा अनिष्टसूचका उल्कापा

विश्वेश्वरी त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वं विश्वेशवंद्या भवती भवंति विश्वाश्रया ये त्वयि भक्ति
नम्राः ३३ देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः पापानि सर्वजगतां प्रशमं नया
शु उत्पातपाकजनितांश्च महोपसर्गान् ३४ प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि त्रैलोक्यवासिनामीड्ये
लोकानां वरदा भव ३५ ॥ श्रीदेव्युवाच ॥ वरदाहं सुरगणा वरं यन्मनसेप्सितं तं वृणुध्वं प्रयच्छामि जगतामुपकार
कं ३६

तादयस्तेषां पाकः परिणतिपर्यवसायिता ताज्जनिता ये महोपसर्गाः उग्रविनाशकारीकादिनापादेनवस्तान् त्रि
विधोत्पातपरिणामसंभवादुत्पातानां पाकोऽवधिः तथोपसर्गान्विघ्नानामय वाराहसंहितायामुक्तं अयमुत्पातो मक
मंडले जातोऽस्मिन्समये फलतीति उत्पातेषु जातेषु देवि त्वं स्मर्यते तत उपसर्गाः क्षयं यांति ३४ देवि त्वं नतिमतां प्रसीद वि
श्वस्यार्तिहरे त्रैलोक्यवासव्यानां लोकानां ईड्ये स्तव्ये अस्माकं वरमभिलषितं देहि ईड्ये स्तवे ३५ हे सुरगणाः वरोऽभी
प्सितोऽर्थः यदित्यव्ययं यं वरमित्यर्थः यमिति वा पाठः मनसेप्सितं वरं याचध्वं जगतामुपकारभूतं यद्वाहं प्रयच्छामि ३६॥

हे त्रैलोक्येश्वरि त्रैलोक्यस्य याः सर्वा आध्यात्मिकाधिदैविकाधिभौतिकाबाधाः पीडादुर्भिक्षनरूकादिका वातासां प्रशमनमे
वमेवानेनैव प्रकारेण कार्यं यथायास्मद्वैरिविनाशकृते ३७ वैवस्वतेंतरे वैवस्वतमनोरधिकारोपलक्षिते काले सप्तमे म
न्वंतरे इत्यर्थः अष्टाविंशतितमे अष्टाविंशतिसंख्याके अष्टाविंशतिप्राप्ते ततोमउगमछांदसः अष्टाविंशत्यामीयेत
इति अष्टाविंशतिमः इतिवा सप्तम्यर्थे प्राप्ते अष्टाविंशतिमे इत्यनुवादाविवक्षितत्वान्न संधिः युगे चतुर्युगे शुंभनिशुंभाख्यावसु
रौ पुनरन्यौ उत्पत्स्येते ३८ तदाहं नंदगोपगृहे जातासती यशोदानंदगोपगृहिणी तस्याः समुद्भूता ततः पश्चात्तौ शुंभ

देवा ऊचुः सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि एवमेव त्वया कार्यमस्मद्वैरिविनाशनं ३७ श्रीदेव्युवाच
वैवस्वतेंतरे प्राप्ते अष्टाविंशतिमे युगे शुंभो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ३८ नंदगोपगृहे जाता यशो
दागर्भसंभवा ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी ३९ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले अवतीर्य
हनिष्यामि वैप्रचित्तान्महासुरान् ४० भक्षयंत्याश्च तानुग्रान्वैप्रचित्तांस्तु दानवान् रक्ता दंता भविष्यंति दा
डिमीकुसुमोपमाः ४१ ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकां ४२

निशुंभौ विंध्यनिवासिनी नाशयामि ३९ पुनरपि पृथिवीतले ऽतिरौद्रेण रूपेणावतीर्य विप्रचित्तवंश्यान्महासुरान्हनि
ष्यामि ४० भक्षयंत्याः प्रकृतत्वान्मम दाडिमीकुसुमं उपमा येषां ते मत्सदृशा वा रक्तात्लोहिता दंता भविष्यंति ४१
स्वर्गे देवा मर्त्यलोके च मानवाः स्तुवंतो मां रक्ता दंता यस्याः सा तन्नाम कीर्तयिष्यंति ४२ ॥

स॰
श॰ टी॰
६८

पुनरपि शतवर्षाणि प्रमाणं यस्याः सा शतवार्षिकी शतवर्षभवा वा कालात् ठञ् उत्तरपदवृद्धिः न विद्यते आ समंतात् वृ-
ष्टिर्यस्यां वा ता… जलसंबंधो यस्यां भूमौ अनंभसीति कविप्रवादः निरुद्धकायां मुनिभिः संस्तुता सती अयोनिजा स्वयंभूः संभवि-
ष्यामि ४६ ततः पश्चात् नेत्राणां शतेन यन्मुनीन्निरीक्षिष्यामीति परस्मैपदं छांदसं ईक्षते रात्मनेपदित्वात् यद्वा निःशेषेणेक्ष-
ते इति निरीक्षा प्रत्ययश्च तां करोतीति णिच् ततो धातुसंज्ञायां लृट् णिचो लोपश्छांदस इति केचित् ततः कारणान्मां मनुजाः
शताक्षीं मां कीर्तयंति ४७ हे सुराः ततोनंतरं स्वशाकैर्निष्पादितैः शाकैर्वास्तुककटुकमूलादिभिरखिलं लोकं भरिष्या-

68

भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ४६ ततः शतेन नेत्राणां
निरीक्षिष्यामि यन्मुनीन् कीर्तयिष्यंति मनुजाः शताक्षीमिति मां ततः ४७ ततोहमखिलं लोकमात्मदेहसमुद्भ-
वैः भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ४८ शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि तत्रैव च व-
धिष्यामि दुर्गमाख्यं महासुरं ४९ दुर्गादेवीति विख्यातिं तदा यास्याम्यहं भुवि पुनश्चाहं यदा भीमं रूपं कृ-
त्वा हिमाचले रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ५० ॥

मि जयिष्यामि प्राणधारणार्थं यावद्वर्षागमं धारयिष्यामि ४८ शाकं बिभर्तीति शाकंभरी विख्यातिं तदाहं भूमाव-
हं यास्यामि तत्रैव दुर्गमनामानं महासुरं वधिष्यामि वधबंधने अनेकार्थत्वाद्धातूनां मत्र मारणे वधिः अथवा हनो
वधादेशो वधश्च वाचरतीत्यर्थे सर्वप्रातिपदिकेभ्यः क्विप् धातुसंज्ञायां लृट् ४९ तदा दुर्गादेवीति प्रथिमानं प्रा-
प्स्यसि ५० पुनश्चाहं यदा भयानकं रूपं कृत्वा मुनीनां त्राणकारणात् रक्षाहेतोः रक्षांसि राक्षसान् भक्षयिष्यामि ५०

६८

यदारुणाख्योरुणानामामहासुरः महाबाधांमहापीडांप्रतिकदनं तदातस्मिन्काले भ्रमरस्येदंभ्रामरं भ्रमरसमूहात्म
केवा असंख्येया अगणनीयाः षट्पदायत्रतत् संख्येयावाषट्पदाः पादायस्मिन्रूपेपदशब्दोपिपादवाचीपुंलिंगेबहु
त्वेलक्षटपतेनपुंसकेतत्सर्वसंमतः त्रिभुवनोपकारायतंमहासुरंहनिष्यामि तदामांलोकाभ्रामरीतिनाम्नास्तोष्यं
तिसर्वतःसर्वत्रसर्वेलोकावायुग्मं ५१ हेदेवाइत्थमेवंप्रकारेणयस्मिन्यस्मिन्कालेदानवेभ्यउत्पन्नाउत्थितापीडाभवि॰

यदारुणाख्यस्त्रैलोक्येमहाबाधांकरिष्यति तदाहंभ्रामरंरूपंकृत्वासंख्येयषट्पदं ५४ त्रैलोक्यस्यहितार्था
यवधिष्यामिमहासुरं भ्रामरीतिचमांलोकास्तदास्तोष्यंतिसर्वतः ५५ इत्थंयदायदाबाधादानवोत्थाभविष्यति
तदातदावतीर्याहंकरिष्याम्यरिसंक्षयं ५१ इतिश्रीसावर्णिकेमन्वंतरेदेवीमाहात्म्येनारायणीस्तुतिर्नामै
कादशोध्यायः ११ श्रीदेव्युवाच॥ एभिःस्तवैश्चमांनित्यंस्तोष्यतेयःसमाहितः तस्याहंसकलांबाधांना
शयिष्याम्यसंशयं १ मधुकैटभनाशंचमहिषासुरघातनं कीर्तयिष्यंतियेतद्वद्वधंशुंभनिशुंभयोः २॥
अष्टम्यांचचतुर्दश्यांनवम्यांचैकचेतसः श्रोष्यंतिचैवयेभक्त्याममामाहात्म्यमुत्तमं ३॥

ष्यति तदातदाहमवतीर्यविमृश्यशत्रुक्षयंकरिष्यामि ५१ इतिश्रीदेवीमाहात्म्येटीकाहृदयसंग्रहेएकादशोध्यायः ११
हेदेवाएभिःस्तोत्रैर्यआदरपरःसन्मांस्तोष्यते तस्यस्तोतुरहंनिःसंशयंनिःसंदिग्धंपीडांनाशयिष्यामि १ येनरा
मधुकैटभनाशंमहिषासुरसंभनिशुंभवधंचकीर्तयिष्यंति तेषांउक्तंतंकिंचिन्नभविष्यतीत्यग्रिमेणसंबंधः
२ अष्टम्यादिषुमत्प्रियतिथिपर्वसुयेएकाग्रचित्ताःमत्प्रभावकीर्तनंस्तोष्यंतिच ३॥

स॰
श॰ टी॰
६९

तेषां ममस्तवनकराणां किंचिद्दुष्कृतं पापं न भविष्यति तथा दुष्कृतोत्था दुष्कृतसमुद्भूता उत्पन्ना आपदो विपत्तयो न भविष्यंतीति वि
भक्तिपरिणामेन योज्यं दुष्कृतोत्था व्याधयस्तापत्रयापादेव भवंति तस्य दृष्टेदारिद्र्यं न इष्टवियोगश्च न भविष्यति ४ तस्य श
त्रोतः श्रोतस्य शत्रुतस्करराजशस्त्राग्न्यगाधजलेभ्यो भयं न भवति ५ यद्येवं फलमस्ति तस्मान्मत्प्रभावकीर्तनं मच्चरि
तं समाहितैः श्रद्धाभक्तिसमन्वितैः सावधानैर्वा पठितव्यं सदा श्रोतव्यं च यस्मात्परमुत्कृष्टं स्वस्त्ययनं श्रेयःसंपादकं महत्
एतन्महत्स्वश्रेयःसंपादकमन्यन्नास्तीत्यर्थः ६ महामारीप्रकोपे व बहुजनक्षयरूपा तत्संभवानुपसर्गानुत्पातान् त्रिविधमा

69

न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः भविष्यति न दारिद्र्यं न चैवेष्टवियोजनं ४ शत्रुतो न भयं तस्य दस्युतो
वा न राजतः न शस्त्रानलतोयेभ्यः कदाचित्संभविष्यति ५ तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः श्रो
तव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ६ उपसर्गानशेषांस्तु महामारीसमुद्भवां तथा त्रिविधमुत्पातं माहा
त्म्यं शमयेन्मम ७ यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम सदा न तद्विमोक्ष्यामि सांनिध्यं तत्र मे ध्रुवं ८
बलिप्रदाने पूजायामग्निकार्ये महोत्सवे सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव वा ९॥

ध्यात्मिकं रोगादि आधिदैविकं निर्घातवज्रपातादि आधिभौतिकं भूतप्रेतपिशाचादिकृतं कष्टं मम माहात्म्यं कर्तृ श
मयेन्नाशयेत् महामारी आगमांतरे विजयामतभेदभिन्नानशेषानुपसर्गान् तथा दिव्यांतरिक्षभूमिजं त्रिविधमु
त्पातं मम चरितं शमयति ७ यत्रैतत्सम्यगतिशुद्धं अनूनं च ममैतत्स्तोत्रं यत्रायतने यत्स्थाने नित्यं पठ्यते तदा
यतनं न विमोक्ष्यामि अत एव तत्रायतने मे मम सान्निध्यं सदा सर्वस्मिन्काले स्थितं अहं सर्वदैव तत्र स्थास्यामीत्यर्थः ८

बलिप्रदाने पश्वाद्युपहारसमर्पणे पूजायां गंधादिदाने अग्निकार्ये अग्निहवने महोत्सवे पुत्रोत्पत्तिविवाहादावुच्चार्यं पठनी-
यं ॥ बलिः हिंसाहिंसिका कुल्माषाद्युपहारः तद्दाने पूजायां क्रियमाणायां अग्निकार्ये वह्नौ मंत्रहुतसंस्कारद्रव्यहवनकर्म-
णि महोत्सवे अशेषं पठनीयं श्रोतव्यं च ९ जानता पशस्तोत्रपाठविधिज्ञेन अजानता संथायपाठानभिज्ञेन तथा तेन
प्रकारेण प्रतीच्छिष्यामि प्रतीच्छामि पेत्तां बलिसहितायाः पूजायाः करिष्यामीत्यर्थः परस्मैपदं छांदसं इच्छतेरात्मनेपदि-
त्वात् प्रतीछिष्यामीति क्वचित्पाठः तत्रेच्छां प्रतिगतः प्रतीच्छः गोस्त्रियोरिति ह्रस्वत्वं आचारे क्विप् यथा बसंज्ञायां लृट्स्यप्र-

जानताजानतावापिबलिपूजांतथाकृतां प्रतीछिष्याम्यहंप्रीत्यावह्निहोमंतथाकृतं १० शरत्का-
लेमहापूजाक्रियतेयाचवार्षिकी तस्यांममैतन्माहात्म्यंश्रुत्वाभक्तिसमन्वितः ११ सर्वबाधावि-
निर्मुक्तोधनधान्यसमन्वितः मनुष्योमत्प्रसादेनभविष्यतिनसंशयः १२ श्रुत्वाममैतन्मा-
हात्म्यमुत्पत्तीश्चतथाशुभाः पराक्रमंचयुद्धेषुजायतेनिर्भयःपुमान् १३ ॥

त्ययः इडागमः अतो लोपः षत्वं चेति साधनिका बलिसहितां पूजां प्रतिग्रहीष्यामीत्यर्थः आगमोक्तमत्पूजावि-
धाने जानताः जानता वापि हृतामहं मंगीकरिष्यामि १० युग्मं हे देवाः शरदि शरत्तौ महापूजा दुर्गोत्सवलक्षणा वा-
र्षिकी प्रतिवर्षं भवा क्रियते तस्यां क्रियमाणायां भक्तियुक्तः सन्नेतन्मममाहात्म्यं श्रुत्वा मनुष्यो मत्प्रसादेन सर्वपीडार-
हितो धनपदं धान्यव्यतिरिक्तधनपरं गोबलीवर्दन्यायेन तत्पूर्णो निश्चयेन भवति १२ उत्पत्तयः इति द्वितीयार्थे प्र-
थमा उत्पत्तीरित्यर्थः ममैतन्माहात्म्यं तथा उत्पत्तीर्युद्धेषु पराक्रमं च श्रुत्वा पुमान्निर्भयो जायते १३ ॥

स·
श·टी·
७·

नंदते वर्धते कुलं वंशः कर्तरि कर्मव्यतिहारः इत्यात्मनेपदं अन्यथा नंदतीति स्यात् मम माहात्म्यं शृण्वतां रिपवः संक्षयं यांति प्रत्यहं च कल्याणमुपपद्यते कुलं च नंदते इत्याति १४ शांतिकर्मणि उपसर्गनिवर्त्तने दुःस्वप्ने निष्फलसूचकः स्वप्नः ग्रहपीडा स्वष्टमादिस्थानस्थितादित्यादिग्रहजनितव्याध्यादिषु उग्रासु तीव्रासु सर्वत्र शांतिके पौष्टिके च यदनिष्टोपशांतये क्रियते तच्छांतिकं पुष्टयर्थं धनोपचितार्थं यत्कृतं पौष्टिकं इत्यादौ मन्माहात्म्यं श्रोतव्यं १५ मम चरिते कीर्त्यमाने उपसर्गा विघ्नानि शाम्यंति दारुणा ग्रहपीडाः क्षीयंते दुःस्वप्ने दृष्टे सुस्वप्नफलं जायते न तु दुष्टः स्वप्नो दुःस्वप्नः शोभनः स्व-

रिपवः संक्षयं यांति कल्याणं चोपपद्यते नंदते च कुलं पुंसां माहात्म्यं मम शृण्वतां १४ शांतिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं शामयेन्मम १५ उपसर्गाः शमं यांति ग्रहपीडाश्च दारुणाः दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते १६ बालग्रहाभिभूतानां बालानां शांतिकारकं संघातभेदे च नृणां मैत्रीकरणमुत्तमं १७ दुर्वृत्तानामशेषाणां बलहानिकरं परं रक्षोभूतपिशाचानां पठनादेव नाशनं १८॥

प्नः सुस्वप्न इति श्रुत्यस्यात्पुंलिंग एव दुःस्वप्नसुस्वप्नशब्दौ इति कथं नपुंसकप्रयोग इति चेत् न दुष्टः स्वप्नो यस्मिन्निति शोभनः स्वप्नो यस्मिन्नभीष्टे इति व्युत्पत्त्या नपुंसकेपि प्रयोगसंभवात् १६ बालग्रहाः स्कंदग्रहाः बालग्रहेति पाठे बाला दुष्टा मातरो ग्रहा किं न्योवा संघातो मेलनं तस्य भेदे विघटने दृष्टमैत्री विघटने इत्यर्थः अथवा संघातेन नरसमूहेन भेदे वैरे बालग्रहाः व्योम देवा एव स्तनादिकोगणाः विरोधोत्पन्नो चोत्तमं प्रीतिजनकं १७ अन्यायिनां बलनाशनं परमुत्कृष्टं रक्षसां भूतानां पठनादर्थस्य माहात्म्यान्नाशनं १८॥

70

ममैवं माहात्म्यं सर्वं मदखंडितं मम सान्निध्यदं तत्राहं तिष्ठामीत्याशयः पशुदानेन पुष्पस्रजयार्घ्यदानेन दीपेनोत्तमैः
स्रगगुरुधूपैश्च या प्रीतिरित्यग्रिमेणान्वयः अर्घ्यमष्टांगमाप: क्षीरं कुशाग्राणि दध्यक्षततिलानि च यवाः सिद्धार्थकाश्चैव म
ष्टम ष्टांगमुच्यते प्रोक्षणीयैर्महाभिषेके स्नानीयैर्वा अथवा मंत्रपूर्वकप्रोक्षणसंस्कारविशिष्टैर्महिषछागादिपशुभिः प्रे
क्षणीयैरिति पाठे नटबहुरूपादिकृतैः ऊर्ध्वलेः पनैर्वत्सरेण या मम प्रीतिः क्रियते सा प्रीतिरस्मिन्मच्चरिते सकृदेकवारं श्रुते
भवति विप्राणामिष्टभोजनदानेन तथा नानाद्रव्यहवनैः प्रेक्षणीयैर्नर्त्तनगीतवादित्राद्यैः अन्यैश्च मदुद्देशेन प्रकृष्टदानैः प

सर्वं ममैतन्माहात्म्यं मम सान्निध्यकारकं पशुपुष्पार्घ्यदीपैश्च गंधधूपैस्तथोत्तमैः १९ विप्राणां भोजनैर्होमैः प्रोक्ष
णीयैरहर्निशं अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या प्रीतिर्मे क्रियते सास्मिन्सकृदुच्चरिते श्रुते २० श्रुतं हरति पा
पानि तथारोग्यं प्रयच्छति रक्षां करोति भूतेभ्यो जन्मनां कीर्त्तनं मम २१ युद्धेषु चरितं यन्मे दुष्टदैत्यनिवर्हणं त
स्मिञ्छ्रुते वैरिभवं भयं पुंसां न जायते २२ युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ब्रह्मणा च कृतास्तास्तु
प्रयच्छंति शुभां मतिं २३॥

वं सर्वोक्तविधिभिः या मे प्रीतिर्वत्सरेण क्रियते सा प्रीतिरेकवेलं मम चरिते श्रुते सति भवति
सकृदुच्चरिते श्रुते इति पाठे तत्रोच्चरिते श्रुते वेति योज्यं २० जन्मनां मत्प्रादुर्भावानां कीर्त्तनं कथनं श्रुतं सत् नीरोगतां भूतेभ्यः सका
शात् मम कीर्त्तनं चरितं श्रुतं सत् पापानि हरति तथा जन्मिनां मनुष्याणामारोग्यं ददाति भूतेभ्यो रक्षां करोति २१ मे मम यच्
चरितं दुष्टदैत्यानां निवर्हणं मारणं यस्मिंश्चरिते तस्मिञ्छ्रुते सति शत्रुभिः कृतं भयं न जायते २२ हे देवा युष्माभिर्याः स्तुत
यः कृता याश्च ब्रह्मर्षिभिर्ब्रह्मणा च कृतास्तास्तु शुभां कल्याणयुक्तां मतिं प्रयच्छंति २३॥



स॰
श॰ टी॰
७१

अरण्ये इति गहने वने प्रांतरे ग्रामयोरंतरं दीर्घं प्रांतरं परिकीर्त्यते प्रांतरे इति हेमचंद्रः शून्येध्वनि वा अथवा प्रांतरे निविडे अरण्ये वा दावाग्निना पेतया वनवह्निना वेष्टितो वा शून्ये शून्यस्थाने दस्युभिश्चोरैः स्वैरं हृतो नेवा हृतः शून्यस्थाने एव शत्रुभिर्गृहीतो धृतः २४ वने सिंहव्याघ्रैरनुप्राप्तो नुगतः अरण्यगजैरनुयातः वध्यो मार्यः पूर्वं बंधं प्राप्तः पश्चात्क्रुद्धेन राज्ञा वध्योयमित्याज्ञप्तः अथवा निगडादि बंधं प्राप्तः इति भिन्नमेव योज्यं क्रुद्धेन राज्ञा आज्ञप्तो वध्यो भूतः अथ कोपेनादिष्टो वधयोग्यो वध्यो यद्वा तोयेन केनापि बद्धो वा २५ महार्णवे पोते समुद्रस्य नौकाविशेषे स्थितः सन् वातेन भ्रमणं प्रापितो व्याकुलित

71

अरण्ये प्रांतरे दुर्गे दावाग्निपरिवारितः दस्युभिर्वा हृतः शून्ये गृहीतो वाथ शत्रुभिः २४ सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बंधगतोपि वा २५ आघूर्णितो वा वातेन स्थितः पोते महार्णवे पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे २६ सर्वबाधासु घोरासु वेदनाभ्यर्दितोपि वा स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् २७ मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा दूरादेव पलायंते स्मरतश्चरितं मम २८ ऋषिरुवाच इत्युक्त्वा सा तदा देवी चंडिका चंडविक्रमा पश्यतां सर्वदेवानां तत्रैवांतरधीयत २९॥

त्यातिशयदुःसहेषु संग्रामे पतत्सु शस्त्रेषु २६ रोगादि विलोपद्रवेषु आधिपीडितो ममैतच्चरितं स्मरन् पूर्वोक्तान् दुःखान्मुच्येत इति सर्वत्र योज्यं मुच्येत इति कर्मकर्तरि आत्मनेपदं २७ मम चरितं स्मरतश्चिंतयितुः पुरुषात् सकाशात् मम प्रभावात् सामर्थ्यात् सिंहाद्या दूरादेव पलायंते स्मरतः पुरुषस्येति वा २८ चंडो विक्रमो यस्याः सा इति पूर्ववत् सकला तत्रैवांतरधीयत पश्यतामित्यनादरे षष्ठी अंतर्धा इत्यादधातेः कर्मकर्तर्यात्मनेपदं २९॥

तदेवाअपिनिरातंकानिर्भयाःसंतोयथापुरापूर्वंयथास्वाधिकारान्कृतवंतस्तथापतदनंतरमपिचक्रुःविशेषेणनिहताअ
रयोयेषांअर्थाद्देवाः ३० जगतांविध्वंसयितुंशीलमस्येतिजगद्विध्वंसकेमहोग्रेऽतिशयेनोग्रेऽसाधारणविक्रमेशेषाद्दनतोर्वरिता
दैत्याःपातालमाययुःगताइत्यन्वयः ३१ एवंसाभगवतीषड्गुणयुक्तादेवीनित्यापिपुनःपुनःसंभूयावतीर्यहेभूपविश्वरक्षांवि
धत्ते ३२ संभूयशरीरमादायप्रसूयतेउत्पादयति सृजुप्राणिप्रसवेदेवादिकःनैयायिकादिमतेविश्वपदंसगुणकादिकार्यपरं स
त्कार्यवादेप्रसवोभिव्यक्तिः सायाचिताप्रार्थितासतीविशिष्टंज्ञानंविज्ञानंतत्त्वज्ञानंसद्धिमैश्वर्यंप्रयच्छतिददातितुष्टासद्धिमि

तेपिदेवानिरातंकाःस्वाधिकारान्यथापुरा यज्ञभागभुजःसर्वेचक्रुर्विनिहतारयः ३० दैत्याश्चदेव्यानिहतेशुंभेदेवरिपौ
युधि जगद्विध्वंसकेतस्मिन्महोग्रेऽतुलविक्रमे निशुंभेचमहावीर्येशेषाःपातालमाययुः ३१ एवंभगवतीदेवीसानित्यापिपु
नःपुनः संभूयकुरुतेभूपजगतःपरिपालनं ३२ तयैतन्मोह्यतेविश्वंसैवविश्वंप्रसूयते सायाचिताचविज्ञानंतुष्टाऋद्धिंप्र
यच्छति ३३ व्याप्तंतयैतत्सकलंब्रह्मांडंमनुजेश्वर महाकाल्यामहाकालेमहामारीस्वरूपया सैवकालेमहामारीसैवसृ
ष्टिर्भवत्यजा ३४ ॥

त्युत्रसुस्पष्टकइतिप्रकृतिभावःसंहितायाअनित्यत्वाच्छांदसत्वाद्वासंध्यभावःअथवातुष्टाःआसीना
सद्धिंप्रयच्छतिआसउपवेशनेक्विप ३३ तयारूपत्रयात्मिकयाहेमनुजेश्वरमहतोब्रह्मादीनपिकालयतिस्वाधिकारेप्रवर्त्तयती
तिमहाकालीतयामहाकाल्यापतद्ब्रह्मांडंव्याप्तमितिसंबंधः किंभूतयामहासंहारसौकालश्चसर्वप्राणिप्रभावान्निमित्तसमयःप्रल
यकालोमहाकालस्तत्रमहामारीस्वरूपयाऽधिकमारणशीलतया सैवभगवतीकालेप्रलयसमयेहिपरार्द्धलक्षणेमहतोब्रह्मा
दीनपिमारयतीतिअथवामहतीमारीजननत्रयरूपासंहतिक्रियाभवतिसृष्टिकालेसैवअजाउत्पत्तिहीनाब्रह्माणीसृष्टिःसंतानकि

स॰ पालनसमये सैव देवी सनातनी अविनाशिनी प्राणिनां स्थितिं करोति तथा पूर्वोक्तया महामारीस्वरूपया विश्वं ग्रस्यते ३९ भा
श॰टी॰ वकाले उदयसमये नृणां गृहे लक्ष्मीः वृद्धिं प्रददाति सैवाभावे नाशकाले लक्ष्मीविनाशाय जायते तदुक्तं लक्ष्मीमपहरतीत्य
७२ र्थः संपत्समये संपत्तिदायिनी लक्ष्मीर्भवति विपत्काले॰ लक्ष्मीर्दारिद्र्यादिरूपा ४० सा तथा श्रीचंडिका स्तुता सती पुष्पैः संपूजि
ता पुष्पैर्गंधादिभिश्च परितोषिता सती वित्तं पुत्रांश्च ददाति तथा धर्मे धर्मविषये शुभमलक्षणां विमलां गतिं वा विष्णुलोकगा॰
मिनीं ददातीति ४१ इति श्रीदेवीमाहात्म्यटीकायां सप्तदशोऽध्यायः ॥ १७ ॥ हे भूप एतद्वयमपातन्म्यमुत्तमं चतुर्वर्ग॰

72

स्थितिं करोति भूतानां सैव काले सनातनी तथा संह्रियते सर्वं जगदेतच्चराचरं ३९ भावकाले नृणां सैव लक्ष्मीर्वृद्धि
प्रदा गृहे सैवाभावे तथा लक्ष्मीर्विनाशायोपजायते ४० स्तुता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा ददाति वित्तं पुत्रांश्च
गतिं धर्मे तथा शुभां ४१ इति श्रीसावर्णिके मन्वंतरे देवीमाहात्म्ये फलानुकीर्तनं द्वादशः ॥ १२ ॥ ऋषिरुवाच एतत्ते
कथितं भूप देवीमाहात्म्यमुत्तमं एवंप्रभावा सा देवी ययेदं मोह्यते जगत् १ विद्या तथैव क्रियते भगवद्विष्णुमायया तया
त्वमेव वैश्यश्च तथैवान्ये विवेकिनः २ ॥

हे नृप त्वां देवीमाहात्म्यं वर्णितं एवं पूर्वोपपादितरूपः प्रभावः सामर्थ्यं यस्याः
सा ययेदं जगन्मोहमापद्यते रक्ष्यते च १ विद्याऽऽत्मज्ञानं मोक्षोपयोगि तथैव तेन प्रकारेणैव यथा संसारप्राप्तिः क्रियते त
था संसारनिवर्तकं ज्ञानमपि क्रियते इत्यर्थः त्वं सुरथः एष वैश्यः समाधिः अन्ये च विवेकिनस्तत्त्वज्ञानिनोऽपि तयैव मोह्यंते इ
त्यन्वयः २ तथैव भगवतो विष्णोर्मायया विद्याऽऽत्मज्ञानं क्रियते तथा च श्रुतिः विद्यां चाविद्यां च यस्तद्वेदोभयं सह अवि
द्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते अविद्या कर्ममार्गः विद्या भक्तिमार्गः तया प्रसिद्धया त्वमेष वैश्यश्चान्ये ज्ञानिनश्च मो हि

मोह्यन्ते संप्रति मोहिताः प्राक् अग्रे मोहमेष्यन्ति च तत्र ज्ञानिनस्तया कथं मोह्यन्ते इति शंकानिराकरणार्थमेवकारः उपेहीत्य
त्र छेदसि पित्व विकल्पात् गुणः अन्यथा उप इहि इति स्थिते आद्गुण इत्यनेन गुणे कृते उपेहीति स्यात् आङ्पूर्वस्य तु आमाङोश्चे
त्यनेन पररूपत्वमेव स्यात् नपत्येयत्तु म्भिवतिहाहिः हे महाराज तां परमेश्वरीं विष्णुमायामुपेहि शरणं व्रज ३ अपवर्गो मोक्षः
देवी देवैः संगंधर्वैरिति काचित्कं देवादिभिराराधिता नृणां भोगस्वर्गापवर्गदेति पूर्वोक्तार्थयोरसंबंधश्च सैव ब्रह्मस्वरूपा आरा
धिता सती मोहदर्शी तथा भोगस्वर्गापवर्गदा ऐहिकपारलौकिकफलदायिनी एकमेवाद्वयं ब्रह्म सत्यमन्यद्विकल्पितं कः
शोकः कस्तदा मोह एकत्वमनुपश्यत इति हेतोः ४ तस्य सुमेधसो मुनेः संशितव्रतमाचरित नियमं तीव्रनियमं वा प्रोतं नृक

मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे तामुपेहि महाराज शरणं परमेश्वरीं ३ आराधिता सैव नृणां भोगस्वर्गापवर्ग-
दा ४ इति तस्य वचः श्रुत्वा सुरथः स नराधिपः प्रणिपत्य महाभागं तमृषिं संशितव्रतं ५ निर्विण्णोतिममत्वेन राज्यापह-
रणेन च जगाम सद्यस्तपसे स च वैश्यो महामुने ६ संदर्शनार्थमंबाया नदीपुलिनसंस्थितः स च वैश्यस्तपस्तेपे दे-
वीसूक्तं परं जपन् ७॥

रणे इत्यस्य व्रते गम्यमाने आकारस्यैकारः इत्युक्तप्रकारेण तस्य सुमेधसो मुनेर्वचः
श्रुत्वा सुरथस्तमृषिं शंसितव्रतं सर्वोज्वलकर्माणं प्रणिपत्य ५ ऋषिं नमस्कृत्य राजा वैश्यश्च अतिममत्वेन पुत्रादिष्वात्म
त्वेन परमस्नेहबुद्ध्या राज्यापहरणेन च निर्विण्णो विरक्तः सन् सद्यस्तत्कालमेव तपसे तपः करणार्थं जगाम महामुने इति
जैमिनेः संबोधनं ६ नद्याः पुलिने तत्कालजलमुक्ते तटे संस्थितः सन् स राजा वैश्यश्चेत्यन्वयः देवीप्रतिपादकं सूक्तं सू-
क्तं जपन् एकदेवताप्रतिपादकः सूक्तम् ऋचः सूक्तमाहेनोच्यते परं उत्कृष्टं स वैश्यो विकायाः संदर्शनार्थं देव्या दर्शन
मिच्छन्नदीपुलिनमाश्रितः देवीसूक्तं परमुत्कृष्टं सप्तशतिकाजपेन तपस्तेपे महत्तपो तप्यत ७॥

स॰ महीमयीं प्रधानमृत्तिकामृत्तिका अर्हणां पूजां अग्नितर्पणं होमः तौ सुरथवैश्यौ तस्मिन्पुलिने तस्याः देव्याः महीमयीं मृत्ति
स॰टी॰ कारूपां मूर्तिं कृत्वा पुष्पधूपदीपैः अर्हणां पूजां चक्रतुः ८ निराहारौ अभक्षाहारौ कदाचित्स्वाहारौ तन्मनस्कौ तद्गतचित्तौ स
७३ माहितौ सावधानौ स्वदेहशोणितेन बलिमुपहारं च चक्रतुः ९ एवं तयोर्यतात्मनोर्यतचित्तयोर्देव्याः सपर्यां कुर्वतोः
त्रिभिर्वर्षैः सा जगज्जननी परितुष्टा सती तत्सर्वं ददामि प्राप्यतामित्येव पाठो न प्राप्यतामिति अग्रे प्राप्यत इत्यभि॰
धानं यथा भवति तथा प्राह १० हे कुलनंदन हे वैश्य मत्तो मत्सकाशात् तत्सर्वं प्राप्यतां स्वीक्रियतां अथ युवाभ्यां परितुष्टा सती १२

तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीं अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ८ निराहारौ यतात्मानौ तन्मन
स्कौ समाहितौ ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितं ९ एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः परितुष्टा ज
गद्धात्री प्रत्यक्षं प्राह चंडिका १० देव्युवाच यत्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन मत्तस्तत्प्राप्यतां सर्वं परितुष्टा
ददामि वां ११ मार्कंडेय उवाच ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि अत्रैव च निजं राज्यं हतशत्रुबलं बलात्
१२॥

यानात् अन्यथा पुनरुक्तिः स्यादिति केचिद्वदंति तन्मंदं पुनरुक्तेः आमित्याद्योत्तरार्धेन परिसमर्थयिष्यमा
नैरुक्तिः स्यादिति केचिद्वदंति तन्मंदं तेन पुनरुक्तिभिया संभवश्यायागतपाठान्यथाकारस्यासाधुत्वात् ॥ हे
नृप त्वया यत्प्रार्थ्यते हे वैश्य त्वया च यदभिलष्यते मत्तः सकाशात् तत्सर्वं प्राप्यतां कुर्वंतस्मासिः स्या परितुष्टाहं
वर्ते वां युवाभ्यां तत्सर्वं ददामि ११ अविभ्रंशि विनाशरहितं राज्यं अन्यस्मिञ्जन्मनि अत्रैवास्मिञ्जन्मनि एषिष्यामि वा बलात् स्वसामर्थ्या
त् हतशत्रुबलं बलं सैन्यं यस्य एवंभूतं निजं राज्यं वव्रे १२॥

73

स वैश्योपि स्मरणापेक्षया जात्यादीनोपि ततः स्वस्व वरप्रार्थनानंतरं ज्ञानं राज्यापेक्षया उत्कृष्टं तत्त्वज्ञानं वव्रे उत्कृष्टवरप्रार्थनयोग्यतासंपादकहेतुगर्भं विशेषणं निर्विण्णमानस इति विषयव्यावृत्तचित्त इत्यर्थः वैराग्येपि हेतुगर्भं विशेषणं प्राज्ञ इति प्रकृष्टज्ञानप्राप्तस्तोकाद्बुद्धिर्विद्यते यस्य सोप्राज्ञः कथंभूतं ज्ञानं ममेति अस्वीये स्वीयाभिज्ञाने अहमिति अनात्मन्यात्माभिमान इति पाठ्याद्दुपदर्शनार्थौ इदंप्रोयः संगस्तस्य विच्युतिकारणं ज्ञानमिति विशेषणानतयाकेचियोजयंति तन्मदंममेत्यहमित्याकारकज्ञानस्य संगविच्युतिकारकत्वाभावात् १२ हे नृपते अस्खलितं अप्रच्युतं स्थिरं रिपून्हत्वा स्थित

सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ममेत्यहमिति प्राज्ञः संगविच्युतिकारकं १३ श्रीदेव्युवाच ॥
स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् हत्वा रिपूनस्खलितं तव तत्र भविष्यति १४ मृतश्च भू
यः संप्राप्य जन्म देवाद्विवस्वतः सावर्णिको मनुर्नाम भवान्भुवि भविष्यति १५ वैश्यवर्य त्व
या यश्च वरोस्मत्तोभिवांछितः तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति १६ ॥

स्यत् तव तत्र स्थाने राज्यं भविष्यति तेन भिन्नकर्तृकः कथं क्त्वाप्रत्यय इति न शंकनीयं अथवा हत्वा रिपून्भवान् राज्यं लप्स्यते तत्र राज्ये अस्खलितं अस्खलनं च तव भविष्यतीति योज्यं १४ अस्खलिते स्थैर्यं प्राप्तिमेवाह मृतश्च सान्विवस्वतः सूर्याद्भूयः पुनर्जन्मोत्पत्तिं संप्राप्य सावर्णिको मनुः नामेति प्रसिद्धो प्रसिद्धो मनुर्भवान्पृथिव्यां भविष्यति १५ वैश्यवर्य वैश्यश्रेष्ठ वर्य पदेन स्मरणापेक्षणं प्रदर्शितं प्रयच्छामि प्रकर्षेण ददामि संसिद्ध्यै समीचीनास्वर्गादि विलक्षणा सिद्धिर्मुक्तिस्तदर्थं तव ज्ञानं तत्त्वज्ञानं भविष्यति १६ ॥

स· प·टी· १४

74

ताभ्यामभिष्टुता सती सद्य स्तत्क्षणमेवांतर्हिता बभूव ९ एवमनेन प्रकारेण देव्याः सकाशाद्वरमभिलषितार्थं प्राप्य क्ष-
त्रियश्रेष्ठः सूर्याज्जन्म समासाद्य सावर्णिर्भवदिति शेषः सच मनुः मन्वंतराधिपो भविता भविष्यतीत्यन्वयः यद्यपि स-
प्तशतिकायां क्वचित्किंचित्काचित्कादिकमधिकं पठ्यते तथापि तत्पाठे न दोषः न्यूनपाठे दोषात् १० मन्ये विषसज्जो-
नसेति बलिनस्त्वामेव सर्वे व यांति तस्मात्त्वं सकलाश्रयोसि भगवन्नन्यतीर्थरण्यात्रयः मिथ्याभाति च तेव वो मम वि-
मोभक्ती निजस्ये मदः क्षीयेद्दं तव पादभागपियतः संसारसिंधोर्हया १॥ संसारः परमांबुधिः प्रतिदिनं तारुण्य-

मार्कंडेय उवाच इति दत्वा तयोर्देवी यथाभिलषितं वरं बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ९
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः १० इति श्रीमार्कं-
डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोध्यायः १३
समाप्तोयं सप्तशतिकेति शुभम् ॥ भद्रम् ॥

मालंबते तस्मिन्म्रजति मूढधीः प्रतिपदं प्राप्यापि ते रूपतां तस्योच्छेदकरं तवांघ्रियुगलं केनापि न स्मर्यते त-
स्मान्मोहकयुर्यतां वयि परं श्रांके निरालंबनः १ नानादिग्विजयस्पृहातिचिरवलद्भ्रांत्यासपयोधेः पारं तितीर्षोः सति
दुर्जनाद्भयदरोषाद्यसंपत्पदे विश्रांते भयचंद्रदेवं सातिलकेनाप्युरीक्षापतौ टीके परं चिंताय मस्करिश्मतां भूयात्सना-
मेः फलं २ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीरामाश्रमविरचितायां तत्थान्यकृतायां च देवीमाहात्म्य टी-
कायां सुरथवैश्यवरप्रदानं नाम त्रयोदशोध्यायः १३ ॥ समाप्तोयं सप्तशतिटीकेति कल्याणम् ॥

स॰ दु॰ टी॰ ७५ 75

नमचंद्र

समरामभुनिचंद्रवत्सरे ज्येष्ठमासिसितपेक्षगे गुरौ नीलकंठ लिखितं सुपुस्तकं श्रीरणसिंहन्टपवित्त
तुष्टये १ श्रीरणवीरसिंहन्टपस्यार्थे देवीमाहात्म्य दीपिका मयेयं लिखिता तत्रशोधयंतु कविबुधाः २
सर्वतोमधुकैटभौममहिषोधूम्राक्षशुंभौकोहतौ चंडश्चापिसमुंडदैत्यनिवहो देव्याययापातितः नीरक्तीह
तरक्तबीजपुरुषासंभोनिसुंभोपिवा तेसैन्यैःसहदैत्यथैवनिहताः साचंडिकापातुवः ३ शुभमस्तु
सर्वजगताम् संवत् १९ ३८ श्री जम्बूद्वीपमें पुस्तकमिदं लिखितं ॥ भद्रंभूयाल्लेखकपाठक
श्रोतृणांमित्यां ॥ श्रीगुरुवे शिवरूपायनमः ॥ भद्रम्

दुर्गाटीका पत्रेको ७७

८०